TRIVANDRUM SANSKRIT SERIES.

No. CVIII.

Śrī Setu Lakṣmī Prasādamālā.

No. XX.

THE BĀLAMĀRTĀṆḌAVIJAYA

OF

DEVARĀJAKA[illegible]

EDITED BY

K. SĀMBAŚIVA ŚĀSTRI,

Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HER HIGHNESS THE MAHARANI REGENT OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1930.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १०८.

श्रीसेतुलक्ष्मीप्रसादमाला ।

ग्रन्थाङ्कः २०.

बालमार्ताण्डविजयं

देवराजकविविरचितं

पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्षेण
के. साम्बशिवशास्त्रिणा
संशोधितम् ।

तच्च
अनन्तशयने
महामहिमश्रीसेतुलक्ष्मीमहाराज्ञीशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः ११०६, क्रैस्ताब्दाः १९३०.

॥ श्रीः ॥

श्रीपद्मनाभसेवि-
न्यखिलश्रीवर्धनी महाराज्ञी ।
श्रीसेतुलक्ष्म्यभिख्या
प्रत्यक्षा जयति वञ्चिभूलक्ष्मीः ॥

ग्रन्थावलिरियमिन्धे
प्रसाधिता तत्प्रसादगुणगुम्फा ।
श्रीसहितसेतुलक्ष्मी-
प्रसादमाला सुवर्णमणिचित्रा ॥

PREFACE.

This historical drama "Bālamārtāṇḍavijaya" is an invaluable addition to the Trivandrum Sanskrit Series. Apart from that, the edition of this work in this series which owes its publication to the enlightened patronage of His Most Gracious Highness the Mahārāja of Travancore is also a fulfilment of our duty in the light of its singularity.

The author of this drama discloses his name "Devarāja" in a conundrum in the Prastāvana,

"परस्परादेशतया प्रयुक्त-
हल्वर्णकत्वाद् धृतवेदरूपम् ।
स्वकीयनामाद्यपदं वहन्तं
बाले! कविं वेत्सि हि राजचूडम् ॥" (p. 2).

through the actress in her speech,

"अहो, सायन्तनवासन्तिकावक्षेपविलोपिसारस्वतसौरभेण वञ्चिकुलसागरपूर्णचन्द्रायमाणविद्वज्जनसार्वभौमश्रीबालरामवर्मकुलशेखराभिनन्दनीयनिजविनयगुणालङ्कृतेन देवराजसूरिणा कृतं बालमार्ताण्डविजयं नाम नाटकं प्रयोक्तव्यमिति आर्येण वचनं विनैव नियुक्तास्मि"

and in the end of the manuscript after the Bharatavākya,

"श्रीरामवर्मकुलशेखरभूमिपाल-
बाल्याश्रितः कलितवान् कविरेष धीरः ।
श्रीपद्मनाभचरितोज्ज्वलमेव देव-
राजाभिधः सुमधुरं रसवत्प्रबन्धम् ॥"

Tradition has it that this Devarāja belonged to a Brahmin family that migrated from Pattamadai in the Tinnevelly District and settled at Āśrāma, a village near Suchindram in South Travancore and that being well-versed in all branches of ancient lore, and an early dependent of the prince Rāma Varma, nephew of His Highness Mārtāṇḍa Varma he became the chief of the Pandits attached to the palace. That his father Śēṣādri was a vedic scholar revered by all could be gathered from the stanza,

"पितामहसमानोऽस्य पिता महिमगौरवात् ।
पितामहसनामा च शेषाद्रिरिति संज्ञया ॥" (p. 111).

Mr. T. Padmanabha Aiyar B. A., Tahsildar, Vilavancode Taluk (Travancore), who is known to be a descendant of the

author's family writes to us :— "I referred the matter to the elder members of my family. Devarāja, whose full name is Devarāja Śāstrial, is my grand-father's grand-father in the male line. He was one of the donees of the Āśrāmam Village, near Śuchindram, which as you know, was gifted over to 12 Brahmins under a royal gift-deed in the year 940 M. E. He was therefore a contemporary of His Highness, the famous Mārtāṇḍa Varma and his successor Rāma Varma. No further information is available about his life. His ancestral place was, I learn, Pattamadai in the Tinnevelly District wherefrom he migrated to Travancore."

It is by all means clear that the poet is a contemporary of His Highness Mārtāṇḍa Varma from the dedication of the work to His Highness,

"कविः — (सहर्षम्)

सुचिरमिह भवन्तं नायकं प्रार्थयन्ती
मम पुनरियमेषा साहिती कन्यकेव ।
क्षितिपतिकुलमौले! बालमार्ताण्ड! पाणि-
ग्रहणमहमिदानीं प्राप्य धन्यैव तेऽस्तु ॥" (p. 116).

and from the awarding of presents, by His Highness, to the poet,

"राजा — (सपरितोषं किञ्चिद् विवृत्य सम्पुटीचतुष्टयम्)

एका भूषणभूषितेयमितरा माणिक्यहारोज्ज्वला
कौशेयाम्बरधारिणीयमपरा चामीकराढ्या परा ।
एषा पेटचतुष्टयी मणिमयी सम्मानिता ते मया
धीमन्! मामकपद्मनाभचरिताख्यातुः प्रबन्धात्मना ॥"

(p. 116).

The date of His Highness' reign is from 1729 to 1758 A. D. (904 to 933 M. E.)

There are many points worthy of mention here by virtue of the importance of the theme and also of the work.

Here is a synopsis. His Highness Mārtāṇḍa Varma got disgusted with the task of governing the country for long as it tended to lead the way to the decadence of his devotion and the influence of infatuation. Once while devoutly worshipping the God Śrī Padmanābha with the desire of carrying on the Government of the country without any infringement of

his devotion, His Highness had a vision of the Lord and obtained a benediction from the Gracious Deity,

"इहतं ते प्रजानामि मदीयं कुरु शासनम् ।
इदं राज्यं ध्रुवस्येव न ते मोहाय कल्पते ॥" (p. 10).

that he would not be beset with infatuation even though he might be assuming the reins of government. Further, he was blessed to rule as the viceroy and servant of Śrī Padmanābha after renovating His dilapidated temple at Trivandrum with the resources acquired through the subjugation of the numerous neighbouring princes, by propitiating Śrī Padmanābha by the performance of Mahābhiṣeka ceremony, according to Rājasūya rites, and then by dedicating the kingdom to Him. Thus in fact, the king attained the gratification of being styled Bāla Mārtāṇḍa, and realized the result of such a benediction by the amassing of riches through conquests, by the renovation of temples, by the performance of the Mahābhiṣeka and by the dedication of the whole kingdom to Śrī Padmanābha. Thus though there are numerous topics to be dealt with, the principal theme is the dedication of the entire realm including the conquests to Śrī Padmanābha preceded by the Mahābhiṣeka ceremony. The whole theme has been compressed into the five acts of the drama.

Act I. By way of introduction, the king narrates to his ministers his vision of Śrī Padmanābha and the project of renovation of the temple by means of the wealth acquired through conquests.

Act II. The king commences his victorious march from Suchindram, after the donation of cows to Brahmins and directs the heir-apparent to have the work of the "Modern Kālidāsa" recited in accordance with the Lord's command, by the proficient Pāṭhaka, Rangaranjaka, for the sake of the diversion, during the days of separation, of his subjects who were eager to accompany the king.

Act III. The description of the different places reached by the king during his victorious march and the different incidents that occurred in those places upto his return.

Act IV. The king returns from his victorious campaign, orders the renovation of the temple within 5 days, and the performance of the Mahābhiṣeka, making the Śrī Pādam palace his abode during the Mahābhiṣeka ceremony

observes religious austerities and accompanied by the chief of artisans inspects the Srī Padmanābha Temple which has been renovated in accordance with instructions.

Act V. After propitiating Śrī Padmanābha by the Mahābhiṣeka ceremony, the king vested with all the emblems of a monarch dedicates his kingdom to Him. And gracious to His devotees, the God blesses the king and permits him to practice his devotion. Finally, great poets and scholars are honoured by the king, all royal orders being sanctified by the emblem of Śrī Padmanābha.

Now, let us consider how much is historically true in the above matter. Themes that are dry and empty in fact are transmuted by great poets into brilliant and relishable ones by the power of their imagination. It depends on the critic even then to enjoy the essence of it in an eclectic spirit. So too, many incidents have been enlinked here in a spirit of romance. However the facts mentioned below, on sifting, deserve to be noted. First, the course of the victorious march is traced :

"शुचीन्द्रक्षेत्रमागत्य तत्रालङ्कृतगोसहस्रं विप्रसात्कृत्य पालितगीर्वाणनाथं स्थाणुनाथं प्रह्वीभवन् प्रार्थ्य कर्तव्यं राजतन्त्रं सामात्ये युवराजे निधाय दन्तावलतल्लजमाधिरुह्य विजिगीषया सबलः स्वविषयान्तं व्यगाहत ।"

"स वञ्चिकुलशेखरः स्वभटबाहुदण्डाहत-
प्रयाणपटहच्छटाध्वनितपूर्णदिङ्मण्डलः ।
ययौ झटिति पाण्ड्यभूरमणपट्टणं वाहिनी-
रजःपटलचूषिताखिलपयोधिपाथोभरः ॥" (p. 29).

It is thus known that the king started from Suchindram in a north-easterly direction along the sea-shore and marched into the Pāndya kingdom. From the stanzas,

"उत्सङ्गे कावेर्याः शयितं दयितं महाविभूतेस्तम् ।
साक्षादकरोद् राजा रङ्गधुरीणं परात्परं पुरुषम् ॥" (p. 30).

"यूयं यात बलाधिपाः सह बलैः सर्वानुदीच्यान् नृपान्
जित्वायात ततो धनान्युरुविधान्यादाय मासैस्त्रिभिः ।
तावद् रङ्गपतेरमुष्य चरणावासेवमानः सदा
वत्स्याम्येव कवेरजाम्भसि कृतस्नानः सहैभिर्द्विजैः ॥" (p. 31).

we learn that he went to Srīrangam and himself remaining there, sent forward his commanders.

Again, we learn from stanzas,

"आच्छिन्दन्तो ध्वजाख्रद्रविणमुरुविधं म्लेच्छसांयात्रिकाणां
सेत्वास्यक्षोणिपालप्रभृतिरिपुनृपान् दूरमुत्सारयन्तः ।
आकोलं केरलानां हृदि हृदि निखनन्तो जयस्तम्भमुच्चै-
र्वञ्चीन्द्रस्य प्रतापा इव धृततनवो हन्त दीव्यन्ति योधाः ॥"
(p. 32).

"मौण्ड्यं पाण्ड्य! भजस्त्र चोल! कलयेश्चूडामणेरर्पणं
तुण्डीर! त्यज डिण्डिमं जहिहि रे कर्णाट! दुर्नाटिकाम् ।
आन्ध्रेश! च्युतिरन्ध्रमिच्छ यवन! त्राणं वनं तेऽधुने-
त्याधावन्ति रणाग्रमुद्भटगिरो वञ्चिक्षितीन्द्रोर्भटाः ॥"

"रे रे कोङ्कण! पङ्कगं व्रज महाराष्ट्र! स्वराष्ट्रं त्यजे-
र्ष्टीकेथाः क्नु पारसीक! चर रे वैदर्भ! दर्भाङ्कुरान् ।
गामालिङ्ग कलिङ्ग! वङ्ग! विपिने त्वङ्गाङ्ग! नागं त्यजे-
रित्याराादिव वञ्चिसैन्यशिबिरे जोघुष्यते दुन्दुभिः ॥"
(p. 33).

that the King Bālamārtanda subdued all the princes in the east, west and north. The victory over the prince of सेत्वास्य or Kakkūr is historically authentic. The conquest of Kerala upto the Kola country and such other exploits of him appear to flavour of imaginative romance.

He seems to have proceeded from Śrīrangam to Rāmesvaram, thence to Thiruchendur and from there to Navatiruppati, as is evident from the following verses :—

"जयध्वजं कीर्तिपताकमुच्चैराच्छिद्य दुर्दान्तमहीपतीनाम् ।
स वञ्चिवंशोदधिपूर्णचन्द्रो विप्रैः सहागाद् रघुनाथसेतुम् ॥"
(p. 34).

"ततस्तस्मिन् वञ्चिक्षिततलवलारिः कृतयथा-
विधिस्नानो लङ्कापतिरिपुकराराधितपदम् ।
प्रणम्येशं भक्त्या हिमकरकलोल्लासिमकुटं
मनोज्ञं क्रौञ्चारेर्झटिति पुरमागात् प्रमुदितः ॥" (p 35).

हृष्टात्मा वञ्चिपृथ्वीपतिरथ रुचिरं कल्पयित्वा बहुभ्यो
मृष्टान्नं देवसेनापरिवृढनिकटे क्षोणिवृन्दारकेभ्यः ।
साष्टाङ्गं तत्पदाम्भोरुहयुगलनमस्कारमप्याकलय्य
द्रष्टा तस्मात् प्रतस्थे स्थलनवकपतीन् पद्मनाभांशभूतान् ॥"
(p. 37).

"श्रीशालिवाटीशपुरीं समेत्य तत्रत्यभूमीसुरनिर्मलत्वम् ।
ताम्रापगां चापि समीक्ष्य राजा तां रम्यतामेव शशंस भूयः ॥"

(p. 40)

A few other facts mentioned in the drama deserve to be noticed here:—

(1) There was dancing in celebration of Navarātri festival in the Mahārāja's palace. This was in vogue till last year (vide page 2).

(2) The king observed the vow of Māghasnāna that lasted for a month (vide page 6).

(3) The Alankāradāna was prevalent even in the time of Bālamārtāṇḍa Varma (vide page 14).

(4) The execution of Madampis is referred to (vide page 16).

(5) Mention has been made with regard to the slaying of the rebels Pappu Tampi and Raman Tampi, famous as Ilaya Tampis (vide page 16).

(6) Mention is made of the conquest of Quilon (vide page 16).

(7) The battle with the Dutch at Colacchel and the capture of De Lannoy are referred to (vide page 16).

---

(1) "नवरात्रपूजामहोत्सवे आङ्गिकसात्विकव्यञ्जकलास्यचमत्कारपरितोषितेन"

(2) "माघस्नानविधये शङ्खतीर्थं गतः"

(3) "सहस्रमलङ्कारवतीनां कामधेनूनां सद्ब्राह्मणेभ्यः प्रतिपादितवान्"

(4) चिरकालराजन्यकुलद्रोहिणः सर्वेऽपि प्रज्वलन्तमग्निं शलभौघा इवैनमासाद्य स्वयमेव कथं प्रनष्टाः"

(5) "किञ्च रावणकुम्भकर्णाविवात्यन्तपरमदुर्जयौ बालकनिष्ठाभिधानौ प्रत्यर्थिमूर्धन्यौ दुरालोचनाफलसंसिद्धिं निश्चित्य विविक्तमेव निजोपकण्ठं कालचोदनया सम्मिलितावेवागतौ समये विदितवृतान्तेन निमेषमात्रेण खड्गधाराकवलीकृतकण्ठनाळावाकलय्य प्रत्येकं द्वैरूप्यतामापादितौ ॥"

(6) "कोलम्बपुरदुर्गमपि शत्रुकुलमुत्सार्य निजसैन्यतुरङ्गतरङ्गसङ्घसङ्कुलीकृततया चन्द्रोदयारम्भसमुच्चलदर्णवाडम्बरसन्दर्शनीयतामानीतम् ॥"

(7) "निजराज्यमर्मभूतं प्रभूतधनागमस्थानमतर्कितमेवाक्रम्य रक्तबीजासुरकुलमिव तत्रैव परिवर्तमानं कुहनैकनिलयं सकलमपि सस्वामिकं सांयात्रिकयूथमपि विविधं च समग्रायुधजालमाच्छिद्यैव विद्रावितं विनिहतं, सद्यः शरणागतं सम्यक् परिपालितं च"

(8) Reference to the donation of the Mahodayagrama (vide page 23).

(9) The kings had Vaiṣṇavic tendencies at the time (vide page 50).

(10) The kings worshipped God within the temple, only after circumambulating outside (vide page 51).

(11) There were 8 Yoga Brahmins who were the custodians of the temple and the counsellors of the king who had but a half vote (vide page 51).

(12) The word Karyakara is but the Sanskritized form of Karyakkar which obtains even now (vide page 52).

(13) The Śrī Pādam palace which is located to the north of the Lord's feet appears to be significantly so called. The holy waters that wash the feet of Śrī Padmanābha collect there and sanctify the spot (vide page 53).

(14) Mahīdharendranandini is the princess Raṇi Parvati Bhai, His Highness' sister and mother of prince Srī Rāma Varma (vide page 54).

(15) Reference has been made to Ottakkal Maṇḍapam (the single-slab-dais) (vide page 74).

(16) Reference to the Ānaval whose office is to report to the king the affairs of the temple (vide page 74).

(17) Reference to the Tamil Brahmins known as "Dāsas" who perform services in the temple (vide page 76).

---

(8) "प्रबन्धसाहितीतुष्यद्बालमार्ताण्डवर्मणा ।
नवीनकालिदासाय ग्रामो दत्तो महोदयः ॥"

(9) "हृद्योर्ध्वपुण्ड्रोज्ज्वलः"

(10) "भगवन्मन्दिरप्रवेशं नाटयन् तन्मन्दिरं त्रिःपरिक्रम्य भगवत्सन्निधिमुपेत्य साञ्जलिपुटं पश्यन्"

(11) "इति निष्क्रम्य कर्मन्दिना सप्तभिर्ब्राह्मणैश्च सह प्रविशन्"

(12) "राजा--बाभ्रव्य ! कार्यकारानानय"

(13) "श्रीपादतीर्थतीर्थांकृतं निवेशनः ॥"

(14) "महिम्ना नाम्ना च महीधरेन्द्रनन्दिनीमनुस्मारयन्ती"

(15) "एकशिलामण्डपमध्युषितनवरत्नखचितभद्रासनोपरि निवेश्यतामेष भगवाननन्तकल्याणगुणाभिरामः श्रीपद्मनाभः"

(16) "समुदायकार्यकारी कनकदण्डधारी"

(17) "दासैर्ममाज्ञावशैः"

(18) The palace of His Highness was then situated inside the Srī Pādam premises and when he visited the temple, he worshipped Śrī Kṛiṣṇa first, as he had to pass that way (vide page 78).

(19) The king prayed to Śrī Padmanābha, to accept the burden of Government from him (page 81).

(20) Śāntikara is the Sanskritized form of Śāntikkāran that obtains to the present day (vide page 82).

(21) Reference to the king's wish that God Śrī Padmanābha should be anointed as the Mahārāja (vide page 83).

(22) The "Dāsa" class was entrusted with the business of keeping the cows and also the rice for preparing Pāyasam (milk-pudding) (p. 85.)

(23) Śrī Padmanābha accepted the sovereignty and offered a sword and shield to the king in recognition of his viceroyalty (page 86).

(24) The image of the child Śrī Kṛiṣṇa laid in the cradle placed to the south of the Ottakkal Maṇḍapam is referred to (vide page 88).

---

(18) "श्रीकृष्णमवलोक्याभिवन्द्य च भगवदालयान्तःप्रवेशं नाटयति"

(19) "अन्तर्यामी त्वमिह जगतां वेत्सि सर्वं च विष्णो!
वेद्यं किं वा तव भुरि मया विद्यते वासुदेव!।
वात्सल्यानां कलय करुणाभाजनं भक्तबन्धो!
साम्राज्येऽस्मिन् मम वह धुरं सर्वदा पद्मनाभ! ॥"

(20) "आह्रियन्तां महाभिषेकपूजोपकरणानि शान्तिकारिभिः ॥"

(21) "सकलजगत्सम्राजं श्रीमन्तं हन्त पद्मनाभं त्वाम्।
अभिषिञ्चाम्यद्भिरहं वञ्चिमहीपालसकलसाम्राज्ये ॥"

(22) "भोः सामुदायिक! स्मृतिमात्रसन्निहितानि सवत्सानि कामधेनूनां सहस्राणि भगवतः प्रतिदिनं पयस्यार्थमासां दुग्धं दत्वा तत्प्रमाणेन तण्डुलाश्च प्रतिग्राह्याः इति भगवद्दासवर्गेभ्यः प्रतिपादय"

(23) "भो वत्स! बालमार्ताण्ड! त्वया दत्तां महीधुराम्।
अग्रहीषं प्रहर्षेण युवराजोऽसि साम्प्रतम् ॥
यौवराज्याभिषिक्तस्य तव मुद्रैव शाश्वती।
भद्रा कृपाणवल्लीयं सखेटा गृह्यतां त्वया ॥"

(24) "इत्यान्दोलिकाशायिनं यशोदास्तनन्धयं मुकुन्दमानम्य बहिर्निष्क्रम्य"

(25) Mahāsūpādhikāri is the Sanskritized name of the officer who is designated "Valiaparippukāran" (vide page 96).

(26) The kings of Travancore from the time of Mārtāṇḍavarma were to be styled Yuvarājas and the term Mahārāja is just a verbal embellishment. Further the custom takes root here that all rulers of the country should pass orders under the emblem and seal of Śrī Padmanābha (vide page 108).

(27) The symbol of Śrī Padmanābha's feet, adorning the crest of the kings of Travancore to this day is suggestive of the fact that the king is His servant (vide page 109).

Now, we shall consider the merit of the work. It is clear from the words of the actress,

"... . बालमार्ताण्डविजयं नाम नाटकं प्रयोक्तव्यमिति आर्येण वचनं विनैव नियुक्तास्मि ।"

that this play belongs to the "Nāṭaka" type of dramatic compositions and the name of the drama Bālamārtāṇḍavijaya is suggestive of the essence of the theme presented. In conformity with the definition,

"वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते ।
प्रख्यातनायकोपेतं नाटकं तदुदीरितम् ॥"

---

(25) "महाकङ्कणधारी महासूपाधिकारी"

(26) "तदितःप्रभृति मयि मद्भागिनेये वत्से श्रीरामवर्मणि मद्वंशमौक्तिकैर्भविष्यत्सु तेषु तेषु च यथासमयं सर्वैरपि युवराजशब्दः प्रयुज्यताम् । महाराजशब्दस्तु भगवत्यनन्तशायिनि पद्मनाभे ।

आज्ञामुद्राप्यनुज्ञा च निग्रहानुग्रहावपि ।
एतदन्यच्च यत्किञ्चित् तस्य कर्ता श्रियः पतिः ॥

तदशेषेष्वपि कृत्येषु प्रयोगार्हतया भगवदभिधानं पद्मनाभपदं प्रमाणीक्रियताम् । मदीयाभिधानं तु व्यवहारमात्रे यदहं न कस्यापि कर्तास्मि । आचार्याः—तत्त्वज्ञानानुरूपोऽयं देवस्य कल्पनानिष्कर्षः । लोकश्चायमनेन महता श्रेयसा संयोज्यते, यदस्य श्रीपद्मनाभपदोच्चारणं विना न कापि कार्यप्रवृत्तिः ।"

(27) "मनसा वहसे यत् त्वं मदङ्घ्रिकमलद्वयम् ।
भक्तचिह्नतया वत्स ! तदेव शिरसा वह ॥"

this is a full fledged Nāṭaka, with the celebrated king Mārtāṇḍavarma as its hero and with the delineation of the heroic sentiment which is in harmony with the exalted virtues of the hero, in consonance with the spirit of conquest and culminating in the noble sentiment of devotion. And in keeping with the dictates of the Daśarūpaka,

"सूचयेद् वस्तु बीजं वा मुखं पात्रमथापि वा ।"

there is the indication of the plot in,

"योऽयं वञ्चिकुलार्णवादुदभवत् सञ्चारिकल्पद्रुमो
यस्मै भक्तिगुणेन यन्त्रित इव श्रीवल्लभस्तिष्ठते ।
कर्पूरैरिव यस्य कीर्तिनिकरैर्दिक्चक्रमावास्यते
तस्य क्षोणिपुरन्दरस्य महिमा पारे गिरां वर्तते ॥" (p. 4).

and of characters in,

"राजहंसश्रियं तावद् गायन्त्या वल्लभे त्वया ।
अनेन वैणिकेनेव सेयं चित्रार्पिता सभा ॥" (p. 4).

All the characteristic features of a classical drama are manifest in this work and we do not propose to dilate upon that point. And in regard to the propriety of naming the work Bālamārtāṇḍavijaya, we consider that the drama has been appropriately so named by the poet who appears to give prominence to the fact that Śrī Padmanābha is the anointed king and the Mahārāja is but His Viceroy, the affix Bāla being suggestive of the modesty of the king. It might equally be argued that the drama could properly be called Vīra Mārtāṇḍa Vijaya as it treats of the victory of the heroic Mārtāṇḍa Varma over all his foes, internal as well as external. The poet explicitly endeavours to justify in ways manifold, the title 'Bāla Mārtāṇḍa' of the hero, whose prowess and heroism and victory recurrently figure in the work *e. g.*,

"सोऽयं वञ्चिकुलोद्भवो विजयते श्रीबालमार्ताण्डराट् ।" (p. 4).

"अयं प्रख्यायते तेन बालमार्ताण्डसंज्ञया" (p. 17).

"देवोऽयं बालमार्ताण्डः कुञ्जरस्कन्धमाश्रितः ।
उदयाचलशृङ्गस्थो बालमार्ताण्ड एव सः ॥" (p. 20).

and our surmise that his successors also accepted this title as an embellishment to their modesty gains ground.

There is a town established by His Highness Bāla Rāma Varma, Bālarāmapura by name, situated eight miles east of Trivandrum. In ancient almanacs there is the word

Bāla used instead of Pāla in the title Vancipāla occurring in modern almanacs of Travancore. Without investigating the origin of the occurrence of the word Bāla, Pāla was inserted as it appeared appropriate in the sense of protector. But it appears to us that the word Bāla is more in keeping with the trend of facts before us.

It is easy to understand that the poet follows the style of Kālidāsa generally; and hence occasional imitation and partial plagiarism are noticeable. Note the imitation,

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥"

(Śākuntala.)

"राजहंसश्रियं तावद् गायन्त्या वल्लभे त्वया ।
अनेन वैणिकेनेव सेयं चित्रार्पिता सभा ॥"

(p. 4).

and the adoption of words wholesale,

"शरत् पङ्कजलक्षणा" (Raghuvaṃśa)

"शरत्पङ्कजलक्षितश्रीः." (p. 14).

The poet appears to have been fond of the style of the Mudrārākṣasa also in similar situations *e. g.*,

"तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न संतिष्ठते
मूर्खं द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि ।
शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो
श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम् ॥"

(Mudrārākṣasa III. 5)

"भीत्या ये प्रणमन्ति भूमिपतयस्ते पालनीया मया
मानाद् ये न नमन्ति ते तु करुणामुत्सृज्य वध्याः कथम् ।
इत्यामर्शमृदूकृतान्तरतया मन्दोद्यमानां रतिं
नास्माकं तनुते दिगन्तविजयश्रीः सापि सर्वोत्तरा ॥"

(p. 18).

There are numerous instances of beautiful passages to be cited from the work. We cite the following stanza,

"स्फाटिकीयमधिरोहणी स्वतो
निर्मला कलुषितेन्द्रनीलतः ।
तावकीनपदपांसुसंगते-
र्गौतमीव समयं प्रतीक्षते ॥" (p. 62).

at random.

It may be mentioned here that the hero of this play, king Mārtāṇḍa Varma, has figured largely in Malayalam literature. The enthusiastic eulogies by Ramapurathu Varier in Kuchelavrittam Vanchippattu and by Kunchan Nambiyar in Sabhāpraveśam Thullal are eloquent testimonies of the heroism of the great king. Both of them were the contemporaries of king Mārtāṇḍa Varma. Recently a Kilippattu dealing with the exploits of this former sovereign of Travancore was discovered and published by **Mr. M.** Rajaraja Varma M. A., B. L. The malayalam novel, Mārtāṇḍa Varma by the talented author Mr. C. V. Raman Pillai B. A., has king Mārtāṇḍa Varma as its central figure. The undying reputation of the king has thus got embedded in the malayalam literature. The present publication is unique inasmuch as it is the only Sanskrit work in which this heroic ancestor of our Mahā Rāja has been portrayed in the halo of his illustrious achievements.

We have been able to procure only one manuscript of the work which is about 150 years old and that is deficient in respect of the loss of two leaves in the beginning and middle. But we wish to offer the work to the public without any delay as it treats of the history of our royal dynasty and particularly as it panegyrizes the glories of His Highness the ever memorable Mārtāṇḍa Varma. The manuscript is in Grantha character and has been obtained from the library of Purushottamar Vasudevar, Vattappalli Maṭham, Suchindram. The interest he manifests in the safe preservation of these manuscripts is laudable indeed. His enthusiasm in the preservation of such manuscripts and the offer of this for publication in our series have been but inadequately rewarded by the present we have made of our publications to him. We offer our sincere thanks to him and hope that other bibliophils like him may feel inclined to assist us with loans of such valuable and interesting manuscripts.

Trivandrum,
10-12-1106.

K. SÂMBAŚIVA ŚÂSTRI.

अवतारिका।

श्रीबालमार्ताण्डविजयं नाम चरितभरितमिदं नाटकमस्मत्पौरस्त्यग्रन्थमणिमालायाः किमपि समुज्ज्वलप्रभं हाटकमाभरणम्। विशिष्य **श्रीपद्मनाभदासवञ्चिपालकुलशेखरकिरीटपतिमहाराजनिदेशनिघ्नस्यास्य** प्रकाशनाधिकरणस्यैतत्प्रकाशनमनितरसाधारणमद्वितीयं कृत्यनिष्ठानिर्वहणं च। **अस्य कविः** —

"परस्परादेशतया प्रयुक्तहल्वर्णकत्वाद् धृतवेदरूपम्।
स्वकीयनामाद्यपदं वहन्तं बाले! कविं वेत्सि हि राजचूडम्॥"
(पृ० २. श्लो० ११)

इति प्रस्तावनान्तर्गतप्रहेलिकयोन्नीतः,

"अहो सायन्तनवासन्तिकावलेपविलोपिसारस्वतसौरभेण वञ्चिकुलसागरपूर्णचन्द्रायमानविद्वज्जनसार्वभौमश्रीबालरामवर्मकुलशेखराभिनन्दनीयनिजविनयगुणालङ्कृतेन **देवराजसूरिणा** कृतं **बालमार्ताण्डविजयं** नाम नाटकं प्रयोक्तव्यमिति आर्येण वचनं विनैव नियुक्तास्मि" (पृ० २) इति नटीमुखनिवेदितः,

"**श्रीरामवर्मकुलशेखरभूमिपाल-**
बाल्याश्रितः कलितवान् कविरेष धीरः।
श्रीपद्मनाभचरितोज्ज्वलमेव **देव-**
राजाभिधः सुमधुरं रसवत्प्रबन्धम्॥"

इति मातृकान्ते भरतवाक्यानन्तरं स्वयं विस्पष्टकथितश्च कश्चिद् **देवराज**नामेत्यवगम्यते।

पुरा खलु **शुचीन्द्रपुरमुत्तरेणानतिदवीयस्याश्रामग्रामे** पाण्ड्यदेशान्तर्गतश्रीशालिवाटीसमीपस्थ(पत्तमडै)ग्रामादानीय प्रतिष्ठापिते कस्मिंश्चिद् ब्राह्मणकुले समुत्पन्नोऽयं वेदवेदाङ्गादिसर्वविद्यास्वयंगृहीतः **श्रीमन्मार्ताण्डवर्ममहाराजभागिनेयस्य श्रीरामवर्मनृपतेर्बाल्याश्रितः** महाराजमन्दिरे सदस्यप्रधान आसीदिति वृद्धपरम्परातोऽनुश्रूयते। इहैव पञ्चमाङ्के —

"पितामहसमानोऽस्य पिता महिमगौरवात् ।
पितामहसनामा च शेषाद्रिरिति संज्ञया ॥"

(पृ० १११. श्लो० १२३)

इति कथनाद् अस्य पिता शेषाद्रिनामा वेदविदग्रणीः समस्तविद्यास्थानम् अपर इव लोकपितामहः पूजनीयमहिमा बभूवेति विज्ञायते । अधुनास्मद्वञ्चि-राज्यान्तर्गतविळवंकोडुतालूक्तहसील्दारः बी. ए. बिरुदधारी ब्रह्मश्री पद्मनाभार्य एतत्कुटुम्बपरम्परासन्तान इति श्रुत्वा लेखमुखात् ततोऽवगतोऽदसीयो वृत्तान्तोऽधस्तात् प्रदर्श्यते —

"I referred the matter to the elder members of my family. Devaraja, whose full name is Devaraja Sastrial is my grandfather's grandfather in the male line. He was one of the donees of the Asramam gramam near Suchindrum, which as you know, was gifted over to 12 Brahmins under a Royal gift deed in the year 940 M. E. He was therefore a contemporary of their Highness the famous Martandavarma and his successor Rama Varma. No further information is available about his life. His ancestral place was I learn, Pattamadai in the Tinnavelly District wherefrom he migrated to Travancore."

सर्वथा कविरयं देवराजः—

"कविः — (सहर्षम्)

सुचिरमिह भवन्तं नायकं प्रार्थयन्ती
मम पुनरियमेषा साहिती कन्यकेव ।
क्षितिपतिकुलमौले ! बालमार्ताण्ड ! पाणि-
ग्रहणमहमिदानीं प्राप्य धन्यैव तेऽस्तु ॥"

(पृ० ११६. श्लो० १५८)

इत्युक्त्वा महाराजाय प्रबन्धसमर्पणात्,

"राजा — (सपरितोषं किञ्चिद् विवृत्य सम्पुटीचतुष्टयम्)

एका भूषणभूषितेयमितरा माणिक्यहारोज्ज्वला
कौशेयाम्बरधारिणीयमपरा चामीकराढ्या परा ।
एषा पेटचतुष्टयी मणिमयी सम्मानिता ते मया
धीमन् ! मामकपद्मनाभचरिताख्यातुः प्रबन्धात्मना ॥"

(पृ० ११६. श्लो० १६०)

इत्युक्त्वा महाराजेन कवये सम्मानदानाच्च श्रीमार्ताण्डवर्ममहाराजसमकालिक इति सिद्धम् । महाराजस्य च जीवितविजयसमयः कोल्लम् ९०४—९३३ (1729—1758 A. D.) पर्यन्त इति सुप्रसिद्धः खलु ।

इह प्रतिपाद्यवस्तुमहिम्ना प्रतिपादकप्रबन्धमहिम्ना च समुट्टङ्कनीयं बहुतरं दृश्यते । तत्रेदं प्रतिपाद्यवस्तुसारं, यत्; भगवति श्रीपद्मनाभे दृढभक्तिः श्रीमार्ताण्डवर्ममहाराजः भक्तिप्रच्युतिकारिणो महामोहदायिनश्च राज्यभरणाच्चिरेणोद्विजमान आसीत् । अथ कदाचिद् भवत्यविरोधेन दुस्त्यजस्वधर्मभूतं राज्यभरणं वर्तयितुमभिलषंस्तदर्थं भगवन्तं पद्मनाभं सेवमानस्तदेकतानतया कदाचित् प्रत्यक्षदर्शनं लेभे । लब्ध्वा च तदिदमासेचनकं दिव्यमङ्गलस्वरूपं भक्तवत्सलाद् भगवतः श्रीपद्मनाभाद्

"हृद्गतं ते प्रजानामि मदीयं कुरु शासनम् ।
इदं राज्यं ध्रुवस्येव न ते मोहाय कल्पते ॥"

(पृ० १०. श्लो० ३३)

इत्युक्तदिशा राज्ये सत्यपि मोहानभिभवमनुग्रहमवाप । अन्यच्च बहुमहीपालविजयागतं धनौघमुपानीय स्यानन्दूरपुरस्थं चिरजीर्णं भगवदायतनमभिनवीकृत्य राजसूयविधिना महाभिषेकेण प्रसादिते भगवति श्रीपद्मनाभे स्वकीयराज्यभारं समर्पयितुं तद्दासतया स्वयं युवराजीभवितुं च निकाममनुगृहीतोऽभवत् । तत्तादृशमनुग्रहं दिग्विजयाद् धनराश्यानयनेन, देवालयनवीकरणेन, महाभिषेकेण, सर्वस्यापि राज्यस्य भगवति श्रीपद्मनाभे समर्पणेन च सफलयित्वा सोऽयं मार्ताण्डवर्ममहीपतिः श्रीपद्मनाभे महाराजे सति युवराजो भूत्वान्वर्थयैव बालमार्ताण्डसंज्ञया लब्धविजयश्चरितार्थोऽभूद्; इति । सत्स्वप्येवमनेकेषु प्रतिपाद्यभागेषु महाभिषेकपुरस्सरं श्रीपद्मनाभे स्वसमार्जितसकलराज्यसमर्पणमङ्गि प्रतिपत्तव्यम् । तत्रैव सर्वेषां विश्रान्तेः । एतावांश्च कृत्स्नोऽपि प्रतिपाद्यार्थः पञ्चभिरङ्कैरिह नाटके सङ्गृह्यते ।

तत्र प्रथमे — उपोद्घातदिशा राज्ञा स्वामात्येभ्यः श्रीपद्मनाभप्रत्यक्षदर्शनात् प्रभृति दिग्विजयसम्पादितैर्द्रव्यजातैर्देवालयनवीकरणेन सर्वस्यापि राज्यस्य श्रीपद्मनाभसमर्पणपर्यन्तस्य कार्यस्य प्रतिपादनं,

द्वितीये — दिग्विजयप्रस्थानाङ्गतया निर्वर्तितगोदानविधेर्महाराजस्य शुचीन्द्रपुरदेशाद् विजयप्रस्थानं, महाराजविरहकातराः प्रजा अनुव्रजननिर्व-

न्धाद् विमोचयितुं युवराजं प्रति रङ्गरञ्जकेन पाठकेन भगवन्निदेशजन्यतया-भिनवकालिदासविरचितस्य प्रबन्धस्य पाठनेन कालविनोदनचोदनं,

तृतीये — पाठ्यमाननिबन्धद्वारा महाराजविजयप्रस्थाने — यावदागमनं तत्तद्देशानां तत्रत्यसम्भवविशेषाणां च वर्णनं,

तुरीये — विजयप्रस्थानात् प्रतिनिवृत्तेन महाराजेन पञ्चाहेन भगवदालयनवीकरणानुशासनम्, अनन्तरं महाभिषेकनिर्वहणाभ्यनुज्ञानं, यावन्महाभिषेकानुष्ठानं श्रीपादमन्दिरे व्रतनियमाचरणं, यथानिर्देशं परिसमापितनवीकरणस्य श्रीपद्मनाभमन्दिरस्य शिल्पाचार्येण सह प्रत्यवेक्षणं,

पञ्चमे — यथासङ्कल्पं महाभिषेकविधिना महापूजया च श्रीपद्मनाभे प्रसन्ने सन्निधापितसकलचक्रवर्तिचिह्नस्य महाराजस्य स्वराज्यसमर्पणं, श्रीपद्मनाभेन भक्तवत्सलेनाभ्युपेत्य निजपादारविन्दसमुत्तंसनाभ्यनुज्ञया महाराजायानुग्रहदानं, ततः प्रभृति समस्तस्य राजकीयशासनस्य श्रीपद्मनाभमुद्रया सनाथीकरणम्, अन्ते महाकवीनां महापण्डितानां च विविधबहुमाननं च संक्षिप्यते ।

अथैतावत् प्रतिपाद्यजातं संगृह्णतः कवेश्चरितसरणौ सञ्चरन्ती दृष्टिः कीदृशीति विचाराय सम्प्राप्तोऽयं सन्दर्भः । वस्तुतः शून्यमपि शुष्कशुष्कं कार्यसारं भावनामहिम्ना वस्तूकृत्य सरससरसं समास्वादयितुं समर्पयन्ते महान्तः कवयः । सत्येवं हंसक्षीरन्यायेन सारसमुद्धरणं सूरिसमायत्तम् । तथेहाप्यर्थवादगत्या न न नैके समाचाराः सङ्घटिताः । अथापि वितुषीकृत्य विचार्यमाणेऽधोदृश्यमाना मन्ये विमर्शकदृशां स्पृश्याः । तत्रादितो विजयप्रस्थानाय गमनागमनमार्गाः प्रदर्श्यन्ते —

"शुचीन्द्रक्षेत्रमागत्य तत्रालंकृतगोसहस्रं विप्रसात्कृत्य पालितगीर्वाणनाथं स्थाणुनाथं प्रह्वीभवन् प्रार्थ्य कर्तव्यं राज्यतन्त्रं सामात्ये युवराजे निधाय दन्तावलतल्लजमधिरुह्य विजिगीषया सबलः स्वविषयान्तं व्यगाहत ।"

....

"स वञ्चिकुलशेखरः स्वभटबाहुदण्डाहत-
प्रयाणपटहच्छटाध्वनितपूर्णदिङ्मण्डलः ।

यथौ झटिति पाण्ड्यभूरमणपट्टणं वाहिनी-
रजःपटलचूषिताखिलपयोधिपाथोभरः ॥"

(पृ० २९. श्लो० ८)

इतो महाराजः शुचीन्द्रपुरात् प्रस्थाय प्रागुत्तरेण समुद्रतीरेण पाण्ड्यदेशमगमदिति ज्ञायते । अथ,

"उत्सङ्गे कावेर्याः शयितं दयितं महाविभूतेस्तम् ।
साक्षादकरोद् राजा रङ्गधुरीणं परात्परं पुरुषम् ॥"

(पृ० ३०. श्लो० ९)

"यूयं यात बलाधिपाः ! सह बलैः सर्वानुदीच्यान् नृपाञ्
जित्वायात ततो धनान्युरुविधान्यादाय मासैस्त्रिभिः ।
तावद् रङ्गपतेरमुष्य चरणावासेवमानः सदा
वत्स्याम्येव कवेरजाम्भसि कृतस्नानः सहैभिर्द्विजैः ॥"

(पृ० ३१. श्लो० १२)

आभ्यां श्रीरङ्गदेशं गत्वा तत्रैव कृतवसतिः सेनान्यः प्रेषितवानित्यवगम्यते ।

इह प्राच्यां प्रतीच्यामुदीच्यां च दिक्षु तत्तद्भूपालान् अखिलानपि बालमार्ताण्डो विजिग्य इति,

"आच्छिन्दन्तो ध्वजास्त्रद्रविणमुरुविधं म्लेच्छसांयात्रिकाणां
सेत्वाऽस्यक्षोणिपालप्रभृतिरिपुनृपान् दूरमुत्सारयन्तः ।
आक्रोलं केरलानां हृदि हृदि निखनन्तो जयस्तम्भमुच्चै-
र्वञ्चीन्द्रस्य प्रतापा इव धृततनवो हन्त दीव्यन्ति योधाः ॥"

(पृ० ३२. श्लो० १६)

"मौण्ड्यं पाण्ड्य ! भजस्व चोल ! कलयेश्चूडामणेरर्पणं
तुण्डीर ! त्यज डिण्डिमं जहिहि रे कर्णाट ! दुर्नाटिकाम् ।
अन्ध्रेश ! च्युतिरन्ध्रमिच्छ यवन ! त्राणं वनं तेऽधुने-
त्याधावन्ति रणाग्रमुद्भटगिरो वञ्चिक्षितीन्द्रोर्भटाः ॥

रे रे कोङ्कण ! पङ्कणं व्रज महाराष्ट्र ! स्वराष्ट्रं त्यजे-
ष्टीकेथाः क नु पारसीक ! चर रे वैदर्भ ! दर्भाङ्कुरान् ।

गामालिङ्ग कलिङ्ग! वङ्ग! विपिने त्वङ्गाङ्ग! नागं त्यजे-
रित्याराादिव वञ्चिसैन्यशिबिरे जोघुष्यते दुन्दुभिः ॥"
(पृ० ३३. श्लो० १७,१८)

एभिः पद्यैरवधार्यते । तत्र सेत्वास्यक्षोणिपालस्य (काक्कूर्देशनाथस्य) विजयस्तु चरित्रसम्मत एव । कोलावधि केरलविजयः अन्यच्चान्यच्च विदेशगमनेन स्वदेशाधिपत्यं स्थापितवतोऽस्य यद्यपि नासम्भवि, अथापि स स कियांश्चनावस्तुभूतोऽर्थवादः प्रतिभाति । आगमने च श्रीरङ्गाद् रामेश्वर-स्थानं, ततः तिरुचेन्दूर्देशः, ततो नवतिरुप्पतिव्यपदेश्यस्थलनवकाख्यो देश. *श्रीशालिवाटीपुरीत्येतानि पुण्यस्थलानि तत्तदधिष्ठानदिव्यदेवता-वन्दनादिपुरस्सरं समतिलङ्घितानीत्यधस्तनैः पद्यैरवगम्यते —

"जयध्वजं कीर्तिपताकमुच्चैराच्छिद्य दुर्दान्तमहीपतीनाम् ।
स वञ्चिवंशोदधिपूर्णचन्द्रो विप्रैः सहागाद् रघुनाथसेतुम् ॥"
(पृ० ३४. श्लो० २०)

"ततस्तस्मिन् वञ्चिक्षितितलवलारिः कृतयथा-
विधिस्नानो लङ्कापतिरिपुकराराधितपदम् ।
प्रणम्येशं भक्त्या हिमकरकलोल्लासिमकुटं
मनोज्ञं कौश्चारेर्झटिति पुरमागात् प्रमुदितः ॥"
(० ३५. श्लो० २१)

"हृष्टात्मा वञ्चिपृथ्वीपतिरथ रुचिरं कल्पयित्वा बहुभ्यो
मृष्टान्नं देवसेनापरिवृढनिकटे क्षोणिवृन्दारकेभ्यः ।
साष्टाङ्गं तत्पदाम्भोरुहयुगलनमस्कारमप्याकलय्य
द्रष्टा तस्मात् प्रतस्थे स्थलनवकपतीन् पद्मनाभांशभूतान् ॥"
(पृ० ३७. श्लो० २७)

"श्रीशालिवाटीशपुरीं समेत्य तत्रत्यभूमीसुरनिर्मलत्वम् ।
ताम्रापगां चापि समीक्ष्य राजा तां रम्यतामेव शशंस भूयः ॥"
(पृ० ४०. श्लो० ४१)

---

* तथाच नवतिरुप्पतिसङ्ग्रहः पद्यैनैकेन तदधिष्ठानदेवताप्रणामनिवेदकेन कृतः । यथा —

"वैकुण्ठनाथविजयासनभूमिपालदेवेशपङ्कजविलोचनचोरनाथ्यान् ।
निक्षेपवित्तमकरायितकर्णपाशनाथान् प्रणम्य मुमुदे स महीमहेन्द्रः ॥"
(पृ० ३७. श्लो० २८)

अन्ये कतिपये चरितसमाचारा नाटकीयादस्माद् वस्तुप्रपञ्चनात् समुप-लभ्यमाना अत्रावश्यं प्रदर्शनमर्हन्ति —

"नवरात्रपूजामहोत्सवे आङ्गिकसात्त्विकव्यञ्जकलास्यचमत्कारपरितोषितेन ...." (पृ० २)	इदं महाराजमन्दिरे महोत्सवसन्दर्भेषु प्राक्तनं लासिकाजनलास्यसम्प्रदायं गमयति ।
"माघस्नानविधये शङ्खतीर्थं गतः" (पृ० ६)	इतो महाराजो मासैकपरिसमाप्यं व्रतं माघस्नानात्मकमन्वतिष्ठदिति बोध्यते ।
"सहस्रमलङ्कारवतीनां कामधेनूनां सद्ब्राह्मणेभ्यः प्रतिपादितवान् ।" (पृ० १४)	इदमलङ्कारदानतया सम्प्रति प्रसिध्यति ।
"चिरकालराजन्यकुलद्रोहिणः सर्वेऽपि प्रज्वलन्तमग्निं शलभौघा इवैनमासाद्य स्वयमेव कथं प्रनष्टाः ।" (पृ० १६)	इदं माटम्पिवर्गमुद्दिश्य कृतम् ।
"किञ्च रावणकुम्भकर्णाविवात्यन्तपरमदुर्जयौ बालकनिष्ठाभिधानौ प्रत्यर्थिमूर्धन्यौ दुरालोचनाफलसंसिद्धिं निश्चित्य विविक्तमेव निजोपकण्ठं कालचोदनया सम्मिलिताविवागतौ समये विदितवृत्तान्तेन निमेषमात्रेण खड्गधाराकबलीकृतकण्ठनालावाकलय्य प्रत्येकं द्वैरूप्यतामापादितौ ॥" (पृ० १६)	एतद् नागर्कोविल्देशे इळयतम्पि इति प्रसिद्धयोः पप्पुतम्पिरामनूतम्पिनाम्नोर्महाराजद्रोहिमुख्ययोर्व्यापादनमधिकृत्य ।
"कोलम्बपुरदुर्गमपि शत्रुकुलमुत्सार्य निजसैन्यतुरङ्गतरङ्गसङ्घसङ्कुलीकृततया चन्द्रोदयारम्भसमुच्चलदर्णवाडम्बरसन्दर्शनीयतामानीतम् ॥" (पृ० १६)	सम्प्रति कोल्लाख्यया प्रसिद्धस्य कोलम्बदेशस्याधिपतिं विजित्य तद्देशाधीनीकरणमिदम् ।

"निजराज्यमर्मभूतं प्रभूतधनागमस्थानमतर्कितमेवाक्रम्य रक्तबीजासुरकुलमिव तत्रैव परिवर्धमानं कुहनैकनिलयं सकलमपि सस्वामिकं सांयात्रिकयूथमपि विविधं च समग्रायुधजालमाच्छिद्यैव विद्रावितं विनिहतं, सद्यः शरणागतं सम्यक् परिपालितं च ।" (पृ० १६)

इदं कुलच्चल्संज्ञिते देशे डच्चुदेशीयैः सैन्यैः सह युद्धं, ततो डिलनाय्मुख्यस्य तत्सैन्यस्य ग्रहणरक्षणाभ्यां महाराजविजयं च लक्षीकरोति ।

"प्रबन्धसाहितीतुष्यद्-
बालमार्ताण्डवर्मणा ।
नवीनकालिदासाय
ग्रामो दत्तो महोदयः ॥" (पृ० २३)

इदं महाराजकृतं सुप्रसिद्धमहोदयग्रामदानम् अवगमयति ।

"हृद्योर्ध्वपुण्ड्रोज्ज्वलः ।" (पृ० ५०)

इदं तादात्विकमहाराजानां वैष्णवमतानुवर्तनं गमयति ।

"भगवन्मन्दिरप्रवेशं नाटयन् तन्मन्दिरं त्रिः परिक्रम्य भगवत्सन्निधिमुपेत्य साञ्जलिपुटं पश्यन् ।" (पृ० ५१)

अनेन महाराजाः पुरा बहिः प्रदक्षिणं कृत्वा तदनन्तरमेवान्तर्दर्शनाय प्रविशन्तीति गम्यते ।

"इति निष्क्रम्य कर्मन्दिना सप्तभिर्ब्राह्मणैश्च सह प्रविशन् ।" (पृ० ५१)

एतदष्टानां योगद्विजानामर्धयोगात्मकस्य महाराजस्योपदेशकानां क्षेत्रप्रमाणिनां ग्रहणम् ।

"राजा— बाभ्रव्य ! कार्यकारानानय" (पृ० ५२)

अत्रत्यकार्यकारशब्दः साम्प्रतिककार्यक्कार्शब्दस्य संस्कृतीकरणम् ।

"श्रीपादतीर्थतीर्थीकृतं निवेशनम्" (पृ० ५३)

अस्मात् श्रीपद्मनाभपादतीर्थनिक्षेपोपक्रान्तस्य तीर्थाशयस्य दिव्यसरसो महिम्ना श्रीपादभागमुत्तरेण कृतसन्निवेशस्य महाराजमन्दिरस्य श्रीपादसंज्ञान्वर्थत्वं गम्यते ।

"महिम्ना नाम्ना च महीधरेन्द्रनन्दिनीमनुस्मारयन्ती". (पृ० ५४)	इयं राज्ञी श्रीपार्वतीसंज्ञा महाराजस्वसा श्रीरामवर्मयुवराजजननी च।
"एकशिलामण्डपमध्युषितनवरत्नखचितभद्रासनोपरि निवेश्यतामेष भगवाननन्तकल्याणगुणाभिरामः श्रीपद्मनाभः।" (पृ० ७४)	"इदं सम्प्रति ഒററക്കൽ संज्ञितं मण्डपं वक्ति।
"समुदायकार्यकारी कनकदण्डधारी" (पृ० ७४)	अनेन महाराजसमक्षं क्षेत्रकार्यनिवेदनाधिकारी आनवाऌ व्यपदिश्यते।
"दासैर्ममाज्ञावशैः" (पृ० ७६)	भगवत्कैङ्कर्यकारिणां पारदेशिकद्विजानामद्यापि सोऽयं व्यवहारो दास इति।
"श्रीकृष्णमवलोक्याभिवन्द्य च भगवदालयान्तःप्रवेशं नाटयति" (पृ० ७८)	अनेन तदा महाराजमन्दिरं श्रीपादान्तर्गतमिति ततः क्षेत्रप्रवेशे प्रथमतः श्रीकृष्णदर्शनं प्राप्तावसरमिति च ज्ञायते।
"अन्तर्यामी त्वमिह जगतां वेत्सि सर्वं च विष्णो! वेद्यं किं वा तव धुरि मया विद्यते वासुदेव!। वात्सल्यान्मां कलय करुणाभाजनं भक्तबन्धो! साम्राज्येऽस्मिन् मम वह धुरं सर्वदा पद्मनाभ!॥" (पृ० ८१)	श्रीपद्मनाभं प्रति महाराजस्य स्वकीयराज्यभाराङ्गीकारप्रार्थनेयम्।
"आह्रियन्तां महाभिषेकपूजोपकरणानि शान्तिकारिभिः।" (पृ० ८२)	इदमधुनातनशान्तिकारव्यवहारस्य संस्कृतीकरणम्।

"सकलजगत्सम्राजं
श्रीमन्तं हन्त पद्मनाभं त्वाम् ।
**अभिषिञ्चाम्यद्धिरहं
वञ्चिमहीपालसकलसा-
[म्राज्ये ॥"** (पृ० ८३)

श्रीपद्मनाभं महाराजस्थानेऽभिषेक्तुमभिलषतो महाराजस्य सङ्कल्पोऽयम् ।

"भोः सामुदायिक ! स्मृतिमात्रसन्निहितानि सवत्सानि कामधेनूनां सहस्राणि 'भगवतः प्रतिदिनं पयस्यार्थमासां दुग्धं दत्त्वा तत्प्रमाणेन तण्डुलाश्च प्रतिग्राह्याः' इति भगवद्दासवर्गेभ्यः प्रतिपादय" (पृ० ८५)

अनेन तदा क्षीरपायसार्थं गवामपेक्षिततण्डुलादीनां च संरक्षणभारः दासवर्गेष्वेव निहित आसीदिति ज्ञायते ।

"भो वत्स ! **बालमार्ताण्ड !**
त्वया दत्तां महीधुराम् ।
अग्रहीषं प्रहर्षेण
युवराजोऽसि साम्प्रतम् ॥
यौवराज्याभिषिक्तस्य
तव मुद्रेव शाश्वती ।
भद्रा कृपाणवल्लीयं
सखेटा गृह्यतां त्वया ॥"
(पृ० ८६)

अनेन भगवता महाराजस्थानाभ्युपगमः, भगवतः प्रति युवराजतया **श्रीमार्ताण्डवर्मनृपतेः** सखेटकृपाणचिह्नदानं च प्रतीयते ।

"इत्यान्दोलिकाशायिनं यशोदास्तनन्धयं मुकुन्दमानम्य बहिर्निष्क्रम्य" (पृ० ८८)

इदम् **एकशिलामण्टपाद्** दक्षिणतः निक्षिप्तायामान्दोलिकायां श्रीबालकृष्णस्याधुनापि शायितस्य दर्शनाभिप्रायेण ।

"महाकङ्कणधारी **महासूपाधि**कारी" (पृ० ९६)

अधुना व्यवह्रियमाणस्य വലിയ ഒരിക്ഷുകാറസ്യ संज्ञेयं संस्कृतेन ।

"तदितःप्रभृति मयि मद्भागिनेये वत्से **श्रीरामवर्मणि** मद्वंशमौक्तिकीभविष्यत्सु तेषु तेषु च यथासमयं सर्वैरपि युवराजशब्दः प्रयुज्यताम् । महाराजशब्दस्तु भगवत्यनन्तशायिनि पद्मनाभे ।

आज्ञामुद्राप्यनुज्ञा च
निग्रहानुग्रहावपि ।
एतदन्यच्च यत्किञ्चित्
तस्य कर्ता श्रियः पतिः ॥

तदशेषेष्वपि कृत्येषु प्रयोगार्हतया भगवदभिधानं पद्मनाभपदं प्रमाणीक्रियताम् । मदीयाभिधानं तु व्यवहारमात्रे, यदहं न कस्यापि कर्तास्मि । **आचार्याः** — तत्त्वज्ञानानुरूपोऽयं देवस्य कल्पनानिष्कर्षः । लोकश्चायमनेन महता श्रेयसा संयोज्यते, यदस्य श्रीपद्मनाभपदोच्चारणं विना न कापि कार्यप्रवृत्तिः ॥" (पृ० १०८)

आभिः पङ्क्तिभिः श्रीवञ्चिनृपतीनां तदाप्रभृति युवराजव्यवहार एव कार्यसिद्धः । महाराजव्यवहारस्तु केवलं शाब्दिकः । तदिदमेव **वञ्चिपाल** इति बिरुदावलीसमाघोषणकाले **वञ्चिबाल**संज्ञया प्राक्तनपञ्चाङ्गेषु रूढमूलमासीदित्यपि केचिद् वदन्ति । अन्यच्च अत्रत्यराज्यभारकर्तृणां सर्वमप्यनुशासनं श्रीपद्मनाभमुद्रयैव सनाथीकर्तव्यमित्यपि सम्प्रदाय इह स्वरूपितः ।

"मनसा वहसे यत् त्वं
मदङ्घ्रिकमलद्वयम् ।
भक्तचिह्नतया वत्स !
तदेव शिरसा वह ॥"

(पृ० १०९)

इदम् अधुनापि राज्यभारकर्तुर्महाराजस्य शिरसि दृश्यमानं श्रीपद्मनाभदासत्वप्रत्यभिज्ञापकं श्रीपद्मनाभपदसमुत्तंसितत्वरूपं चिह्नं गमयति ।

अथ प्रबन्धमहिमानं पश्याम —

"............... **बालमार्ताण्डविजयं** नाम नाटकं प्रयोक्तव्यमिति आर्येण वचनं विनैव नियुक्तास्मि" (पृ० ३) इति नटीवचनात् प्रबन्धस्यास्य दृश्यकाव्येषु स्थानं नाटकात्मनेति स्पष्टम् । विशिष्य प्रतिपाद्यसारसमुन्नीतमस्य नाटकस्य नाम **'बालमार्ताण्डविजयम्'** इति च ।

"वीरश्रृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते ।
प्रख्यातनायकोपेतं नाटकं तदुदीरितम् ॥"

इति लक्षणानुगुणतया वीराग्रण्यो नायकस्य **मार्ताण्डवर्म**महाराजस्य प्रख्यातस्य परिग्रहात् दिग्विजयानुकूलस्य भक्तिफलपर्यवसायिनश्च वीररसस्य नायकीयमहिमातिशयविश्रान्तस्य वर्णनाच्च रूपकमिदं सलक्षणं नाटकं सम्पद्यते । अत्र,

"सूचयेद् वस्तु बीजं वा मुखं पात्रमथापि वा ।"

(प्रका० ३. श्लोक० ३)

इति दशरूपकोक्तदिशा

"योऽयं वञ्चिकुलार्णवादुदभवत् सञ्चारिकल्पद्रुमो
यस्मै भक्तिगुणेन यन्त्रित इव श्रीवल्लभस्तिष्ठते ।
कर्पूरैरिव यस्य कीर्तिनिकरैर्दिक्चक्रमावास्यते
तस्य क्षोणिपुरन्दरस्य महिमा पारे गिरां वर्तते ॥"

(पृ० ४. श्लो० १६)

इति वस्तुनः,

"राजहंसश्रियं तावद् गायन्त्या वल्लभे ! त्वया
अनेन वैणिकेनेव सेयं चित्रार्पिता सभा ॥"

(पृ० ४. श्लो० १४)

इति पात्रस्य च सूचनं दृश्यते । एवमादिविषये नाटकीयं समग्रमपि लक्षणसम्भाण्डनमिह सुदर्शमिति न वितायते ।

अथ **बालमार्ताण्डविजय**मिति संज्ञाकरणौचितीं चिन्तयाम । वीर**मार्ताण्डवर्मणो**ऽस्य विजितसमस्तशत्रुसङ्घातस्य सामन्तीकृतनैकभूपालस्य विजयमभिसन्धाय प्रवृत्तमिदं नाटकं यद्यपि समुचितया **वीरमार्ताण्डविजय**मिति संज्ञया व्यवह्रियेत, अथापि श्रीपद्मनाभं महाराजस्थानेऽभिषिच्य तदपेक्षया बालतया स्वयं युवराजभूयमुपपन्नमूरीकृतवतोऽस्य **मार्ताण्डवर्मणो** विनयाभिव्यञ्जकं बालरूपमुपपदमुपगीयमानं तदात्वप्रसिद्धं भक्तिविजयापदानाबिरुदमुपगमयतामिति समर्थयतेव कविना मन्ये साम्प्रतमेव कृतं नामधेयं **बालमार्ताण्डविजय**मिति । सत्यप्येवमाभ्यन्तरे तत्त्वे नाटके चास्मिन्ननेकत्रोपर्युपरिक्रममाणवीर्यविजयैश्वर्यस्यास्य नायकस्य **बालमार्ताण्ड**संज्ञा

"सोऽयं वञ्चिकुलोद्भवो विजयते श्रीबालमार्ताण्डराट् ।"

(पृ० ४. श्लो० १५)

"अयं प्रख्यायते तेन बालमार्ताण्डसंज्ञया ।"

(पृ० १७. श्लो० ७)

"देवोऽयं बालमार्ताण्डः कुञ्जरस्कन्धमाश्रितः ।
उदयाचलशृङ्गस्थो बालमार्ताण्ड एव सः ॥"

(पृ० २०. श्लो० १७)

इत्यादिभिः कविरनेकधा साधूकर्तुमुत्सहते । तत आरभ्य चानन्तरेऽपि तद्वंश्या बालबिरुदधारणं विनयभूषणायाङ्गीचक्रिरे इत्येतदप्यस्मदभ्यूहं प्रबलयति ।

अनन्तरेण **बालरामवर्मणा** स्थापितं **बालरामपुरं** नामाधुनापि चरित्रारूढम् **अनन्तशयनात्** प्राच्यां चतुःक्रोश्या दूरतः प्रसिध्यति । प्राक्तनेषु पञ्चाङ्गेषु* **वञ्चिबाले**त्यादिना बालपदमेव प्रविष्टं, यतः प्रत्यधुनातनेषु **वञ्चिपाले**ति पालपदं प्रवेशितम् । बालपदस्यैवमागममविमृश्य रक्षणार्थतया सार्थकं पालपदं प्रवेश्य परिशोधनाद् वरं यथास्थितबालपदसंयोजनमेवेति सद्यः प्रतिभातमनपलप्यमानमस्त्वनपराधाय ।

प्रबन्धशैली —

प्रायः कालिदासीयामेव पद्धतिमनुकरोत्ययं प्रबन्ध इति ततस्ततो विमर्शकानां शक्यमवसातुम् ।

तथाच दृश्यते क्वचिच्छायानुकरणं, कुहचिदंशापहरणमेव च । तत्र छायानुकरणं यथा —

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥"

(अभिज्ञानशाकुन्तलम्)

"राजहंसश्रियं तावद् गायन्त्या वल्लभे! त्वया ।
अनेन वैणिकेनेव सेयं चित्रार्पिता सभा ॥"

(बालमार्ताण्डविजयं पृ० ४. श्लो० १४)

---

* 'श्रीपद्मनाभवञ्चिबालरामवर्मकुलशेखरकिरीटपति ... ...'

अंशापहरणं यथा —

"शरत् पङ्कजलक्षणा"

(रघुवंशम्)

"शरत् पङ्कजलक्षितश्रीः"

(पृ० १४. श्लो० ३)

मुद्राराक्षसीयापि शैली कवयेऽस्मै समभिरुचितेव, यदि तादृक् सन्दर्भो वर्णनीयः। तथाह्युभयोः समुपलभ्यते —

"तीक्ष्णादुद्विजते मृदौ परिभवत्रासान्न संतिष्ठते
मूर्खं द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि।
शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो
श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम्॥"

(मुद्राराक्षसे, अङ्कः ३. श्लो० ५)

इति,

"भीत्या ये प्रणमन्ति भूमिपतयस्ते पालनीया मया
मानाद् ये न नमन्ति ते तु करुणामुत्सृज्य वध्याः कथम्।
इत्यामर्शमृदूकृतान्तरतया मन्दोद्यमानां रतिं
नास्माकं तनुते दिगन्तविजयश्रीः सापि सर्वोत्तरा॥"

(पृ० १८. श्लो० ९)

इति च श्लोकः सच्छायः।

सरसकवेरस्य साहितीस्वयंग्रहोदाहरणानि बहूनि जाग्रति। तत्रैकं स्थालीपुलाकन्यायेन यथा —

"स्फाटिकीयमधिरोहणी स्वतो
निर्मला कलुषितेन्द्रनीलतः।
तावकीनपदपांसुसङ्गते-
र्गौतमीव समयं प्रतीक्षते॥"

(पृ० ६२. श्लो० २८)

अस्य बालमार्ताण्डविजयस्य प्रसाधनोपयोगिनि परिशोधने प्रसितानामस्माकमेकैव मातृका मार्गी सार्धवर्षशतज्यायसी समुपलब्धा। तत्रापि चोपक्रमे

मध्ये च द्वाभ्यां पत्राभ्यां विकला सा। सत्यप्येवमनन्यशरणैरद्य यावदनुपहत-विफलप्रयत्नै राजवंशचरितवर्णनपरं विशिष्य सर्वदा सर्वानुस्मरणीयश्रीबाल-मार्ताण्डविजयसङ्कीर्तनपरं च तदिदमविलम्बं प्रकाश्य कृतार्थीभवितुमुत्सह-मानैर्यावदुपलब्धमधुना महाजनसमक्षं प्रकाश्यावतार्यते।

इयमपि च मातृका ग्रन्थलिपिः **शुचीन्द्रपुरं वट्टप्पळ्ळिस्थानिकस्य** ग्रन्थशालातः सम्पादिता तत्स्वामिनोऽस्य श्रीमतः **पुरुषोत्तमरु वासुदेव**महा-शयस्य प्राचीनग्रन्थसंरक्षणश्रद्धां गमयति। एतादृशस्य ग्रन्थरत्नस्य सम्भरणे प्रकाशनायास्मभ्यं समुपसमर्पणे च बद्धादरोऽयं ग्रन्थस्वामी एतदुपक्रमं सर्व-बहुमान्यराजकीयाधिकारादेतदधिकरणप्रकाश्यमानग्रन्थानां सम्भावनीयः सम-गणि इत्यपि समुचितेयं कापि कृतज्ञताप्रकटना प्राप्तावसरा भवतु भूयसां प्रो-त्साहनाय॥

अनन्तशयनम्,
१०-१२-१०६.

के. साम्बशिवशास्त्री.

कथोपयुक्तानि पात्राणि ।

राजा	=	श्रीमार्ताण्डवर्ममहाराजः ।
युवराजः (कुमारः)	=	श्रीरामवर्मयुवराजः ।
अमात्याः	=	रामय्यन्दळवाप्रभृतयः ।
सेनापतयः	=	डिलनाय्प्रभृतयः ।
रत्नाङ्गदः	=	युवराजमित्रम् ।
अभिनवकालिदासः	=	नाटककर्ता (देवराजः) ।
रङ्गरञ्जकः	=	प्रबन्धपाठकः ।
कार्यकाराः	=	देश्यभाषायां कार्यकार् संज्ञिताः ।
सामुदायिकः	=	तथा आनवाल्व्यपदेश्यः ।
सूपाधिकारी	=	तथा भरिप्पुकार् इति संज्ञितः ।
गणकाध्यक्षः	=	तथा मेलेळुत्तुव्यपदेश्यः ।
तान्त्रिकः	=	महाभिषेककर्ता ।
आचार्याः	=	तान्त्रिकनेता ।
ब्राह्मणाः	=	सप्त योगपुरुषाः ।
बाभ्रव्यः	=	विदूषकस्थानीयः ।
हेमकङ्कणः मणिकङ्कणः रणत्कङ्कणः ललाटिकः	=	कञ्चुकिनः ।
मेधावी	=	अन्तःपुरकञ्चुकी ।
वक्रनासः	=	तान्त्रिकशिष्यः ।
मरालिका सारिका	=	चेट्यौ ।

॥ श्री ॥

बालमार्ताण्डविजयं

श्रीदेवराजकविप्रणीतम् ।

प्रथमोऽङ्कः ।

*(संसेवित)श्रीरमणस्य बाल-
मार्ताण्डभूपस्य गुणा मनोज्ञाः ।
अहं च नाट्यार्णवपारदर्शी
कवेस्तु वाणी सरसा च मृद्वी ॥ ९ ॥

(सविमर्शम्) कथमद्यापि सा विलम्बते ललितकण्ठी ।

(प्रविश्य)

नटी — (उपसृत्य) (क) अय्य! इअं ह्मि । को णिओओ अणुचिट्ठीअदु ।

सूत्रधारः — अयि मञ्जुभाषिणि! पुरा भवने,

झलज्झलितबन्धुरक्वणितनूपुराडम्बरं
सुगीतिरसमञ्जुलं ललितलास्यभेदक्रमान् ।
प्रकाश्य सकलाञ् जनान् सपदि तोषयिष्याम्यहं
यदीरितमिति त्वया निपुणमेव तत् साधितम् ॥ १० ॥

(क) आर्य! इयमस्मि । को नियोगः अनुष्ठीयताम् ।

---

* मातृकायां पत्रमेकं लुप्तम् ।

G. P. T. 1187. 500. 20-3-1105. B

नटी — (सभयम्) (क) णेवच्छविहाणं करन्तीए मए विळम्बिअं। एसा सज्जह्मि। किं उण रुव्वअं पओअणिज्जं।

सूत्रधारः — भद्रे! प्रथमं कविराजः प्रश्नविषयः। तस्य गुरुत्वान्मया तन्नामग्रहणमनर्हम्। अतः प्रहेलिकया वच्मि।

परस्परादेशतया प्रयुक्त-
हल्वर्णकत्वाद् धृतवेदरूपम्।
स्वकीयनामाद्यपदं वहन्तं
भद्रे! कविं वेत्सि हि राजचूडम्॥ ११॥

नटी — (श्रुत्वा विचिन्त्य) (ख) हन्त विण्णादो कइराओ। तस्स कइराअस्स पबन्धविसेसो जदि जाणिदव्वो।

सूत्रधारः — श्रूयतां भद्रे! श्रूयताम्। भगवत्या वाग्देवताया नवरात्रपूजामहोत्सवे आङ्गिक(सात्त्विक)कव्यञ्जक-(लास्य)चमत्कारपरितोषितेन महाराजबालमार्ताण्डकुलशेखरवर्मणा भवत्यै पारितोषिकतया नामाक्षररेखाकारघटितमहार्घमणिगणरमणीयं यत् स्वीयमङ्गुलीयं प्रतिपादितं तदवलोक्याभिनेतव्यरूपकनामाक्षराणि प्रत्यभिजानातु भवती।

नटी — (स्वाङ्गुलिघटितमङ्गुलीयं विलोक्य सहर्षप्रत्यभिज्ञम्) (ग) अहो साअंतणवासन्तिआवळेवविळोविसारस्सअसोरहेण वञ्चिउळसाअरपुण्णचंदाअमाणविज्जुज्जणसव्वहोमसिरीबाळरामव-

(क) नेपथ्यविधानं कुर्वत्या मया विलम्बितम्। एषा सज्जास्मि। किं पुना रूपकं प्रयोजनीयम्।

(ख) हन्त विज्ञातः कविराजः। तस्य कविराजस्य प्रबन्धविशेषः यदि ज्ञातव्यः।

(ग) अहो सायन्तनवासन्तिकावलेपविलोपिसारस्वतसौरभेण वञ्चि-

म्मकुळसेहराहिणंदणिज्जणिअविणअउणाळंकिदेण देवराअसूरिणा किदं बाळमत्तण्डविअअं णाम णाडअं पवुत्तव्वं ति अय्येण वअणं विणव्व णिउत्तह्मि ।

सूत्रधारः — दुर्ग्रहान् प्रबन्धव्यङ्ग्यान् रसभावान् अभिज्ञाय यथायथं प्रयोगेण व्यञ्जयन्त्या भवत्याः कियदिदं वचनं विना कर्तव्यपरिज्ञानम् ।

नटी — (क) अय्य! चिरं अह्माणं णट्टविज्जापरिस्समो फळिओ, जं पुण्णसुळोअस्स महाराअबाळमत्तण्डस्स चरिअं अहिणिज्जइ ।

सूत्रधारः — सत्यमाह भवती ।

लोकोत्तरगुणावासः पुमान् न यदि नायकः ।
कवितानाट्यकलयोः कथं स्याच्चरितार्थता ॥ १२ ॥

इतिहि प्रामाणिकवादः ।

नटी — (ख) एदाणं वत्थुपबन्धाणं अणुरूवं अह्माणं पओअकोसळं होइ णव त्ति वाउळं मे हिअं ।

सूत्रधारः — अलं व्याकुलतया । अस्माकं नाट्यविद्यासम्प्रदायो लोकोत्तरतया प्रेक्षावद्भिरसकृदालोक्यानुमोदित इति किन्नु विस्मृतं भवत्या । अथवा ईदृशनामाङ्कितं

कुलसागरपूर्णचन्द्रायमानविद्वज्जनसार्वभौमश्रीबालरामवर्मकुलशेखराभिनन्दनीयनिजविनयगुणालङ्कृतेन देवराजसूरिणा कृतं बालमार्ताण्डविजयं नाम नाटकं प्रयोक्तव्यमिति आर्येण वचनं विनैव नियुक्तास्मि ।

(क) आर्य! चिरमस्माकं नाट्यविद्यापरिश्रमः फलितः, यत् पुण्यश्लोकस्य महाराजबालमार्ताण्डस्य चरितमभिनीयते ।

(ख) एतयोर्वस्तुप्रबन्धयोरनुरूपमस्माकं प्रयोगकौशलं भवति नवेति व्याकुलं मे हृदयम् ।

पारितोषिकं दत्तवता महता राजराजेनैतदनुरूपं भवत्याः प्रयोगकौशलमेवेत्ययमर्थो न किं प्रकाशितः । तदुपक्रम्यतामिमां शरदमधिकृत्य निर्विशङ्कमेव सङ्गीतकम् ।

नटी — (सोत्साहम्) (क) तह (इति गायति) ।

दूरीकिअबअजूहो महुअरउळगीअवेहवो दाणिं ।
राएइ राअहंसो परिमळमअरंदमेउरे पदुमे ॥ १३ ॥

सूत्रधारः — (सहर्षश्लाघम्)

राजहंसश्रियं तावद् गायन्त्या वल्लभे! त्वया ।
अनेन वैणिकेनेव सेयं चित्रार्पिता सभा ॥ १४ ॥

(इति निष्क्रान्तौ) ।

प्रस्तावना ।

(ततः प्रविशति वैणिकः सशिष्यः ।)

वैणिकः — (शिष्यहस्ताद् वीणामादाय तन्त्रीः परामृशन्)

विद्वन्मण्डलपुण्डरीकपटलामोदप्रदानोत्सुक-
स्तेजोधूनितवैरिजालतिमिरो नित्योदयोऽत्यद्भुतः ।
क्षोण्यां यः प्रविभाति वाञ्छितफलप्राप्तिं नृणां कल्पयन्
सोऽयं वञ्चिकुलोद्भवो विजयते श्रीबालमार्ताण्डराट् ॥

अपिच,

योऽयं वञ्चिकुलार्णवादुदभवत् सञ्चारिकल्पद्रुमो
यस्मै भक्तिगुणेन यन्त्रित इव श्रीवल्लभस्तिष्ठते ।

(क) तथा ।

दूरीकृतबकयूथो मधुकरकुलगीतवैभव इदानीम् ।
राजति राजहंसः परिमलमकरन्दमेदुरे पद्मे ॥

कर्पूरैरिव यस्य कीर्तिनिकरैर्दिक्चक्रमावास्यते
तस्य क्षोणिपुरन्दरस्य महिमा पारे गिरां वर्तते ॥ १६ ॥

(इत्युपश्लोकयन् परिक्रम्य सहर्षसम्भ्रमम्) श्रीपद्मनाभसन्निधानमहिम्नानाकाङ्क्षितपर्वसमयं गङ्गासङ्गमादप्यधिकाभ्युदयं शङ्खतीर्थं गत्वा तत्र महर्षिकल्पैर्ब्राह्मणैः सह नियमपूर्वकं माघस्नानं विधाय व्रतान्ते राजधानीं प्रविष्टं देवं दुन्दुभिघोषादवधार्य चिरदृष्टं तं नेत्रातिथीकर्तुं निर्गतोऽस्मि । (आकाशे) भो मणिमकुट! महाराजस्य को वावसरः । किं ब्रवीषि । शङ्खतीर्थादागतो देवः स्नानजपदेवसन्दर्शनादिकं पौर्वाह्णिकं नियमं निर्वर्त्य सोपायनमुपसर्पन्तं प्रकृतिजनमनुगृह्य मितपरिजनोऽभ्यन्तरमास्थान्याः प्रविश्य शङ्खतीर्थे स्वेनानुभूतं भगवतः पद्मनाभस्य प्रसादम् अभिमतानमात्यान् प्रति वर्णयन्नास्त इति । तर्हि समये द्रक्ष्यामि । (इति निष्क्रान्तः ।)

शुद्धविष्कम्भः ।

(ततः प्रविशति यथानिर्दिष्टो राजा ।)

राजा — (सहर्षातिशयम्) अहो लक्ष्मीपतेरस्मासु निरवधि वात्सल्यम् । (यतः, ?)

श्रीशोऽयं त्रियुगोऽपि तिष्यजनुषे योगैकदृश्योऽप्यहो
देहाहम्मतये गतैषणजनप्रे(ष्ठो ? क्ष्यो)ऽपि राज्यैषिणे ।
मह्यं मङ्गलदेवताप्रणयिनीं मूर्तिं मनोज्ञां निजां
यस्मात् प्रादुरभावयत् किल कृपापीयूषसिन्धुर्हरिः ॥१७॥

अमात्याः— (सविस्मयकुतूहलम्) स्वामिन्! भगवतो मुकुन्दस्य स्वमूर्त्याविष्करणप्रकारमाविष्करोतु देवः।

राजा— कर्णसुधारसायनमिदमावेद्यते। इदं किल तावदमात्यैर्ज्ञायते यदहं पुरस्कृतयुवराजेषु भवत्सु न्यस्तराज्यतन्त्रो माघस्नानविधये शङ्खतीर्थं गतः।

अमात्याः— ज्ञायत एव।

राजा—

स्नात्वा तत्र समुद्रवारि विधिवन्निर्वर्त्य सान्ध्यं विधिं
दत्त्वा वित्तमशेषभूसुरवरव्राताय धेन्वादिकम्।
गत्वा सिद्धगणाभिवन्दितमहं तत्रत्यदेवालयं
तत्रैकान्त उपाविशं जपकृते दूरे निवर्त्याखिलान्॥ १८॥

जपमाकलयंस्तत्र मुकुन्दपरितोषणम्।
इत्यचिन्तयमत्यन्तं निर्विण्णो राज्यकर्मणि॥ १९॥

अमात्याः— मुकुन्दचरणारविन्दानुध्यानसम्मिलितहृदयस्य परमरमणीये तदीये जप्यकर्मणि सञ्जाताभिरुचेर्देवस्य निरवसानव्यसनपरम्पराकरे राज्यकर्मणि अत्यन्तनिर्वेदपूर्विका चिन्ता समुचिता।

राजा— अनेन वचनेन युष्माननुभवरसज्ञान् मन्ये।

अमात्याः— कस्यामात्या वयमित्यनुचिन्तनीयाः।

राजा— चिन्ताप्रकारः श्रूयतां—

राज्येन किं भवेत् पुंसो महामोहप्रदायिना।
यस्मिन् निविशमानस्य हरिभक्तिर्दवीयसी॥ २०॥

अमात्याः — तुच्छीकृतसकलभुवनसाम्राज्यलाभहरिभक्तियोगानन्दापेक्षया निस्सारमेवेदं राज्यम्। प्रत्युतैतास्मिन् वर्तमानस्य कदाचिद् दुर्निवारदुस्सम्पर्कवशाद् विचित्रेषु राज्यफलभोगेष्वत्यासक्तिमासेदुषः कामक्रोधादयः सुमूर्छिता भगवद्भक्तिमतिदूरीकुर्वन्तीत्यभिप्रायगर्भा देवस्य चिन्ता साधुरपि राज्यनैराश्यद्योतकतया राष्ट्रजनान् व्याकुलयति ।

राजा —

राज्यनैराश्यभाजोऽपि दुस्त्यजं राज्यपालनम् ।
यः स्वधर्मपरित्यक्तः प्रत्यवायनिधिर्भवेत् ॥ २१ ॥

अमात्याः — अहो स्वधर्मप्रामाण्यं देवस्य ।

राजा — ततश्च खल्वेवं च मया चिन्तितम् —

अथवा कमलाभर्तुः प्रसादपरिपाकतः ।
कर्तुं भक्त्यविरोधेन शक्यते राज्यपालनम् ॥ २२ ॥

अमात्याः — संसिद्धभगवत्प्रसादेन देवेनातिध्रुवप्रह्लादप्रियव्रतं सम्यक् सिद्धान्तितम् ।

राजा — इतोऽपि श्रूयतां चिन्ताविशेषः ।

अमात्याः — श्रोत्रानन्दलाभे कैस्तृप्यते ।

राजा —

पुरा किल प्रपन्नस्य मुचुकुन्दस्य सुन्दरः ।
मुकुन्दः सुप्रसन्नोऽभून्मन्दहासमनोहरः ॥ २३ ॥
अस्माकमपि कारुण्यादधुना पुरुषोत्तमः ।
योगिमृग्यं स्वकं रूपमपि सन्दर्शयेदिह ॥ २४ ॥

अमात्याः — अहो महाभक्तिमहिमानुरूपो मनोरथो देवस्य। ततस्ततः,

राजा —

एवं चिन्तयतः कोऽपि हा हन्त घ्राणतर्पणः।
तुलसीमञ्जरीगन्धः प्रादुरासीद् विसृत्वरः॥ २५॥

अमात्याः — (साश्चर्यम्) ततस्ततः,

राजा — निस्तुलस्तुलसीगन्धः कुतोऽयमकस्मादुदञ्चतीति समुद्वेलेनाश्चर्यपयोधिना सम्प्लावितोऽस्मि।

अमात्याः — वयमपीदानीं दिव्यतुलसीगन्धप्रसरणश्रवणचन्द्रिकया समुद्वेलितस्याश्चर्यपयोधेः पारं न पश्यामः।

राजा — (सपुलकोद्भेदम्) तदानीमेव,

विकस्वरेन्दीवरसुन्दराङ्गः
पिशङ्गवासाः स्मितमञ्जुलास्यः।
चतुर्भुजः श्रीवनमालहारी
पुमान् पुरः कोऽपि ममाविरासीत्॥ २६॥

अमात्याः — अहो भक्तिमहिमा महीयसां मनसामप्यगोचरः, यदयं भगवान् देवस्य मनोरथगतः सद्यः प्रादुरासीत्। देव! ततस्ततः।

राजा —

क्षीराम्भोधिसुतापयोधरतटीपाटीरपङ्कोल्लसद्-
वक्षःशोभितहारकौस्तुभमणिप्रोद्भासिताशान्तरे।
दृष्टे नीलसरोजमञ्जुलरुचौ देवे जगन्नायके
कां कां नैम दशां प्रमोदजलधौ मग्ना वयं तादृशे॥ २७॥

अमात्याः — अहो भगवन्तं साक्षात्कृतवतो देवस्य किमेतदाश्चर्यम् ।

राजा —

आलोक्य तं देवमपारमोदो
भूमौ वपुः कण्टकितं निपात्य ।
मौलौ निबद्धाञ्जलिरस्फुटां गां
देव! प्रभो! नाथ! जयेत्यवोचम् ॥ २८ ॥

अमात्याः — निःश्वसितशब्दब्रह्मणस्तस्य परब्रह्मणः सन्निधाने आनन्दविवशस्य कस्य वा सुव्यक्तवर्णरमणीया देवद्रीची वाणी प्रसरेत् ।

राजा —

उद्यत्प्रमोदाश्रु वदन्तमित्थं
लक्ष्मीकुचाभोगकृतास्पदेन ।
पाण्यम्बुजेनाखिललोकनाथो
वत्सेति मामस्पृशदुत्तमाङ्गे ॥ २९ ॥

अमात्याः— (सविस्मयप्रमोदम्)

लक्ष्मीकुचमहाकुम्भशोभानिक्षिप्तपल्लवः ।
उत्तंसितो भगवता देवस्याहो निजः करः ॥ ३० ॥

राजा —

नन्दयन् मन्दहासेन चन्द्रिकाधवलेन माम् ।
मुकुन्दः सुन्दरीं वाणीं पूर्णेन्दुवदनोऽब्रवीत् ॥ ३१ ॥

(अमात्याः श्रवणौत्सुक्यमाविष्कुर्वन्ति ।)

राजा —

वाचां हृदामप्युपरि स्थितानां
　　पुण्योत्कराणां परिपाकतस्ते ।
वत्साहमद्याखिललोकनाथः
　　साक्षादभूवं तव कीर्त्तिदायी ॥ ३२ ॥

अमात्याः — भगवत्कल्पनायां नाल्पापि हि विचिकित्सा ।

राजा —

हृद्गतं ते प्रजानामि मदीयं कुरु शासनम् ।
इदं राज्यं ध्रुवस्येव न ते मोहाय कल्पते ॥ ३३ ॥

अमात्याः — अहो भगवता महाननुग्रहो देवस्य कृतः, यदयं राजभावेऽपि मोहानभिभवः ।

राजा — भूयोऽपि मे महत्तरोऽनुग्रहः कृतो भगवता । यथा—'वत्स! वञ्चिकुलोत्तंस! स्यानन्दूरपुरे चिरजीर्णं मदीयमायतनमभिनवीकुरुष्व । तस्य च बहुवित्तसाध्यतया स्वराज्यसमुत्थायिनो धनागमस्योचितनित्यव्ययमात्रपर्याप्ततया च भारतवर्षवर्तिनो महीपालान् विजित्य धनौघमुपानयस्व । मदनुग्रहेण पार्थस्येव तव कुत्रापि पराजयो न भविष्यति । भवदुद्धृते च तस्मिन्नायतने नित्यसन्निधानस्त्वया राजसूयविधिनाभिषेचितोऽहं सर्वजगद्धुरावोढापि विशिष्य भवदीयराज्यधुरां वक्ष्यामि । त्वं च मत्कटाक्षैरभिषिक्तो युवराजधुरां वक्ष्यसि । ततश्च त्वदभिमतं सर्वं सेत्स्यति' इत्यभिधाय सद्यस्तिरोभवत् ।

अमात्याः — ततः किमाचरितं देवेन ।

राजा —एवं कर्तव्यपरिपाटीमुपदिश्य तिरोहिताय भगवते भूयो नमस्कृत्यात्मानं कृतकृत्यं मन्यमानस्ततः प्रास्थितवानस्मि ।

अमात्याः — (राजानं प्रति साञ्जलिबन्धम्)

स वहतु धुरमेतां श्रीपती राज्यरूपां
प्रतिदिनमनुपुष्णंस्त्वं पुनर्दानकीर्त्तिम् ।
निखिलधरणिदेवैः श्लाघितो यौवराज्ये
स्थित इह महनीये तन्निदेशं वहेथाः ॥ ३४ ॥

अपिच,

अधिकविपुलमेनं राज्यभारं त्वदीयं
वहति भगवति श्रीपद्मनाभे दयालौ ।
विगतविविधचिन्ताशोकमोहप्रहृष्टः
सरसकवनराज्यं पालयाचन्द्रतारम् ॥ ३५ ॥

राजा — इदं प्रार्थितमेव । किन्तु कथं भगवन्निदेशं वोढुं पारयेयमिति चिन्तातन्तुभिः सन्तायते मे हृदयम् ।

अमात्याः — अलं चिन्तया । भगवतो नैसर्गिकमिदं, यत् स्वस्मिन् न्यस्तभाराणां भक्तानामिष्टप्रापणमनिष्टपरिहरणं च । तथाहि —

बालकाय स्वपादाब्जध्यायिने मानशालिने ।
सर्वोन्नतं पदं देवो ध्रुवाय प्रत्यपादयत् ॥ ३६ ॥

किञ्च,

दिग्दन्तावलदन्तपङ्क्तिमुसलाघातान्महासङ्कटात्
प्रोच्चण्डाग्निचयादनल्पबहलज्वालावलीसङ्कुलात् ।
उद्दामोग्रविषान्महोरगपतिव्रातस्य दंष्ट्रामुखात्
प्रह्लादः परिपालितः करुणया श्रीवल्लभेन स्वयम्
[॥ ३७ ॥

परिजनः — (क) इत्थिआणं पसूणं वि रक्खअंतस्स भअवंतस्स किं एदं अच्चरिअं ।

आइमूळ ! जअण्णाह ! रक्ख मं गाहपीडिअं ।
अक्कोसअंतो एव्वं सो पाळिओ गअजूहवो ॥ ३८ ॥

अविअ,

माणिणी सा वि पंचाळी माणणिज्जा पइव्वदा ।
पाळिआ माणभंगादो पंकअक्खेण तक्खणं ॥ ३९ ॥

राजा — भक्तेरनुभावोऽवाङ्मनसगोचरः । भवत्वेतत् । किमितःपरमस्माभिः करणीयम् ।

अमात्याः —

किमस्ति वञ्चिवंशाब्धिचन्द्र ! राजशिरोमणे ! ।
पद्मनाभाभिषेकार्थसम्भाराहरणादृते ॥ ४० ॥

(क) स्त्रियः पशूनपि रक्षतो भगवतः किमेतदाश्चर्यम् ।

आदिमूल ! जगन्नाथ ! रक्ष मां ग्राहपीडितम् ।
आक्रोशन्नेवं स पालितो गजयूथपः ॥

अपिच,

मानिनी सापि पाञ्चाली माननीया पतिव्रता ।
पालिता मानभङ्गात् पङ्कजाक्षेण तत्क्षणम् ॥

राजा — भगवदायतनस्य नूतनीकरणानन्तरं खलु तत् करणीयम् ।

अमात्याः — भगवन्मन्दिराभिनवीकरणं बहुवित्तौघमुपघ्नयति ।

राजा — स च दिग्विजये आयत्त इति तदर्थः सन्नाहः क्रियताम् ।

अमात्याः — यदाज्ञापयति देवः ।

(नेपथ्ये)

भूत्वा वह्निकुलाद् भवानिव महापाथोनिधेर्भानुमान्
भूभृन्मौलिपदं प्रगाह्य जगतामुन्मेषमुद्भाव्य च ।
सर्वाशापरिपूरणं प्रकलयन्नोघैर्वसूनामयं
माध्यस्थ्यं वहते समस्तभुवनोत्तुङ्गः प्रतापाकरः ॥ ४१ ॥

अपिच,

माध्यन्दिनायाखिलयोगिवर्यान्
प्रोत्साहयत्यर्ककरौघभाजाम् ।
आमोदभारो यजुरम्बुजाना-
मासक्तसन्मानसषट्पदानाम् ॥ ४२ ॥

राजा — (आकर्ण्य) माध्याह्निकवेलामावेदयति वैतालिकः । तत् साधयत यूयमुचिताचरणाय । अहमपि तावदभ्यन्तरं प्रविशामि ।

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

प्रथमोऽङ्कः ।

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति सवत्सां धेनुमादाय वेदविद् ब्राह्मणः ।)

ब्राह्मणः — (सहर्षम्) अहो वञ्चिकुलमहाराजस्येदमौदार्यं, यदयं दिग्विजयप्रस्थानाङ्गतया सहस्रमलङ्कारवतीनां कामधेनूनां सद्ब्राह्मणेभ्यः प्रतिपादितवान् । (सविमर्शम्) अथवा किमेतदाश्चर्यम् ।

स कालमनपेक्ष्यैव वितरन् कल्पपादपः ।
कथं वसन्ते सम्प्राप्ते स्वशीलं न प्रकाशयेत् ॥ १ ॥

(इति कियदन्तरं गत्वा कस्यचिद् गेहबहिर्वितर्दिकायामुपविश्य सविमर्शाश्चर्यम्)

नानादिगन्तस्थितभूमिपाल-
दोःस्तम्भबन्धं सहसा विमुच्य ।
वल्गत्कुचा वाञ्छति वीरलक्ष्मी-
र्वञ्चीन्द्रपाणिग्रहणोत्सवं सा ॥ २ ॥

(पुरोऽवलोक्य) कथमित एवाभिवर्ततेऽस्मत्सब्रह्मचारी मित्रशर्मा ।

(प्रविश्य)

ब्राह्मणः — अहो निरवधि वञ्चिकुलमहाराजस्य भागधेयं, यदस्य सुघटिता दानसामग्री । तथाहि —

देशः शुचीन्द्रः प्रथितप्रभावः
कालः शरत् पङ्कजलक्षितश्रीः ।
पात्राः प्रशस्ताः श्रुतिभिः प्रदेया
गावस्तु विस्मापितगाधिपुत्राः ॥ ३ ॥

(कालस्त्वयं श्लाघ्यतमः शुचीन्द्रो
देशोऽपि मूर्तित्रयनित्यपूतः ।

पात्राणि सर्वोत्तरसद्गुणानि
श्रद्धाप्रदेया अपि कामदोग्ध्र्यः) ॥ ४ ॥

(उपसृत्य सहर्षं) कथमस्मत्सखः सुशर्मा ।

प्रथमः — (सादरं) सखे! मित्रशर्मन्! अत्रोपविश ।

(इति स्थलं निर्दिशति ।)

(द्वितीयः उपविशति ।)

प्रथमः — अपि भवानपि कामदोग्ध्रीं प्रत्यगृह्णात् ।

द्वितीयः — सखे ! सुशर्मन् ! पुण्यश्लोकशिरोमणेरस्माद् न के वा महात्मानः प्रतिगृह्णन्ति ।

प्रथमः — तथ्यमेव ।

प्रतिग्राही जनः सर्वो बालमार्ताण्डवर्मणः ।
समस्तवेदपाथोधिपारदर्शी सुविश्रुतः ॥ ५ ॥

द्वितीयः — सखे ! जैत्रयात्राविलासेन विजित्याखिल-महीपालान् कथमनेन साध्यते बहुवित्ताहरणमीदृशवितरण-शूरेण ।

प्रथमः — अहह किमाशङ्क्यते वयस्येन ।

कारुण्यपीयूषमहार्णवस्य
भक्तैकवश्यस्य रमोपयन्तुः ।
पादाम्बुजध्यानसमिध्यमान-
प्रतापवह्नेः किमसाध्यमस्य ॥ ६ ॥

द्वितीयः — सखे ! तत्त्वकथनेन भवता सम्यगनुस्मा-रितोऽस्मि । सत्यमेव भगवत्प्रसादनिवासभूमिरियं महा-

राजः । अन्यथा चिरकालराजन्यकुलद्रोहिणः सर्वोऽपि प्रज्व-
लन्तमग्निं शलभौघा इवैनमासाद्य स्वयमेव कथं प्रनष्टाः ।
तथाहि — बाल्ये वयसि वर्तमानेनाप्यनेन दाशरथि-
नेव चिरकालराजन्यकुलद्रोहशीलं सुनिश्चितव्यापादचिन्ता-
सफलीकरणसंसिद्धसन्नाहं क्षुद्रारातिकुलमखिलं च साक-
ल्येन कौशिकक्रतुविध्वंसनकुतूहलझटितिसम्मिलितं राक्षस-
कुलमिव निजधनुर्ज्यालताविलासनिर्मुक्तशरजालधारावह्नि-
ज्वालानिचयेष्विव सुनिशितविचित्रशूलसहस्राग्रकोटिषु सद्य
एव वास्तव्यकुटुम्बितामापादितम् । किञ्च रावणकुम्भकर्णा-
विवात्यन्तपरमदुर्जयौ बालकनिष्ठाभिधानौ प्रत्यर्थिमूर्धन्यौ
दुरालोचनाफलसांसिद्धिं निश्चित्य विविक्तमेव निजोपकण्ठं
कालचोदनया सम्मिलितावेवागतौ समये विदितवृत्तान्तेन
निमेषमात्रेण खड्गधाराकबलीकृतकण्ठनालावाकलय्य प्र-
त्येकं द्वैरूप्यतामापादितौ । अपिच लङ्कापुरमिव सागरपरीतं
कैरपि दुरापं कोलम्बपुरदुर्गमपि शत्रुकुलमुत्सार्य निजसैन्य-
तुरङ्गतरङ्गसङ्घसङ्कुलीकृततया चन्द्रोदयारम्भसमुच्चलदर्णवा-
डम्बरसन्दर्शनीयतामानीतम् । इतश्च निजराज्यमर्मभूतं प्रभू-
तधनागमस्थानमतर्कितमेवाक्रम्य रक्तबीजासुरकुलमिव तत्रैव
परिवर्धमानं कुहनैकनिलयं सकलमपि सस्वामिकं सांयात्रि-
कयूथमपि विविधं च समग्रायुधजालमाच्छिद्यैव विद्रावितं
विनिहतं, सद्यः शरणागतं सम्यक् परिपालितं च । इतोऽप्य-
नेकमद्भुततमं शात्रवनिराकरणकौशलं च बाल्यलीलाविष-
यीकृतम् ।

प्रथमः—हन्त सम्यगिदानीं प्रस्तावितेन बालमार्ताण्डकुलशेखरमहाराजबाललीलाविलासविशेषलेशेन भृशं परितुष्टोऽस्मि । सखे! मित्रशर्मन्! इदं च ज्ञायताम्,

उच्चाटयन् रिपुध्वान्तमुदभूदात्मतेजसा ।
अयं प्रख्यायते तेन बालमार्ताण्डसंज्ञया ॥ ७ ॥

शोभाहानिकरोऽरातिवधूमुखसरोरुहाम् ।
असावद्भुतमार्ताण्डो मन्ये कुवलयप्रियः ॥ ८ ॥

द्वितीयः—सखे! बहूनि सन्ति वर्णनीयान्येतस्य बालचरितानि । सावकाशतया महाराजगुणवर्णनामृतपानेन प्रमोदिष्यावहे ।

प्रथमः—एवमस्तु । त्वया पुनरिदानीं कुत आगम्यते ।

द्वितीयः— राजकुलादेव ।

प्रथमः—सखे! महाराजः किमनुतिष्ठति ।

द्वितीयः—दिग्विजयप्रस्थानाङ्गतया निर्वर्तितसहस्रगोप्रदानमङ्गलः साकममात्यैरास्थानीमधितिष्ठति ।

प्रथमः— तर्ह्यावामपि झटिति निर्वर्तितसमयोचितकृत्यौ महाराजं विजयप्रस्थानसमये नेत्रातिथीकर्तुं गमिष्यावः ।

(इति निष्क्रान्तौ ।)

शुद्धविष्कम्भः ।

(ततः प्रविशति यथानिर्दिष्टो राजा।)

राजा —

भीत्या ये प्रणमन्ति भूमिपतयस्ते पालनीया मया
मानाद् ये न नमन्ति ते तु करुणामुत्सृज्य वध्याः कथम्।
इत्यामर्शमृदूकृतान्तरतया मन्दोद्यमानां रतिं
नास्माकं तनुते दिगन्तविजयश्रीः सापि सर्वोच्चरा॥ ९॥

अमात्याः —

आततायिवधो युद्धे राज्ञां धर्मः सनातनः।
संशयेन कृतं देव! प्रमाणं तत्र फल्गुनः॥ १०॥

राजा — (सहर्षोत्साहम्)

यस्तादृशदयाशाली वीतमोहो हरेर्गिरा।
युयुत्सुराददे शस्त्रं वयं तमनुकुर्महे* ॥ ११ ॥

(इति परिजनहस्तात् खड्गमादाय कुलकूटस्थानां प्रणतिं नाटयति।)

अमात्याः — अहो देवेन समुत्सह्यते विजयश्रीपरिरम्भ-महोत्सवाय।

(राजा सोत्साहं खड्गमाधूनयति।)

अमात्याः— (सोत्प्रेक्षम्)

दुर्दान्तभूमिपतिकोटिभुजार्गलेषु
बद्धा न्यपीड्यत चिरं बत या जयश्रीः।
वञ्चीन्द्रपाणिकमलं समुपेत्य सैषा
हृष्टेव नृत्यति धुतासिलताच्छलेन॥ १२॥

राजा — अहमेवमुत्पश्यामि —

अनास्वादितपूर्वाणि शोणितानि महीक्षिताम्।
पास्यामीत्यसिवल्लीयं मुदा नृत्यति मत्करे॥ १३॥

---

* 'अनुपराभ्यां कृञः' (१-३-७९) इति परस्मैपदमत्र ग्राह्यम्।

(ससम्भ्रमवितर्कम्) न किं सन्निहितो जैत्रयात्रासमयः ।

(प्रविश्य दैवज्ञः)

दैवज्ञः —

आदेशेन मधुद्विषो भगवतस्तावद् यियासोः प्रभो-
जेंतुं भारतवर्षवर्तिनृपतीन् किं कालसञ्चिन्तया ।
दैवज्ञाननुमान्य शत्रुजितये राजा प्रयायादिति
प्राचां धर्ममयं तथापि महयन्नस्मद्वचोऽपेक्षते ॥ १४ ॥

(उपसृत्य) विजयतां महाराजः ।

सम्प्राप्तः समयः सोऽयं दैवज्ञैर्यः सुनिश्चितः ।
दिग्जयश्रीकुचाश्लेषघटनाचतुरस्तव ॥ १५ ॥

(राजा सोत्साहमुत्थाय बहिर्निर्गमनं नाटयति ।)

इतरे — विजयतां महाराजः । (इति सहर्षोत्साहमनुसरन्ति ।)

राजा — (पुरोऽवलोक्य सहर्षम्) दिष्ट्या विप्रयुग्ममित एवाभिवर्तते ।

(प्रविश्य)

विप्रौ — विजयतां महाराजः ।

राजा — (सप्रणामम्) भगवतोराभिमुख्यमिदमस्माकं विजयलक्ष्मीपाणिग्रहणानुग्रहसूचकं सुनिमित्तं जातम् । इदं पुनराशीर्वचनं तस्यैवाभ्युच्चयः ।

विप्रौ — (सप्रसादम्) ईदृशी तव ब्रह्मण्यता किं वाभिमतं न सङ्घटयति ।

राजा—(पुरोऽवलोक्य) हन्त कृतसैन्यसन्नाहाः सेनापतयः*।

सेनापतयः—(सोत्साहप्रणामम्) विजयतां देवः।

सम्प्रणीतेयमस्माभिः पृतना चतुरङ्गिणी।
त्वां वन्दितुमभिप्राप्ता कटाक्षैरनुगृह्यताम्॥ १६॥

राजा—(सपरितोषं यथोचितं दानमानाभ्यां ससैन्यांस्तान् परितोष्य) किं यानं सन्नद्धम्।

अमात्याः—शिबिकामतल्लिका वाजिवृन्दारकः कुञ्जरराजश्च कृतपरिष्काराः प्रतीक्षन्ते।

राजा—तर्हि दन्तावल उपानीयताम्।

(तुङ्गताजितमन्दरं कुञ्जरमुपनयन्)

हस्तिपकः—(प्रविश्य†) स्वामिन्! अयमनुगृह्यतां मदावलः।

(राजा गजाधिरोहणं नाटयति।)

इतरे—(गजाधिरूढं राजानमुत्पश्यन्ति।)

देवोऽयं बालमार्तण्डः कुञ्जरस्कन्धमाश्रितः।
उदयाचलशृङ्गस्थो बालमार्तण्ड एव सः॥ १७॥

सेनापतयः—इतः प्रेर्यतां स्वामिन्नपाङ्गतरङ्गः।

दृश्यन्ते दन्तिवर्याः प्रविकटकरटोद्वेलदानप्रवाहाः
प्रोत्तुङ्गाकारभीमा गिरय इव झरीवाहिसानूपपन्नाः।
एतेषामूर्ध्वबद्धा मृदुपवनचलत्प्रान्तभास्वत्पताका
रम्भा व्यालोलपत्रा इव धुरि नितरां भान्ति तुङ्गा ध्वजौघाः॥

---

* शास्त्रमर्यादया इत उपरि 'प्रविश्य' इति पदमावश्यकम्। † इदं पदं हस्तिपकात् पूर्वं स्यात्।

इतः प्रत्यर्प्यतां कटाक्षमाला —

उद्यद्दुर्वहगर्वभारचटुलीभूताङ्घ्रिकोटिक्कण-
न्मञ्जीरध्वनिकृष्टपौरजनताकौतूहलोद्वीक्षितम् ।
शश्वच्चालितकर्णचामरसटं व्यालोलवालोत्करं
स्फायद्भीषणहेषितारवमिदं गान्धर्वमुद्वल्गति ॥ १९ ॥

इतो वितीर्यतां दृष्टिविलासः —

ऊर्ध्वं चक्रकोटिप्रणिहतधरणिप्रोद्यदुद्दामधूली-
जालाम्भोदावलीभिर्झटिति खरकरस्यन्दनं छादयन्तः ।
मन्दोद्युक्तानुलोमानिलगतिविलसच्चञ्चलीभूतचेल-
प्रान्तस्वर्णध्वजौघस्फुरदुरुमणयो यान्ति वेगाद् रथौघाः ॥

इतो विस्तार्यन्तां विलोचनलीलावीचयः—

केचित् पट्टसपाणयः कतिपये हस्तोल्लसत्कार्मुकाः
केचित् तीक्ष्णपरश्वधोज्ज्वलकराः कुन्तोद्यताः केचन ।
आत्तोदात्तमुसुण्ठयः* कतिचन प्रासायुधाः केचन
व्यक्तं वीररसस्य भान्ति सुभटा मूर्ताः प्रकारा इव ॥ २१ ॥

राजा — (परितो विलोक्य सहर्षम्)

बृंहन्ते† गजयूथपा बहुमदप्रस्यन्दिगण्डस्थला
ह्रेषन्ते हयराजयः खुरपुटप्रक्षुण्णवीथीपथाः ।
सङ्क्रीडन्ति चलाचलध्वजपटीश्रृङ्गारिताग्रा रथाः
क्ष्वेलन्ति प्रतिपक्षपाटनपटुध्वानाः पदातिव्रजाः ॥ २२ ॥

---

* 'भुशुण्डी' इति कोशेषु दृश्यते ।   † गजगर्जिते प्रसिद्धः बृंहतिः परस्मैपदी ।

अपिच,

अश्वीयाङ्घ्रिप्रहारक्षतधरणिरजःस्तोममेघान्तरोद्यद्-
विद्युन्मालाविलासभ्रमकरसुभटाकम्पितासिप्रभेदा ।
भेरीभाङ्काररूपस्तनितमुखरिता मत्तदन्तावलाली-
गण्डोद्यद्दानवर्षा जनयति पृतना प्रावृडुत्साह(सस्य?साम्य)-
[म् ॥ २३ ॥

(नेपथ्ये)

जैत्रयात्रोत्सुकस्यास्य वञ्चिराजकलानिधेः ।
विरहः कथमस्माभिः सोढव्यः पुरवासिभिः ॥ २४ ॥

राजा — (आकर्ण्य) अहो मयि गाढानुरक्ताः पौराः मद्विरहशङ्कोत्कण्ठितमनसो विषीदन्तीव ।

अमात्याः — ध्रुवं दशकण्ठविजयोद्यतस्य रघुकुलरामचन्द्रस्येव वञ्चिकुलवार्धिचन्द्रस्य देवस्य सौजन्यादिगुणगणरामणीयकविवशितान्तःकरणाः सस्त्रीबालप्रवयसः क्षणमपि वियोगमसहमाना दिग्विजयाय प्रस्थितं देवमनुव्रजिष्यन्ति, यदेषां वचनमेवमाकर्ण्यते ।

राजा— (सविमर्शम्) कथमिमे पौरा अस्मद्विप्रवासदुःखाद् विमोचनीयाः । (इति विचारमभिनयति ।)

(ततः प्रविशति पुस्त*....)

+ + + + + + + + + + हारसरा इव ।
वञ्चीन्द्रभटमुख्यानां कण्ठेषु स्वेदपङ्क्तयः ॥

अमात्याः — अहो देवस्य प्रस्तुतदिग्विजयप्रस्थानशुभोदर्कं समर्थयतेऽयं पद्यार्थः ।

* इतः परं मातृकायां पत्रमेकं भ्रष्टम् ।

राजा— (सपरितोषं सन्निहितं विलोक्य) अयि श्रीकङ्कण! लेखनीं शासनपत्रं चानय ।

(श्रीकङ्कणो लेखनीं शासनपत्रं च महाराजहस्ते समर्पयति ।)

राजा — (गृहीत्वा)

प्रबन्धसाहितीतुष्यद्बालमार्ताण्डवर्मणा ।
नवीनकालिदासाय ग्रामो दत्तो महोदयः ॥

(इति विलिख्य सद्यः स्वकीयकण्ठादुन्मुक्तेन साकमेकेन हारेण शासनपत्रं कविहस्ते समर्पयति ।)

अभिनवकालिदासः — (गृहीत्वा सप्रमोदम्)

राजाधिराज! भवता दत्तयोरग्रहारयोः ।
मत्कण्ठभूषणं त्वेकः परो भूम्येकमण्डनम् ॥

राजा — अभिनवकालिदास! कविशिखामणे! विजित्यागमनानन्तरमितोऽपि पारितोषिकं लप्स्यसे ।

अभिनवकालिदासः — असाधारणप्रेमभाजनतया महाराजेन परिगृहीतस्य मम किमन्यत् पारितोषिकं लब्धव्यम् । अथवा महाप्रभोः प्रसादपरतन्त्रता सर्वदा मयि जागर्ति ।

राजा — कविशिखामणे! कनकशिबिकामिमामारुह्य गृहं गम्यताम् ।

अभिनवकालिदासः—यथा प्रसीदति महाप्रभुः। (इति कनकशिबिकामारुह्य निष्क्रान्तः ।)

राजा — (अमात्यान् प्रति) केन पुनरिदमभिनवकालिदासनिबन्धनं रङ्गे प्रयोज्यम् ।

अमात्याः — यः सुव्यक्तवर्णरमणीयसरस्वतीप्रवर्तनाविलासेन विद्वद्रसिकजनौघसम्पूर्णं पुण्यतमं रङ्गं रञ्जयति ।

राजा — हन्त स्मारितोऽस्मि । स एव मया नियुज्यते । (इति समीपस्थं विलोक्य) भो बाभ्रव्य ! अस्मत्कुलनन्दनं कुमारमानय ।

बाभ्रव्यः — यदाज्ञापयति देवः । (इति निष्क्रम्य कुमारेण सह प्रविशन्) इत इतः कुमारः ।

कुमारः —

अत्राहं निवसामि माधवमुपासीनोऽधुना सेनया
साकं दिग्विजयाय वत्स! निरिहीत्यार्यो नियुञ्ज्यात् कदा ।
सद्यः खड्गलतां कृतान्तरसनाभीमामिमां भूभृतां
मेदोभिर्विविधैः कदानु धिनुयामित्युत्सहेऽहं चिरात् ॥

एतदार्यो न सम्मन्यते । किं करोमि । (इति परिक्रम्योपसृत्य मातुलमहाराजं प्रणमति ।)

राजा — (सस्नेहबहुमानं विलोक्य स्वगतम्)

दुर्दान्तभूपतीन् वत्सो दिग्जये शासितुं क्षमः ।
मृगेन्द्रबालकेनापि हन्यन्ते किं न कुञ्जराः ॥

तथापि चिरभक्तिमहिम्नैकलब्धो भगवन्निदेशः स्वेनैव कार्य इति बुद्ध्या दिग्विजयप्रस्थानौत्सुक्याद् वत्सोऽयं निवारितः । (प्रकाशम्) वत्स ! श्रीरामवर्मन् ! यावन्मदागमनं सभावल्लभनामधेयस्य पाठककुलाचार्यशिखामणेरात्मजेन सर्वानपि सभ्यजनानानन्दयितुं पटीयसा समुचितसर्वाभरणप्रभादेदीप्यमानवपुषा अपूर्वग्रन्थविशेषसङ्ग्रहाभिसन्धिना (रङ्ग-

रञ्जकेन पाठकेन साक्षाद् भगवन्निदेशजन्यतयात्यद्भुतमभिनवकालिदासनिबन्धनमिदं रङ्गे प्रयोज्य मद्विरहाकुलैः पौरैः सह त्वयापि कालविनोदः क्रियताम्। (इति कुमारहस्ते पुस्तकं समर्पयति ।)

युवराजः—(गृहीत्वा) यदाज्ञापयत्यार्यः। (इति सप्रश्रयं प्रणम्य निष्क्रान्तः ।)

राजा—

पौरानुयानसङ्कल्पजनिते मम दूरतः ।
निरस्ते व्यसने भूयः कुतो यात्रा विलम्बते ॥

(इति सोत्साहं प्रस्थानमभिरोचयति ।)

अमात्यादयः— अहो विजयाय प्रतिष्ठमानं देवं चतुरङ्गिणी पृतनेव शुभनिमित्तपरम्परा प्रहर्षयति ।

साक्षात् सुपर्णो भगवांश्चक्रपाणेरयं रथः ।
सव्यपार्श्वे चरन् देवमानन्दयति साम्प्रतम् ॥

अपिच,

आमोदमुद्गिरन्नेष पृतनां परितः शनैः ।
सञ्चलन् बालपवनः सेनानीरिव राजते ॥

राजा—(शुभनिमित्तानि वीक्ष्य सानुध्यानम्)

यो माङ्गल्यगुणैः पूर्णो धत्ते मङ्गलदेवताम् ।
तं स्मर्तॄणां भवेत् पुंसां सर्वतो जयमङ्गलम् ॥

(नेपथ्ये)

विप्रा यस्य मुखाम्बुजादुदभवन् वेदैश्चतुर्भिः समं
साकं दण्डनयेन यस्य भुजतः संजज्ञिरे क्षत्रियाः।

ऊरुभ्यां सह वार्तया प्रचलिता वैश्याश्च यस्याभवन्
पद्भ्यां यस्य सहैव संववृतिरे शूद्राश्च शुश्रूषया ॥

राजा — (आकर्ण्य) किमिदं सावशेषमिव वाक्यम् ।

(पुनर्नेपथ्ये)

स शेषशायी भगवान् पद्मनाभो जगत्प्रभुः ।
सर्वत्र विजयं राजन्! पुष्णातु तव सर्वदा ॥

अमात्याः — अहो एते जानपदा ब्राह्मणा उद्यतमाङ्गलिकोदकुम्भा विजिगीषुं देवं जयाशीर्भिरुपश्लोकयन्ति ।

राजा — (साञ्जलिपुटम्) इयममोघा परिगृह्यते ब्राह्मणानां जयाशीः । (सर्वान् प्रति) यथायथमस्मन्निदेशमनुतिष्ठत । वयं च भगवन्निदेशमनुपालयामः ।

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

द्वितीयोऽङ्कः ॥

अथ तृतीयोऽङ्कः ।

(ततः प्रविशति पाठकः ।)

पाठकः — आदिष्टोऽस्मि श्रीरामवर्मणा युवराजेन— भो ! रङ्गरञ्जक ! अभिनवकालिदासनिबन्धनं दिग्विजयाख्यं यावदागमनमार्यस्य रङ्गे प्रयुञ्जानस्तद्विरहोत्कण्ठितं पौरजन-मनुरञ्जयेति । (परिक्रम्यावलोक्य) अहो प्रसाधितोऽयं रङ्गो नेत्रो-त्सवमाकलयति । तथाहि —

आदर्शामलभित्तिरुज्ज्वलमहानीलस्फुरत्कुट्टिमः
स्वर्णस्तम्भपिनद्धपूगकदलीपालीक्षुकाण्डावलिः ।
ऊर्ध्वक्षौमवितानमण्डललसन्मुक्तासरालङ्कृतो
रङ्गो राजति शातकुम्भघटितस्तम्भाग्रदीपोत्करैः ॥१॥

(सर्वतो निर्वर्ण्य)

तिष्ठद्भिः परितो द्विजेतरकुलैः पौरैः क्रमान्मण्डिता
राजन्ती युवतीजनैर्यवनिकां कृत्वा स्थितैरन्तरा ।
राजामात्यजनैस्ततोऽन्तरनघैर्विप्रोत्तमैर्वैदिकै-
र्विद्वद्भी रसिकैर्यथोचितमिहासीनैः सभा शोभते ॥ २ ॥

किमेतदिदानीं ससम्भ्रमजनाकुला सभा दृश्यते । (इति पुरस्तादालोक्य सहर्षातिशयम्) हन्त हन्त,

बालादित्य इवाग्रतः प्रविलसत्सौवर्णदीपप्रभा-
पालीभिः ककुभां मुखानि नितरां विद्योतयन् साम्प्रतम् ।
रङ्गस्थाखिलपौरवर्गनयनाम्भोजानि सम्भावयन्
सख्या दत्तकराञ्चलो युवमहीपालोऽपि चागच्छति ॥३॥

(ततः प्रविशति यथानिर्दिष्टो युवराजः ।)

युवराजः— (पाठकं निर्वर्ण्य रत्नाङ्गदं प्रति) सखे! रत्नाङ्गद! पाठकवेषोऽयमपूर्व इव मां विस्मापयति ।

रत्नाङ्गदः—

व्यालोलोर्मिमदुज्ज्वलाञ्चलपयःफेनालिशुभ्रांशुकः
सर्वाङ्गीणपटीरपङ्ककलितां विच्छित्तिशोभां वहन् ।
बाहुद्वन्द्वलसत्सुवर्णवलयः कोटीरवान् कुण्डली
वेषोऽयं बत पाठकस्य कुरुते नो कस्य वा विस्मयम् ॥४॥

अपिच,

अल्पेन तालवृन्तेन स्वल्पमावीजयन् मुखम् ।
तदन्तःस्थितभारत्या घर्ममुत्सारयन्निव ॥ ५ ॥

युवराजः— रत्नाङ्गद! नवीनकालिदासनिबन्धनकथामञ्जरी श्रोतॄणां कर्णपुटानि सावतंसानि करोतु ।

पाठकः— इयमुपक्रम्यते नान्दी ।

यत्कृपावज्रकवचो वज्रीन्द्रो विजिगीषते ।
राज्ञो भारतवर्षस्थान् पद्मनाभः स पातु वः ॥ ६ ॥

युवराजः—

मनःश्रवणनन्दिन्या नान्द्या मञ्जुलयानया ।
हठात् प्रक्षिप्यते चित्तं मम भक्तिसुधार्णवे ॥ ७ ॥

रत्नाङ्गदः— किमाश्चर्यम् अखिलेष्वपि तत्र निमग्नचित्तेषु हरिभक्ताग्रगण्यमहाराजबालमार्ताण्डवर्मकुलशेखरभागिनेयस्य भवतः ।

युवराजः — ततस्ततः ।

पाठकः — एष खलु वञ्चिकुलपारावारकल्पकः करकमलोद्यतासिवल्लीमतल्लीमणिखेटः खेटपरिवृढमकुटमणिकिरणकिञ्जल्कितचरणारविन्दं भगवन्तं पद्मनाभं प्रणम्याभ्यनुज्ञाप्य श्रीमन्तं तादृशमनन्तशायिनमादिकेशवं चानम्यामन्त्र्य श्रीकण्ठमानन्दवल्लीवल्लभं सानन्दमानम्यानुमान्य पुरस्सरदमितनिजसैन्यमत्तदन्तावलचक्रवालोपरिसमुच्छ्रायितध्वजपटपल्लवपटलप्रच्छादितच्छायाकलत्रं मणिगणघटितशातकुम्भकुम्भावलीदेदीप्यमानाभ्रंलिहशिखरभासुरगोपुरनिर्जितगोवर्धनगोत्रं शुचीन्द्रक्षेत्रमागत्य तत्रालङ्कृतगोसहस्रं विप्रसात्कृत्य पालितगीर्वाणनाथं स्थाणुनाथं प्रह्वीभवन् प्रार्थ्य कर्तव्यं राज्यतन्त्रं सामात्ये युवराजे निधाय दन्तावलतल्लजमारुह्य विजिगीषया सबलः स्वविषयान्तं व्यगाहत ।

रत्नाङ्गदः — इदमनुभूतमेव । ततस्ततः ।

पाठकः —

स वञ्चिकुलशेखरः स्वभटबाहुदण्डाहत-
प्रयाणपटहच्छटाध्वनितपूर्णदिङ्मण्डलः ।
ययौ झटिति पाण्ड्यभूरमणपट्टणं वाहिनी-
रजःपटलचूषिताखिलपयोधिपाथोभरः ॥ ८ ॥

युवराजः — सखे ! रत्नाङ्गद ! चिराभिलषितमिदं मातुलमहाराजेन । ततस्ततः ।

पाठकः — तत्र,

उत्सङ्गे कावेर्याः शयितं दयितं महाविभूतेस्तम् ।
साक्षादकरोद् राजा रङ्गधुरीणं परात्परं पुरुषम् ॥

किञ्च,

उन्मीलत्कुवलयदामहृद्यगात्रं
बालार्कप्रदलितपुण्डरीकनेत्रम् ।
शम्याकस्तबकपिशङ्गचारुचेलं
तं देवं स नृपतिरानमच्च भूयः ॥ १० ॥

युवराजः — (साञ्जलिपुटम्) सखे! रत्नाङ्गद! अत्र स्थितेन मयापि तस्मै भगवते नमस्क्रियते ।

रत्नाङ्गदः — महाराजवशंवदत्वस्य समुचितमेवेदम् ।

युवराजः — ततस्ततः ।

पाठकः —

निस्सङ्गप्रवहदुदारभक्तितुङ्गे
मङ्गल्यप्रविमलसत्त्वनिस्तरङ्गे ।
रङ्गेऽस्मिन्निव भगवन्! ममान्तरङ्गे
रङ्गेश! स्फुटमिह शेष्व बोधशृङ्गे ॥ ११ ॥

इति रङ्गभूरमणं प्रार्थयमानो महाराजो भूयसीमात्मनश्चरितार्थतामन्वमोदत ।

रत्नाङ्गदः — अहो भगवति रमारमणे भक्तिरस्यम्बरीषा अतिमुचुकुन्दा च सर्वोपरि वरीवर्ति ।

पाठकः — ततश्च महाराजस्तत्रैव निवस्तुकामः सर्वान् सेनानायकानाहूय चतुरङ्गं सैन्यं विभज्य यूयमेतेन व्यूढेन सैन्येनापरान्तजयाय प्रयात, यूयमेतेन पाण्ड्यचोलतुण्डीरा-

दिजनपदजयाय प्रतिष्ठध्वमिति कतिचन ससैन्यान् सेनान्यो नियुज्यापरान् सेनापतीन् महत्या पृतनया सहोदीच्यजयाय प्रस्थापयन्नेवमादिशति स्म —

यूयं यात बलाधिपाः! सह बलैः सर्वानुदीच्यान् नृपाञ्
जित्वायात ततो धनान्युरुविधान्यादाय मासैस्त्रिभिः
तावद् रङ्गपतेरमुष्य चरणावासेवमानः सदा
वत्स्याम्येव कवेरजाम्भसि कृतस्नानः सहैभिर्द्विजैः ॥

रत्नाङ्गदः — अहो सुष्ठु व्यवसितं महाराजेन, यद् भगवन्तं रङ्गशायिनं भजमान एव विजयश्रीपरिरम्भणसौख्यमनुभविष्यति ।

युवराजः — ततः ।

पाठकः — ते च यथायथं स्वामिनिदेशं मौलिभिरुद्वहन्तः महत्या वाहिन्या महीतलमाकम्पयन्तः गम्भीरेण दुन्दुभिघोषेण ककुभां मण्डलं मुखरयन्तः गन्धदन्तावलदन्तकुन्ताहतिभिः परपुरदुर्गाण्यामृद्नन्तः प्रदृप्तान् प्रणमयन्तः प्रणम्राननुगृह्णन्तः कापथवर्तिनो निगृह्णन्तः श्रीपद्मनाभकृपामृतविवर्तस्य महाराजबालमार्ताण्डस्य किङ्करा वयं दुरहङ्कारिणां धरणीपतीनां दुरवलेपानवलुम्पन्तो महार्घाणि रत्नान्याहरतेति च तेन स्वामिना नियुक्ताः पर्यटाम इति वीरवादानुदाहरन्तः समराङ्कणेष्वहमहमिकया प्रहरन्तः सर्वानुर्वीपतीन् करदीकुर्वन्तः भारतवर्षमखिलमाहिमाचलमाक्रामन्तस्तत्र तत्र जयस्तम्भान् निखनन्तः महाराजस्य कीर्त्तिप्रतापौ सर्वामवनिं चारयन्तः समन्ततः परिक्रामन्ति महाराजबालमार्ताण्डस्याप्रतिभटाः सुभटाः ।

रत्नाङ्गदः—अहो धीरोदात्तस्य महाराजबालमार्ताण्डस्य भटानां धीरोदात्तता वाङ्मनसयोर्भूमिमतिवर्तते ।

युवराजः— (सहर्षम्) तदनु तदनु ।

पाठकः—

वीरलक्ष्मीकुचाश्लेषकीर्णा मणिगणा इव ।
भान्ति वञ्चीन्द्रयोधानां युद्धस्वेदाम्बुबिन्दवः ॥ १३ ॥

किञ्च,

जयलक्ष्मीकरामुक्तमुक्ताहारसरा इव ।
केषाञ्चिद् वञ्चियोधानां कण्ठेषु स्वेदपङ्क्तयः ॥ १४ ॥

अपिच,

वञ्चीन्द्रयोधेन्द्रकृपाणवल्ल्यः
प्रत्यर्थियोधान् सुरसुन्दरीभिः ।
संयोजयन्त्यः किल हन्त तेषां
दूतीजनप्रेमपदत्वमायन् ॥ १५ ॥

रत्नाङ्गदः— अहो उभयेषामपि योधवीराणां जयो वध इति महति वैषम्येऽपि शृङ्गारावलम्बनत्वमविशिष्टम् ।

पाठकः—

आच्छिन्दन्तो ध्वजास्त्रद्रविणमुरुविधं म्लेच्छसांयात्रिकाणां
सेत्वास्यक्षोणिपालप्रभृतिरिपुनृपान् दूरमुत्सारयन्तः ।
आकोलं केरलानां हृदि हृदि निखनन्तो जयस्तम्भमुच्चै-
र्वञ्चीन्द्रस्य प्रतापा इव धृततनवो हन्त दीव्यन्ति योधाः ॥

रत्नाङ्गदः— हन्त हन्त महाराजभटानामपरान्तजय-प्रवृत्तानामोजायितं शृण्वतामपि मनांस्युद्वेजयति ।

युवराजः — तदनु ।

पाठकः —

मौण्ड्यं पाण्ड्य! भजस्व चोल! कलयेश्चूडामणेरर्पणं
तुण्डीर! त्यज डिण्डिमं जहिहि रे कर्णाट! दुर्नाटिकाम् ।
अन्ध्रेश! च्युतिरन्ध्रमिच्छ यवन! त्राणं वनं तेऽधुने-
त्याधावन्ति रणाग्रमुद्भटगिरो वञ्चिक्षितीन्दोर्भटाः ॥

रत्नाङ्गदः — हन्त पाण्ड्यादिजनपदविजयोद्यतानां महाराजयोधानां साङ्ग्रामिकं वीरायितं वीरजनाग्रेसरमौलिषु हीरायते ।

युवराजः — ततस्ततः ।

पाठकः —

रे रे कोङ्कण! पङ्कणं व्रज महाराष्ट्र! स्वराष्ट्रं त्यजे-
ष्टीकेथाः क्वनु पारसीक! चर रे वैदर्भ! दर्भाङ्कुरान् ।
गामालिङ्ग कलिङ्ग! वङ्ग! विपिने त्वङ्गाङ्ग! ना(ङ्गं? गं) त्यजे-
रित्याराद्दिव वञ्चिसैन्यशिबिरे जोघुष्यते दुन्दुभिः ॥

रत्नाङ्गदः — अहो उदीच्यजयाय समुद्यतानां वञ्चीन्द्रयोधतल्लजानां सन्नाहदुन्दुभिघोष एव प्रतिभटयुद्धसन्नाहं शिथिलयति ।

युवराजः — सखे! रत्नाङ्गद! शेषमप्याकर्ण्यताम् ।

पाठकः — किं बहुना,

आ पारावारतीरादनिशमुरुकृपादृष्टिपूतात् कुमार्या-
स्तस्याः संलालनेन स्वदुहितुरनघोत्सङ्गकादा च शैलात् ।

राज्ञो हप्तान् न्यगृह्णन् प्रणतिमुपगतानन्वगृह्णन्नगृह्णं-
स्तेभ्यस्तेभ्यो धनौघानथ शकटिशतैरानयन् वञ्चियोधाः ।

रत्नाङ्गदः — अहो भगवतः शार्ङ्गपाणेरनुग्रहमहिमा, यदक्षतनिजसैनिका एव वञ्चिभटनेतारः स्वामिने जयश्रियं सकलराजन्यकोटीरकोटिमणिगणद्युतिनीराजितामुपदामिवोपाहरन् ।

युवराजः — ततस्ततः ।

पाठकः — ततश्च शकटीशताहृतहेमराशीन् 'देवस्य कटाक्षेण यथानियोगं सर्वे राजानः पराजिताः करदीकृताश्चे'ति विज्ञाप्य प्रणतान् ससैन्यान् सैन्यपालान् प्रहर्षविस्तारिताभ्यां स्मितचन्द्रिकापरिचुम्बिताभ्यां विलोचनाभ्यामनुगृह्य स्वपुरं प्रति प्रस्थाप्य श्रीरङ्गनायकमनर्घैं रत्नोपहारैः प्रसाद्य प्रणिपत्य हृदये निधाय कुन्तलवलयिततत्प्रसादमल्लिकामालिकः सद्यःसमारूढशिबिकामतल्लिकः श्रीरामचन्द्रनिर्मितं सेतुं दिदृक्षुर्ब्राह्मणभूयिष्ठपरिजनो रामेश्वराख्यमन्तरीपं प्रति प्रास्थित ।

युवराजः — सखे ! रत्नाङ्गद ! चिराभिलषितमिदमपि महाराजस्य ।

पाठकः —

जयध्वजं कीर्तिपताकमुच्चै-
राच्छिद्य दुर्दान्तमहीपतीनाम् ।
स वञ्चिवंशोदधिपूर्णचन्द्रो
विप्रैः सहागाद् रघुनाथसेतुम् ॥ २० ॥

युवराजः — तदनु तदनु ।

पाठकः —

ततस्तस्मिन् वह्निक्षितितलवलारिः कृतयथा-
विधिस्नानो लङ्कापतिरिपुकराराधितपदम् ।
प्रणम्येशं भक्त्या हिमकरकलोल्लासिमकुटं
मनोज्ञं क्रौञ्चारेर्झटिति पुरमागात् प्रमुदितः ॥ २१ ॥

रत्नाङ्गदः —अत्यावश्यकमाश्रितानामाशुवरप्रदस्य भगवतः सुब्रह्मण्यस्य सन्दर्शनम् ।

विशिष्य चास्य प्रतिपत्तिहेतु-
रस्त्येव देवे भगवत्कुमारे ।
यत् पद्मनाभस्य निजेश्वरस्य
स्वसुः सुतोऽसौ सुरसैन्यपालः ॥ २२ ॥

युवराजः — तदनु ।

पाठकः —

तत्तद्वरार्थिभिरनेकजनैरजस्रं
संसेव्यमानचरणाम्बुरुहं कुमारम् ।
अभ्यर्च्य नेत्रकमलेन किरीटरत्नै-
र्नीराजनं च कृतवान् स हि तत्पदाब्जे॥ २३ ॥

ततश्च वन्दारुजनसन्दोहवाञ्छितवितरणचिन्तामणिः स्फटिकमणिमयपुरोमण्डपमध्यवलभीविलम्बमानपद्मरागपञ्जरगर्भस्थितनिजरमणीकेलीशुकवधूटीपटुतरवाग्व्यवहरणव्याजेन स भगवानेवमादिशति स्म —

मार्ताण्डप्रभुवर्य! पद्मविलसन्नाभिः स मे मातुल-
स्त्वां नेत्रीकुरुते विशिष्य च भवत्क्षोणीभरं वक्ष्यति।
तस्मात् त्वय्यधिकैव तस्य ममता व्यक्तत्वमापादिता
तेनास्मन्ममतालतापि भवते दद्यादभीष्टं फलम् ॥ २४ ॥

रत्नाङ्गदः — अभीष्टं नाम किं तत्।

युवराजः — सखे! रत्नाङ्गद! निबन्धनश्रवणेनैव तदपि स्पष्टीभविष्यति।

पाठकः —

यद्यद् भारतभूमिभागवलयं जित्वाद्य तत्तत्प्रभु-
स्वायत्तं विहितं त्वया करुणया मार्ताण्डभूवल्लभ!।
तत्तत् त्वत्सहजासुतस्य सुलभं कर्तास्मि कृत्वा यदा
सेतुस्नानविधिं मदीयचरणौ सेविष्यतेऽयं तदा ॥ २५ ॥

रत्नाङ्गदः — (सहर्षम्) सखे! वञ्चिकुलबालचिन्तामणे! भगवद्वचनेन स्पष्टीकृतमिदानीं भवदीयमातुलमहाराजमनोरथगतमभीष्टम्।

युवराजः — (सहर्षम्) ततस्ततः।

पाठकः —

इत्थं मञ्जुलपञ्जरस्थितमहाकेलीशुकीवाङ्मयीं
साक्षात् स्कन्दगिरं निशम्य मधुरां वञ्चिक्षमाखण्डलः।
पूर्णानन्दतरङ्गितात्मकतया चन्द्रोदयारम्भणा-
दुद्यद्वीचिसमूहसङ्कुलमहापाथोधिशोभां दधौ ॥ २६ ॥

रत्नाङ्गदः — निजापत्यश्रेयोलाभे केन वा न हृष्यते।

युवराजः — ततस्ततः ।

पाठकः —

हृष्टात्मा वञ्चिपृथ्वीपतिरथ रुचिरं कल्पयित्वा बहुभ्यो
मृष्टान्नं देवसेनापरिवृढनिकटे क्षोणिबृन्दारकेभ्यः ।
साष्टाङ्गं तत्पदाम्भोरुहयुगलनमस्कारमप्याकलय्य
द्रष्टा तस्मात् प्रतस्थे स्थलनवकपतीन् पद्मनाभांशभूतान् ॥

युवराजः — ततः ।

पाठकः —

वैकुण्ठनाथविजयासनभूमिपाल-
देवेशपङ्कजविलोचनचोरनाट्यान् ।
निक्षेपवित्तमकरायितकर्णपाश-
नाथान् प्रणम्य मुमुदे स महीमहेन्द्रः ॥ २८ ॥

तत्र श्रीनगराधिनाथनिकटे क्लृप्ताधिवासं सदा
ध्यायन्तं निभृतं तमेव बकुलस्रग्जालभूषोज्ज्वलम् ।
भक्तानां स्वमिवादिमं भगवतः श्रीपद्मनाभप्रभो-
राध्यानैकपरं प्रणम्य मुमुदे भक्तस्य तल्लक्षणम् ॥ २९ ॥

युवराजः — ततः ।

पाठकः —

साक्षाच्छ्रीपतिना निवेशित इव प्राकारशृङ्गोपरि
स्थाने दूरतरेऽपि जातमनयं सद्यः क्षिपन् वीक्षणात् ।
कल्याणं सकलक्षमातलजुषामुत्पादयन् सन्ततं
कौशेयाम्बरभूषणोज्ज्वलतनुः सन्दृश्यते पक्षिराट् ॥ ३० ॥

युवराजः — ततः ।

पाठकः —

भास्वद्विद्रुमदण्डखण्डविलसच्चोटीपुटोन्निर्गल-
च्छायापार्श्वयुगोद्गतस्मितरुचिस्पष्टोर्ध्वपुण्ड्राननम् ।
दिव्यस्रग्भरभूषणाम्बरभृतं तेजोनिधिं छन्दसा-
माकारं विहगाधिराजमकरोत् साक्षादमुं क्षोणिपः ॥

युवराजः — तदनु ।

पाठकः — एवं प्रार्थितवान् —

उद्यद्बालदिवाकरांशुपटलीदेदीप्यमानाञ्चल-
स्निग्धस्वच्छपटीलसन्निजकटीभास्वन्मणीमेखलः ।
निःश्वासानिलवेगधूतहसितज्योत्स्नानुषङ्गादिव
प्राप्तश्वेतिमकण्ठभागसुभगो मां पातु पक्षीश्वरः ॥ ३२ ॥

चञ्चत्पक्षसमुद्भवन्मरुदुरुस्फीतस्यदोत्कम्पित-
त्रैलोक्यासुरभोगिसङ्कुलचतुस्सिन्धुक्षमाभृद्गणः ।
बालार्कातपरागरूषितगिरिप्रख्यातभद्राकृतिः
पक्षीन्द्रप्रभुरस्खलद्गतिरयः पुष्णातु भद्राणि नः ॥ ३३ ॥

युवराजः — सखे ! रत्नाङ्गद ! श्रवणमात्रेण तादृशः स भगवान् विहङ्गराजः *धुरी मम स्फुरती(?) ।

पाठकः —

बभूव पुण्यभाक् पूर्वं भविष्यामि च पुण्यभाक् ।
साम्प्रतं पुण्यभागास्मि यद् दृष्टा विष्णुमूर्तयः ॥ ३४ ॥

---

* 'हृदि मम स्फुरति' इति पाठः स्यात् ।

एवमात्मकृतार्थत्वं प्रस्तुवन् पार्थिवोत्तमः ।
अपश्यत् तत् पुरं सर्वं धनाधिपपुरोपमम् ॥ ३५ ॥

युवराजः—वस्तुरामणीयकं कं वा दर्शने नोत्सुकयति ।

पाठकः—

ताम्रां पुण्यतमां सुनिर्मलजलां तत्तीरजां तां पुरीं
तत्रत्यानपि भूसुरान् सुरसमांस्तेजोभिरत्यद्भुतैः ।
अन्यच्चापि यदन्यदस्ति रुचिरं तत्रत्यमालोकयन्
श्लाघाधीनरसज्ञतामुदवहद् वञ्चिक्षमावल्लभः ॥ ३६ ॥

रत्नाङ्गदः—सखे ! युवराज !

तद्वस्तुश्रवणादेव परोक्षेऽपि सतां भवेत् ।
श्लाघा किमुत वक्तव्यं प्रत्यक्षे सति तादृशि ॥ ३७ ॥

युवराजः—ततः ।

पाठकः—

सद्यः प्रस्थाय राजा द्विजगणमिलितः शङ्खतीर्थाभिधानाद्
घट्टादुत्तीर्य ताम्रामतिमृदुलमरुच्चञ्चदम्भोभिरामाम् ।
तस्यामासक्तियोगादिव सततमदस्तीरभाजं दयालुं
कान्तीशाख्यं प्रपन्नाखिलजनशुभदं साम्बमूर्त्तिं सिषेवे ॥

युवराजः—तदनु ।

पाठकः—

गरुत्मान् वहते विष्णुं ककुद्मांस्त्वामुमापते ! ।
उभावपि युवामेकः सन्ततं मनसा वहे ॥ ३९ ॥

इति भगवन्तमुमाकान्तं प्रणम्य मार्गवशाद् वत्सलतया

पुनरप्यागन्तव्यमित्याह्वयन्तमिव स्थितं भगवन्तं वैकुण्ठनाथं सेवितुमुत्कण्ठितो महाराजः,

नृत्यत्खुराञ्चलदलद्धरणीविनिर्यद्-
धूलीवितानकलिताखिलदिक्पटीकम् ।
तुङ्गं तुरङ्गमधिरुह्य विहङ्गराज-
वेगं क्षणेन जनदृष्टिपथं व्यतीतः ॥ ४० ॥

युवराजः — ततः ।

पाठकः — तदनु कृतवैकुण्ठनाथसन्दर्शनप्रणामो भूत्वा तस्मात् प्रस्थाय,

श्रीशालिवाटीशपुरीं समेत्य
तत्रत्यभूमीसुरनिर्मलत्वम् ।
ताम्रापगां चापि समीक्ष्य राजा
तां रम्यतामेव शशंस भूयः ॥ ४१ ॥

युवराजः — ततः ।

पाठकः —

ताम्रावारि निमज्ज्य साधु विधिना श्रीशालिवाटीश्वरं
देवीं कान्तिमतीं च मौलिमणिभिर्नीराजयित्वा नृपः ।
तत्रत्यानपि भूसुरानभिमतैः सत्कृत्य वाञ्छाधिकं
संहृष्टोऽथ शुचीन्द्रसंज्ञकमगात् पुण्यं पुरारेः स्थलम् ॥ ४२ ॥

रत्नाङ्गदः — अहो कृतार्थता महाराजस्य ।

पाठकः —

कीर्तिः पुरस्तादथ वाद्यघोष-
स्ततः ससैन्याः पृतनाधिपास्ते ।

ततः स राजा नगरप्रवेशात्
क्रमादमी राष्ट्रजनानधिन्वन् ॥ ४३ ॥

(नेपथ्ये)

हन्त वयमपि चिरप्रवासादागतं विजयिनं महाराजं द्रष्टुमिच्छामः ।

युवराजः — (आकर्ण्य) सखे! रत्नाङ्गद! हन्त पौराणां महाराजसन्दर्शनौत्कण्ठ्यमस्मानप्यतिशेते ।

पाठकः — भवतु । निबन्धनस्यान्तिमं पद्यमवशिष्यते । तदाख्यायमानं श्रोतुमर्हन्ति भवन्तः ।

युवराजः — (ससम्भ्रमम्) ततस्ततः ।

पाठकः —

जित्वा दिशां वलयमागतमाप्तकामं
श्रीपद्मनाभकरुणापरिपक्त्रिमाङ्गम् ।
वञ्चीन्द्रमेनमवलोक्य सुखं भजध्वं
पौराः! समस्तपुरुषार्थमतो लभध्वम् ॥ ४४ ॥

(नेपथ्ये)

अहो अस्माकमभिलषितमेवार्थं प्रकाशयति निबन्धनसमापनमिदम् । भो रङ्गरञ्जक! भवता निबन्धनपठनाख्यानेन परितोषिताः स्मः । महाराजो निबन्धनकर्त्रेऽभिनवकालिदासाय यादृशं पारितोषिकं सम्प्रदास्यति तादृशं पारितोषिकं निबन्धनपाठकाय भवते प्रदास्यामः ।

पाठकः — (श्रुत्वा सहर्षम्) अहो महान् पौरजनानुग्रहः ।

(पुनरपथ्ये)

इत्थमस्मत्प्रतिज्ञावचनस्य प्रामाण्यमन्यथा मा भूदित्यस्माभिरेव स्थूलढाकस्य सूनुषु कश्चिदत्र प्रतिभूः क्रियते ।

(सर्व आकर्णयन्ति ।)

पाठकः — अहो महान् पौरजनानुग्रहाद्भुतवृक्षः स्वोत्पत्तिकाल एव फलवानभूत् ।

युवराजः— सखे! रत्नाङ्गद! पौरैरेवमाचरितं चेद् रङ्गरञ्जकः कृतार्थीकृतः ।

रत्नाङ्गदः — न केवलमेतावन्मात्रं, महाराजे भक्त्यतिशयश्च सफलीकृतः ।

युवराजः — सखे! रत्नाङ्गद! पुष्पोद्गमः फलपर्यवसाने किल श्लाघनीयो भवति ।

(ततः प्रविशत्यपटाक्षेपेण पुरुषः ।)

युवराजः — (पुरुषं विलोक्य रत्नाङ्गदं प्रति)

पञ्चाशत्कोटिविस्तीर्णपृथ्वीतलवणिक्पतेः ।
स्थूलढाकस्य पुत्रोऽयं श्रीकण्ठ इति विश्रुतः ॥ ४५ ॥
कलावान् निपुणश्चायमस्मन्मातुलसम्मतः ।
तदस्मत्सन्निधानेऽद्य लब्धुमर्हति मान्यताम् ॥ ४६ ॥

(रत्नाङ्गदः उत्थाय तं करे गृह्णन् रत्नास्तरणे निवेशयति ।)

युवराजः — अये श्रीकण्ठ! स्थूलढाकनन्दन! त्वदागमनं साफल्येन युज्यताम् ।

(श्रीकण्ठः पत्रिकां दर्शयति ।)

युवराजः — सखे! रत्नाङ्गद! पठ्यतामियं पत्रिका ।

रत्नाङ्गदः — (गृहीत्वा पत्रिकां वाचयति ।)

रङ्गरञ्जकनाम्नेऽस्मै पौरैर्यावत् प्रतिश्रुतम् ।
तावद् धनमहं दद्यामियत्तानिर्णये सति ॥ ४७ ॥
इति श्रीकण्ठढाकेन लिखिता पत्रिका स्वयम् ॥४७½॥

युवराजः — (आकर्ण्य)

श्रीमन्! श्रीकण्ठढाक! क्षितिपतितिलके प्रेमभाजामजस्रं
पौराणां प्रीतिहेतोः प्रदिशतु स भवान् पत्रिकां पाठकाय।
इत्यादिष्टः स दत्त्वा प्रमुदितहृदयः पत्रिकां तस्य हस्ते
निष्क्रान्तोऽभूद् युवक्ष्मातलत्वलमथनश्लाघितो ढाकसूनुः(?)*
[॥ ४८½ ॥

युवराजः — अये पाठकचूडामणे! मदीयो मातुलमहाराजः समुचितेन पारितोषिकप्रदानेन भवन्तं सम्भावयिष्यति । मया पुनरिदानीं किञ्चिद् दीयते ।

हाटकघटितं कटकं
मणिभिरनर्घैर्मनोहरं भवता ।
पाठककुलभूषण! भोः
सम्प्रति सङ्गृह्यतामेकम् ॥ ४९½ ॥

---

* इह कियांश्चिद् भागो लुप्तः स्यात् ।

(इति हस्तादुन्मुच्य स्वकीयमेकं वलयं पाठकहस्ते समर्पयति ।)

पाठकः — (गृहीत्वा सहर्षं कटकं करे धारयन्) स्वामिन् ! युवराजशिखामणे! गृहगमनाय मामनुमन्यस्व ।

युवराजः — गम्यताम् । अहमपि मातुलमहाराजसन्दर्शनेन चक्षुष्मत्तायाः फलमनुभविष्यामि ।

(इति सरत्नाङ्गदो निष्क्रान्तः ।)

तृतीयोऽङ्कः ॥

अथ चतुर्थोऽङ्कः ।

(ततः प्रविशति चेटी ।)

चेटी — (पुरोऽवलोक्य सहर्षम्) (क) कहं मह सही मरालिआ इदो एव्व आअच्छइ ।

(ततः प्रविशति मरालिका ।)

मरालिका — (ख) एसा मह पिअसही सारिआ समापदइ । सहि! सारिए! कहिं पत्थिदासि ।

सारिका — (ग) आणत्तह्मि देवीए — "हञ्जे सारिए! पवासादो आअदं विअइणं अय्यउत्तं उवआरेदुं मंगळिअं पुप्फाणुळेवणादिअं वत्थु उवणय" त्ति । तुमं उण कहिं पत्थिदा ।

मरालिका — (घ) आणत्तह्मि भट्टिणीए राअजणणीए—"हञ्जे मराळिए! दिट्ठिए मह वच्छो पदुमणाहकरुण्णेण भारअवरिसट्ठिए सव्वे णरन्दे विअयूण ससण्णो णअरं

(क) कथं मम सखी मरालिका इत एवागच्छति ।

(ख) एषा मम प्रियसखी सारिका समापतति । सखि! सारिके! कुत्र प्रस्थितासि ।

(ग) आज्ञप्तास्मि देव्या — "हञ्जे सारिके! प्रवासादागतं विजयिनमार्यपुत्रमुपचरितुं माङ्गलिकं पुष्पानुलेपनादिकं वस्तु उपनय" इति । त्वं पुनः कुत्र प्रस्थिता ।

(घ) आज्ञप्तास्मि भट्टिन्या राजजनन्या — "हञ्जे मरालिके! दिष्ट्या मम वत्सः पद्मनाभकारुण्येन भारतवर्षस्थितान् सर्वान् नरेन्द्रान् विजित्य

पविसिअ मं अहिवादेयुं दाणिं आअच्छइ। ता तुह्मे वि वच्छं पेक्खिदुं मह णिअडं आअच्छेत्ति मह पुत्तिआणं कहेहि"त्ति।

सारिका — (क) सहि! मराळिए! एसो अत्थो भट्टिणीए राअजणणीए ळेहादो विण्णादो आहो पुरिसमुहादो।

मरालिका — (ख) ळेहादो।

सारिका — (ग) सहि मराळिए! सव्वो पि ळेहत्थो तुए अवि सुणिओ।

मरालिका — (घ) अहइं।

सारिका — (ङ) ळेहत्थक्कमं कहेहि।

मरालिका — (च) सुणु कहइस्सं। आ दक्खिणादो समुद्दादो आ पूव्वादो आ पच्छिमादो आ हिमाळयादो अ मज्झ-परिवट्टिणो रण्णो विअयूण ताणं माणं धणं अ ओहरिअ ससण्णं सुइन्दखेत्तं पत्तं भट्टारअं दुन्दुभिघोसादो जंघिअ मुहादो विजाणिअ अमच्चजणो जुवराअं पुरोकदुअ सामिणं

ससैन्यो नगरं प्रविश्य मामभिवादयितुमिदानीमागच्छति। तद् यूयमपि वत्सं प्रेक्षितुं मम निकटमागच्छतेति मम पुत्रिकाः कथय" इति।

(क) सखि! मरालिके! एषोऽर्थो भट्टिन्या राजजनन्या लेखाद् विज्ञातः आहो पुरुषमुखात्।

(ख) लेखात्।

(ग) सखि! मरालिके! सर्वोऽपि लेखार्थस्त्वयापि श्रुतः।

(घ) अथकिम्।

(ङ) लेखार्थक्रमं कथय।

(च) शृणु कथयिष्यामि! आ दक्षिणात् समुद्राद् आ पूर्वाद् आ पश्चिमाद् आ हिमालयाच्च मध्यपरिवर्तिनो राज्ञो विजित्य तेषां मानं धनं चापहृत्य ससैन्यं शुचीन्द्रक्षेत्रं प्राप्तं भट्टारकं दुन्दुभिघोषाद् जाङ्घिकमुखाद्

दट्ठुं पुढमं पत्थिदो । तदो सव्वो पोरअणो जाणवदेहिं सह मिळिअ मंगळिअपुण्णकळसहत्थे बह्मणे पुरोकदुअ महन्तेण तोरत्तिओवआरेण सामिणं पञ्जुग्गमिअ णेत्तोसअं ळद्ध-वन्तो संवुत्तो ।

सारिका — (क) तदो तदो ।

मरालिका — (संस्कृतमाश्रित्य)

वाचा सूनृतया स वज्रिमघवा तं तं यथार्हं जनं
संप्रीणन् मृडकेशवौ नमसितौ दृष्ट्वा च देवावुभौ ।
आरुह्य स्फुरदिन्दुपट्टनिटिलं प्रोत्तुङ्गमश्वोरसं
प्राविक्षच्चलचीनपट्टरुचिरां तां राजधानीं निजाम् ॥ १ ॥

सारिका — (ख) तदो तदो ।

मरालिका —

उत्तुङ्गोज्ज्वलसौधपङ्क्तिविहरत्पौराङ्गनावर्चित-
स्मेरापाङ्गतरङ्गलाजकुसुमासारोपचारार्चितः ।
प्रत्यग्रागरुधूपसौरभभरं विद्योतयन् सिक्तसं-
मृष्टं राजपथं नृपोऽविशदसौ स्वं मन्दिरं सुन्दरम् ॥ २ ॥

सारिका — (ग) तदो तदो ।

विज्ञायामात्यजनो युवराजं पुरस्कृत्य स्वामिनं द्रष्टुं प्रथमं प्रस्थितः । ततः सर्वः पौरजनो जानपदैः सह मिलित्वा माङ्गलिकपूर्णकलशहस्तान् ब्राह्मणान् पुरस्कृत्य महता तौर्यत्रिकोपचारेण स्वामिनं प्रत्युद्गम्य नेत्रोत्सवं लब्धवान् संवृत्तः ।

(क) ततस्ततः ।

(ख) ततस्ततः ।

(ग) ततस्ततः ।

मरालिका — (क) अमच्चेसु पोरेसु अ 'अह्मेहिं एत्त एव्व वसन्तेहिं अहिणवकालिदासणिबंधणत्थं वाअक्खाणे रङ्गरंजअपाठए तत्तभवन्तस्स विअअविहूदि पच्छक्खीकिदा, अदो पुच्छिदव्वं णत्थि' त्ति वंचिउळसोमं पसंसंतेसु सो भट्टा पमोदभरिओ अहिणवकाळिदासं रंगरंजअं वि रअणरासीहिं समं एव्व अहिसिंचंतो परितोसिअ उइदेण दाणमाणाइसक्कारेण सप्पधाणं भडअणं संतोसिअ विसज्जिअ चिरकाळजिण्णं पदुमणाहमन्दिरं णवीकादुं सिप्पिसहस्साइं बहुवित्तेहिं परिक्कीअ भअवंतं आदिकेसवं अ पणमिअ परदेवअं पदुमणाहं पणमिदुं णिअजणाणिं अहिवादे(हिं ? उं) अ पुव्वस्सिं दिणे पत्थिदो ।

सारिका — (ख) तदो तदो ।

मरालिका — (ग) तदो ण किं वि । एआवंतो एव्व ळेहत्थो ।

(क) अमात्येषु पौरेषु च 'अस्माभिरत्रैव वसद्भिरभिनवकालिदासनिबन्धनार्थं व्याचक्षाणे रङ्गरञ्जकपाठके तत्रभवतो विजयविभूतिः प्रत्यक्षीकृता, अतः प्रष्टव्यं नास्ति' इति वञ्चिकुलसोमं प्रशंसत्सु स भर्ता प्रमोदभरितोऽभिनवकालिदासं रङ्गरञ्जकमपि रत्नराशिभिः सममेवाभिषिञ्चन् परितोष्य उचितेन दानमानादिसत्कारेण सप्रधानं भटजन सन्ताष्य विसृज्य चिरकालजीर्णं पद्मनाभमन्दिरं नवीकर्तुं शिल्पिसहस्राणि बहुवित्तैः परिक्रीय भगवन्तमादिकेशवं च प्रणम्य परदैवतं पद्मनाभं प्रणन्तुं निजजननीमभिवादयितुं च पूर्वस्मिन् दिने प्रस्थितः ।

(ख) ततस्ततः ।

(ग) ततो न किमपि । एतावानेव लेखार्थः ।

सारिका —(क) सहि ! मराळिए ! राअउळस्स विअअवुत्तन्तं सुणन्तीए मह अङ्गाइं हरिसेण तिमितिमाअन्ति । एदेण उण दुम्मणाएम्हि, जं भट्टा णिबंधणकत्तुणा अहिणवकाळिदासेण समीकदुअ पाठअं परितोसिअवन्तो ।

मरालिका —(ख) अहं उण अहिअं माणइदव्वो पाठअ त्ति तक्केमि, जेण णिबंधणकत्तुणो दुग्गहं हिअअं घत्तूण रंगे पउञ्जन्तेण सोदुजणमणाइ णन्दअंदेण णिबंधणं चरिदत्थीकिदं । अण्णहा तं काणणचन्दिआएदि ।

सारिका — (सासूयम्) (ग) किन्ति पाठअं सुअं इव पाठबळेण पउंजन्तं सळाहेसि । णिबंधणं अणुवजीविअ पाठओ णडो वा सब्भजणं कहं रसं अणुहावेइ ।

मरालिका — (सपरिहासम्) (घ) अपूवे मोदए व समप्पिअ रसावेउ । पाठओ णिबंधणकत्तुणो सिरं आरोहिअ विहारेउ, णिबंधणकत्ता वा पाठअस्स । अह्माणं किं कळहेण ।

(क) सखि ! मरालिके ! राजकुलस्य विजयवृत्तान्तं शृण्वत्या ममाङ्गानि हर्षेण तिमितिमायन्ते । एतेन पुनर्दुर्मनाये, यद् भर्ता निबन्धनकर्त्राभिनवकालिदासेन समीकृत्य पाठकं परितोषितवान् ।

(ख) अहं पुनरधिकं मानयितव्यः पाठक इति तर्कयामि, येन निबन्धनकर्तुर्दुर्ग्रहं हृदयं गृहीत्वा रङ्गे प्रयुञ्जानेन श्रोतृजनमनांसि नन्दयता निबन्धनं चरितार्थीकृतम् । अन्यथा तत् काननचन्द्रिकायते ।

(ग) किमिति पाठकं शुकमिव पाठबलेन प्रयुञ्जानं श्लाघसे । निबन्धनमनुपजीव्य पाठको नटो वा सभ्यजनं कथं रसमनुभावयति ।

(घ) अपूपान् मोदकान् वा समर्प्य रसापयतु । पाठको निबन्धनकर्तुः शिर आरुह्य विहरतु, निबन्धनकर्ता वा पाठकस्य । आवयोः किं कलहेन ।

सारिका — (क) अहइम् ।

(नेपथ्ये सकलकलो वाद्यघोषः ।)

(ख) णूणं भट्टा आअदो, जं तुरिअघोसो भत्तुदंसणकुदूहळाणं पोराणं कोळाहळो वि बह्मण्डकळाहं मुहरावेइ ।

(पुनर्नेपथ्ये)

भो भो जनाः! दूरमपसरत । यतः सामात्यः,

स्नातो धारितसद्दुकूलयुगलो हृद्योर्ध्वपुण्ड्रोज्ज्वलः
श्रृण्वन् वैणिकगीयमानभगवन्नामावलीरादरात् ।
आरात् पृष्टसुखप्रवासविजयः स्नातानुलिप्तैर्द्विजै-
र्देवो द्रष्टुमनन्तशायिनमयं प्राप्नोति तस्यालयम् ॥ ३ ॥

उभे — (आकर्ण्य ससम्भ्रमम्) (ग) हन्त भट्टा देवं दट्ठुं देवाळअं पविट्ठो, जदो रायदण्डहत्थाणं जणोहं ओसारअन्ताणं आघोसो सुणीअदि । अह्मेवि सामिणीणं णिओअं असुण्णं करह्म । (इतिनिष्क्रान्ते ।)

प्रवेशकः ।

(ततः प्रविशति यथानिर्दिष्टो राजा ।)

राजा — (सामोदम्)

(क) अथकिम् ।

(ख) नूनं भर्ता आगतः, यत् तूर्यघोषो भर्तृदर्शनकुतूहलानां पौराणां कोलाहलोऽपि ब्रह्माण्डकटाहं मुखरयति ।

(ग) हन्त भर्ता देवं द्रष्टुं देवालयं प्रविष्टः, यद् राजदण्डहस्तानां जनौघमपसारयतामाघोषः श्रूयते । आवामपि स्वामिन्या नियोगमशून्यं कुर्वहे ।

दिष्ट्या भारतवर्षवर्तिनिखिलक्षोणीश्वरा निर्जिता
दिष्ट्यास्माभिरनुत्तमो धननिधिर्भैरूपमः सम्भृतः ।
दिष्ट्या पङ्कजनाभसद्म परमुद्धारिष्यते पूर्ववद्
दिष्ट्या नाथमहाभिषेकविधिना साफल्यमप्याप्यते ॥

(इति भगवन्मन्दिरप्रवेशं नाटयन् तन्मन्दिरं त्रिः परिक्रम्य भगवत्सन्निधिमुपेत्य साञ्जलिपुटं पश्यन्)

उत्पत्तौ जगतां पुरा कृतवते नाभीसरोजाद् विधिं
रक्षायै जगतां पुरा विदधते स्वांशावतारं मुहुः ।
संहारे जगतां स्वकीयनिटिलाद् रुद्रं क्रुधा स्रक्ष्यते
तस्मै ते प्रणतोऽस्मि शेषतल्पिमे स्वापच्छलाज्जाग्रते ॥

(इति साष्टाङ्गप्रणिपातं प्रणम्योत्थाय साञ्जलिपुटम्)

मया सामिकृतं स्वामिन्! यद्यद् भगवतोदितम् ।
मया तोकेन तत् सर्वं कारयन् पारय प्रभो! ॥ ६ ॥

(इति प्रार्थ्य) अस्य महीयसो मन्दिरस्य नवीकरणं प्रारभे । यावन्नवीकरणं भगवानित उत्तरपूर्वायां दिशि प्राकारपरिधेरन्तर्निर्मितम् अर्भकमोकोऽनुगृह्णातु । (इति विज्ञाप्य भगवत आज्ञामिव शेषां परिगृह्य बहिर्निर्गत्यास्थानमण्डपोपवेशं नाटयन् वेत्रपाणिं पार्श्वस्थं पुरुषं विलोक्य) बाभ्रव्य! भगवन्मन्दिराधिकारिणमानय ।

बाभ्रव्यः— यदाज्ञापयति देवः । (इति निष्क्रम्य कर्मन्दिना सप्तभिर्ब्राह्मणैश्च सह प्रविशन्) इत इतो भगवन्तः ।

ब्राह्मणाः—

कृतप्रयत्नैर्भूपालैः प्राचीनैर्यन्न साधितम् ।
भगीरथादृतेऽस्माद् वा कोऽन्यस्तत् साधयिष्यति ॥ ७ ॥

(इति सप्रश्रयमुपसृत्य) राजन्! विजयस्व ।

राजा — (ससम्भ्रममुत्थाय कर्मन्दिनं नमस्कृत्य) इत आसतां भगवन्तः ।

(ब्राह्मणा आसिकां नाटयन्ति ।)

राजा — (साञ्जलिबन्धम्) भगवन्मन्दिरं नवीकर्तुमनुजानीत । तदनुरूपाणि चानन्तरकरणीयानि च प्रवर्तयत ।

ब्राह्मणाः — भवतु । तथा कुर्मः ।

राजा — (पुरुषं प्रति) बाभ्रव्य ! शिल्पिनामाचार्यमानय ।

पुरुषः — (तथेति निष्क्रम्य शिल्पाचार्येण सह प्रविश्य) इत इतः शिल्पाचार्यः ।

शिल्पी —

मयस्त्वष्टा च लोकेऽस्मिञ् शिल्पविद्याप्रवर्तकौ ।
तयोरेकं विवर्तं मां को वा न बहुमन्यते ॥ ८ ॥

(इति सश्लाघमुपसृत्य) विजयतां महाराजः ।

राजा — अभिनवविश्वकर्मन्! इतः पञ्चभिरहोभिर्भगवदायतनं यथा निर्मितं भवति तथा शिल्पिसहस्रं प्रयातय । एतं धननिधिं च यथेष्टमुपयोजय । (इति धननिधिं पुरुषमुखेन समर्पयति ।)

शिल्पी — यदाज्ञापयति महाराजः । (इति धनराशिमादाय) पञ्चभिरहोभिः कथं राजनियोगो निर्वर्तनीयः (इति विमृशन् निष्क्रान्तः ।)

राजा — (पुरुषं प्रति) बाभ्रव्य ! कार्यकारानानय ।

बाभ्रव्यः — यदाज्ञापयति । (निष्क्रम्य कार्यकारैः सह प्रविश्य) इत इतः कार्यकाराः ।

कार्यकाराः—

कार्यकाराः शतं सन्तु राज्ञां तैः किं यशो भवेत् ।
साधयन्ति च ये कार्यं ते यूयं सम्मता मम ॥ ९ ॥

इति नः श्लाघते नित्यं वञ्चिराजन्यशेखरः ।
तदर्थं मत्प्रयासानामभिज्ञाता महाप्रभुः ॥ १० ॥

(इति सप्रमोदमुपसृत्य) विजयतां देवः ।

राजा—हे कार्यकाराः! इतः षष्ठादह्नः प्रभृति त्रिभिरहोभिर्महाभिषेकसामग्रीः सम्पादयत । इतो नवमेऽह्नि महाभिषेको भविता ।

कार्यकाराः—यदाज्ञापयति देवः । (इति परिक्रम्य) कथं त्रिभिरहोभिः सामग्री सम्पादनीया । (इति विमृशन्तो निष्क्रान्ताः ।)

ब्राह्मणाः— राजन्! वयं तान्त्रिकप्रवरं सोमयाजिनं नियुज्य भगवतोऽर्भकौकःप्रवेशं कारयिष्यामः ।

राजा—गम्यताम् । अहं च यावन्महाभिषेकं धृतनियमो भगवत्पादावनुचिन्तयन् श्रीपादतीर्थतीर्थीकृतं निवेशनं प्रविश्य निवत्स्यामि ।

ब्राह्मणाः—इदमनुरूपं प्रभोः । (इति प्रशस्य निष्क्रान्ताः ।)

राजा—बाभ्रव्य! श्रीपादभवनप्रदेशमार्गमादेशय ।

बाभ्रव्यः—इत इतो महाराजः ।

राजा—(तेन सह श्रीपादान्तःप्रवेशं नाटयन् सर्वतो विलोक्य) अहो विविक्तरमणीयतया तपश्चरणयोग्यमिदं स्थानम् ।

बाभ्रव्यः — अत एव हि देवस्य श्रीमती सोदरी निरन्तरव्रतोपवासनियमतपःसम्पदधिष्ठानभूततया भूयोऽपि देदीप्यमानदेहश्रीः महिम्ना नाम्ना च महीधरेन्द्रनन्दिनीमनुस्मारयन्ती काङ्क्षितदाने कल्पलतिकामतिवर्तमाना मूर्तिमती श्रीपद्मनाभाश्रयभक्तिरिव सदानन्दमुद्वेलयन्ती श्रीपादनिकेतनाराममध्यमिदमध्यास्ते । इयं किल श्रीपद्मनाभभक्तिलतालवालमानसतया भगवतस्तत्तल्लीलावतारविशेषचरितप्रतिपादकपुराणजालपठनाकर्णनसफलीकृतकर्णयुगलोपरिविन्यस्त-मृदुलतुलसीमञ्जरीसौरभ्यमाघ्रातुमिव तदुपान्तं नयनभृङ्गीमुपनयन्ती करकमलवलमानतुलसीमणिमालया भगवन्नामावलीमन्त्रमावर्तयन्ती पद्मनाभपदारविन्दसन्ततभजनाय दिवोऽवतीर्णा काचन सिद्धतपस्विनीव विराजते । किञ्च, दोहलविशेषसमर्पणसन्ततकुसुमितनानाविधलतावलीपरिवेष्टनसंशोभमानतरुवरमण्डिते दर्शनीयतमेऽस्मिन्नारामे हैमन्तिकवासन्तिकग्रैष्मिकवार्षिकशारदिकानि शैशिराणि च विविधानि कुसुमानि तुलसीपल्लवजालानि च मालारूपतया स्वकीयकरकमलाभ्यामेव ग्रथितानि, अन्यानि विप्रकीर्णानि नानाविधानिपुष्पनिकरजालानि च भगवच्छ्रीपद्मनाभस्य नृसिंहरामभद्रश्रीकृष्णप्रमुखानां तद्विभूतिभूतानां चालङ्करणाभ्यर्चनार्थं पृथक् पृथक् प्रतिदिनं प्रददातीति ।

राजा — अये बाभ्रव्य! सेवकोऽपि भक्तिरसं जानीषे ।

बाभ्रव्यः — देवस्य परिग्रहमहिम्ना को वा भक्तिरसानन्दं न विन्दते ।

राजा — (स्वगतम्) अस्मत्प्रेमैकभाजनस्य रमणीयगुणगणाकरस्य मदीयकुलनन्दनस्य वत्सश्रीरामवर्मणः अध्वरानलस्यारणिरिवाविर्भावहेतुरियमभवत् । अनेनापि हेतुना नितान्तप्रेमास्पदमियमास्ते । (प्रकाशम्) बाभ्रव्य! क्षणमारामशोभां पश्यामः । (इति बाभ्रव्येण सह परिक्रामन् परितो विलोकयति ।)

(नेपथ्ये घण्टारवः ।)

राजा — (कर्णं दत्त्वा सहर्षम्) नूनमिदानीमस्मदाचार्यस्तान्त्रिकप्रवरः सोमयाजी अर्भकमन्दिरस्थितस्यारविन्दनाभस्य पूजाविधिमारब्धवान्, यदयं घण्टाघोषः श्रूयते ।

बाभ्रव्यः — कथमिदानीं प्रवृत्तिनिवेदकः कश्चिदपि नायातः ।

(ततः प्रविशति तान्त्रिकप्रवरशिष्यः ।)

शिष्यः — आदिष्टोऽस्मि गुरुणा — "हे मेषाण्ड! वक्रनासे देवावेशप्रकारं महाराजाय निवेदये"ति । (परिक्रम्य) अहो महाराजे भगवतः श्रीपद्मनाभस्य पक्षपातातिशयः । यतः पञ्चाहेन मन्दिरनिर्माणनियोगं त्र्यहेण सम्भारसम्भरणनियोगं च भक्तस्य सत्याकर्तुं वक्रनासे त्वष्टारमावेशितवान् । (उपसृत्य) महाराज! विजयस्व ।

राजा — मेषाण्ड! कुतस्त्वम् ।

शिष्यः — उपाध्यायेनादिष्टोऽस्मि "देवसन्निधौ देवावेशप्रकारं महाराजाय विज्ञापये"ति ।

राजा — (सविस्मयम्) कीदृशो देवावेशप्रकारः ।

शिष्यः — अर्भकौके भगवन्तं प्रवेश्य नमस्यन्तमुपाध्यायं परिचरन् वक्रनासः,

अकस्मात् कम्पमानाङ्गो निष्पन्दाक्षि विलोकयन् ।
आधावन् प्रतिधावंश्च मुहुः प्राक्रोशदुच्चकैः ॥ ११ ॥

राजा — (सविस्मयौत्सुक्यम्) ततस्ततः ।

शिष्यः—कस्त्वमित्युपाध्यायेन पृष्टः "त्वष्टाहं पुष्टकरुणेन भगवता आदिष्टोऽस्मि । अयि विश्वकर्मन्! स्वांशेन शिल्पिसहस्रं प्रविश्य पञ्चभिरहोभिर्नामकमन्दिरं निर्मापयन् वत्सस्य निदेशं सत्याकुरुष्व। कार्यकारमतानुसारेण वसुन्धरापि सर्वामभिषेकसामग्रीं धोक्ष्यतीति कार्यकारान् प्रति दिनत्रयेण सामग्रीसम्पादननियोगोऽपि वत्सस्यावितथो भविष्यतीति भगवतादिष्टमिममर्थं युष्माकं विज्ञापयितुमिमं ब्राह्मणमाविक्षम्" इति वदन्नेव वक्रनासो भगवत्सन्निधौ प्रणिपतितवान् । अयमावेशप्रकारः ।

राजा — (साञ्जलिबन्धम्) नमो भगवते ।

शिष्यः—उपाध्यायनिकटं गमिष्यामि । (इति निष्क्रान्तः ।)

राजा — बाभ्रव्य ! अत्र निवसता भगवच्चरणारविन्दानुध्यानपरेण मया सप्त दिनानि नेतव्यानि । तदेतदन्तरे न कश्चिदत्र प्रवेशयितव्यः ।

बाभ्रव्यः — शिरसि धृतं साधु देवस्यानुशासनम् ।

राजा — (सामोदं परिक्रम्य पुरोऽवलोक्य)

नाभिप्रदेशसंफुल्लमहानालीकभासुरः ।
तटाकोऽयं विभात्येष पद्मनाभ इव प्रभुः ॥ १२ ॥

तदेतस्य परिसरे बालाशोकमूलालवालोपान्ते मणिघटित-कुट्टिमतले उपविशामि ।

बाभ्रव्यः — देवस्य शासनेन न कश्चिदत्र प्रत्यूहो भविता ।

राजा —

उत्तुङ्गवीचिघाटीभिरुद्धतोऽपि पयोनिधिः ।
वेलां न लङ्घते तद्वद् राजाज्ञां राजसेवकः ॥ १३ ॥

बाभ्रव्यः — बाढमनुगृहीतोऽस्मि ।

राजा — (उपविश्य सुचिरं ध्यात्वा नेत्रे उन्मील्य सर्वतो विलोक्य साश्चर्यम्) हन्त हन्त भगवति गाढानुसन्धानमाकलयतो मम तानि सप्त दिनानि निमिषार्धमिव व्यतीतानि ।

बाभ्रव्यः — (उपसृत्य) पञ्चाहेन निरवशेषनिर्मिते भगवदालये वृत्तान्तविज्ञापनायागतः शिल्पाचार्योऽपि देवस्याज्ञया न प्रवेशितः प्रतिनिवृत्तश्च ।

(राजा बाभ्रव्यं शिरसा श्लाघते ।)

(नेपथ्ये)

आशामण्डलपातिनः प्रविततान् रश्मिप्रतानान् निजान्
बिभ्राणो निपुणोपधार्यसविधच्छिन्नाभ्रविभ्राजितः ।
प्राप्तो मध्यमयं दिवो दिनमणिर्दृश्येत चेत् सन्ततं
दूरोद्यच्चतुरन्तदीप्रपरिधिस्तस्योपमामर्हति ॥ १४ ॥

राजा — सावशेषमिव वैतालिकवचनम् ।

(पुनर्नेपथ्ये)

त्वष्ट्रा शिल्पिसहस्रभावमयता सृष्टस्य हेमच्छदि-
श्छेदैरुज्ज्वलितस्य कैटभरिपोरुत्सेधिनो वेश्मनः ।
सौवर्णेन परिष्कृतस्य महता सालेन रत्नालिभिः
प्रत्युप्तस्य दिविस्पृगस्य शिखरं हैमं यदालोक्यते ॥१५॥

राजा — हन्त वैतालिकोऽयं माध्याह्निकवेलामावेदयन्निव भगवन्मन्दिरनिर्माणपरिसमाप्तिं द्योतयति । तद् द्रक्ष्यामस्तावत् । (इति अमात्यैः सह सकुतुकं श्रीपादानिकेतनान्निर्गत्य प्राकारान्तः-प्रवेशं नाटयन् भगवन्मन्दिरमालोक्य सविस्मयप्रहर्षकुतूहलम्) अहो अहो दिव्यमपराजितपुरमेव वैकुण्ठादिहावतीर्णमिति निश्चिनुमः । कुतः शिल्पिनामीदृशी निर्माणनैपुणी, कुतो वा विश्वकर्मणः तथाहि —

त्वष्टा शिल्पवतां पुरस्सर इति प्रागल्भ्यमालम्बतां
तादृग्वा ककुभामधीशभवने तत् कौशलं दृश्यताम् ।
स्वोद्भूतेऽनुपमेऽपराजितपुरे शिल्पिप्रसङ्गः कथं
स्यादेतन्नवनिर्मितं भगवतस्तस्मादभिन्नं गृहम् ॥ १६ ॥

अमात्याः — सत्यमाह देवः । यत् श्रुतिगणसन्दर्शितनिस्सीमनिजसौन्दर्यस्वरूपं तद् दिव्यमपराजितं नाम पुरं सम्यगनेन प्रत्यभिज्ञाप्यते ।

राजा — अतः शिल्पिसहस्रप्रविष्टत्वष्टृसहस्रप्रयत्नविशेष इति व्याजमात्रमस्मत्परदेवपद्मनाभसङ्कल्पस्य । (इत्यालयं विलोकयन्) क शिल्पिनामाचार्यः ।

(प्रविश्य)

शिल्पाचार्यः — (सविनयमुपसृत्य) अहमस्म्यनुशासनीयः ।

राजा — अपि निर्मितो निरवशेषेण भगवदालयः ।

शिल्पी — कथमाकलयेदायुष्मतो देवस्य तादृगाज्ञा निर्मातव्यावशेषम् ।

राजा — तर्हि पुरो गच्छन् सन्दर्शय स्वकीयं शिल्पसौन्दर्यम् ।

शिल्पी — यदाज्ञापयति देवः । (तथा दर्शयति) ।

सान्द्रस्निग्धसुधानुलेपहसितैर्द्वाराननैर्भास्वर-
स्तत्र स्फाटिकवेदिसुस्थजनतावेदार(विः ? वैः) संयुतः ।
सौवर्णस्फुरदंशुकावृततनुः श्रीपद्मनाभालय-
प्राकारोऽयमहो महान् विधिरिव प्रोद्भासते भोः प्रभो ! ॥

राजा — हन्त भगवदालयप्राकारे चतुर्मुखब्रह्मसादृश्यं सम्यगुत्पादितम् ।

अमात्याः — वयं चैवमुत्पश्यामः —

प्राकारोऽयमनल्पनीलमणिभिः पश्यन् हसन् स्फाटिक-
ज्योत्स्नाभिः परिकम्पयन् निजाशिरो वल्गद्गु हर्म्याकृति ।
द्वारागच्छदुपस्थितप्रविचलत्पौरारवच्छद्मना
प्रस्तौत्येव पुरन्दरादिविनुतं देवं रमानायकम् ॥ १८ ॥

राजा —

जीवरत्नघटितान्तरो महान्
सच्चिदात्महरिमन्दिरावृतिः ।
हेमसालमणिरेष भाषते
द्वारिचारिजनतारवच्छलात् ॥ १९ ॥

अमात्याः — सर्वात्मसन्निकर्षे किमेतदाश्चर्यम् ।

शिल्पी — इत इतो देवः ।

(राजा अनुगच्छति ।)

पाकशाला विशालेयं पाकोऽप्येतत्प्रवेशनात् ।
पाकविद्याविलासेन भवेत् पाकारिजाग्रजः ॥ २० ॥

राजा — अस्त्येव किल स्थलविशेषमहिमा ।

अमात्याः — समग्रसाधनचमत्कृतिमत्याः पाकशालायाः समर्थपुरुषानुष्ठेयपाकसुकरताहेतुत्वे महिमेति देवेनोपचारः क्रियते ।

राजा — तथा न मन्तव्यम् । वाराणसीवास्तव्यता केवलं कैवल्यदेति न किं वो वस्तुतोऽवगतम् ।

अमात्याः — हा विस्मृतमहो प्रमा(दे ? दोऽ)यमस्माकं यदेतदपि पद्मनाभीयम् ।

शिल्पी — इत इतो देवः । (बाहुमुद्यम्योर्ध्वमवलोक्य)

नताभिमतकारिणं मुरहरं हरिं सेवितुं
गतागतमभीप्सतामिह समस्तनाकौकसाम् ।
निकाममधिरोपिता मणिमयीयमारोहणी
सुगोपुरनवाभिधा सुरसरित्तटव्यापिनी ॥ २१ ॥

राजा — साधु शिल्पिन् ! (शिल्पिन् ?) । करकौशलादप्यधिकं ते वाचि कौशलम् । (इत्यमात्यान् विलोकयति ।)

अमात्याः —

सर्वजगद्भरभर्तुः पङ्कजनाभेर्धुरीह निर्लज्जः ।
विलसति गोपुरमूले कृत्रिमपुरुषः समस्तवाहीव ॥ २२ ॥

राजा — (विलोक्य सविस्मयम्) इदानीमपि भगवति पद्मनाभे स्पर्धया समागतमेतद्रूपेण तमेव पौण्ड्रकवासुदेवं मन्ये।

अमात्याः — (सश्लाघाशिरःकम्पम्) हन्त देवेन सम्यगुत्प्रेक्षितम् ।

शिल्पी — इयमपि गोपुराभ्यन्तरालसरणिर्देवस्य विलोचनमरीचिवीचिकाचामरोपचारमर्हति ।

राजा — (समीक्ष्य सानन्दम्)

साष्टाङ्गं प्रणिपातमाकलयतां श्रीपद्मनाभप्रभो-
देवानां मकुटीतटस्फुटलसद्रत्नप्रवालैरियम् ।
प्रत्युप्तेव निसर्गरत्नखचिता विद्योतिताशामुखा
गोभिर्गोपुरशेखरस्य सरणिः संराजते सर्वदा ॥ २३ ॥

शिल्पी — (बाहुना निर्दिश्य)

सेवार्थमागतसमस्तसुरेन्द्रवृन्द-
सौख्यप्रवेशनकृते क्षितिपालमौले ! ।
विस्तीर्णनिर्मितमिदं मणिगोपुरस्य
द्वारं विलोकय सुमेरुगुहाप्रकाशम् ॥ २४ ॥

राजा — औचित्यं न जहाति ते शिल्पकौशली ।

शिल्पी —

विशालनीलाश्ममयं कवाटं
मध्यस्फुरत्स्वर्णदलाभिरामम् ।
पयोधिकन्यापरिरब्धविष्णु-
वक्षःस्थलप्रोज्ज्वलमेतदास्ते ॥ २५ ॥

राजा — (समीक्ष्य साञ्जलिपुटम्) धन्योऽस्मि सम्मिलितयोरस्मत्स्वामिनोः सादृश्यदर्शनेन ।

शिल्पी — (अन्यच्च हस्तेन निर्दिश्य)

कवाटमिदमद्भुतैर्मरतकप्रवालैः कृतं
सुवर्णकमलाङ्कितं लसति पद्मनाभप्रभोः ।
उरःस्थलमिवाधिकं कलयते मुदं मानसे
तदेहि धरणीपते ! कलय नेत्रयोरुत्सवम् ॥ २६ ॥

राजा — (नेत्रकमलाभ्यामभ्यर्च्य करसम्पुटकमलमुकुलमुत्तंसयन्) अयि शिल्पिमणे ! तावकी शिल्पकौशली मामकीं भक्तिवल्लरीमुत्पल्लवयति ।

शिल्पी — इत इतः ।

कदाचिद् विश्लेषः प्रणयकलहात् सम्भवति चेद्
रमाकान्तक्षोण्योः सुखशयनहेतोः पृथगिह ।
तयोः क्लृप्ते ह्येते शिशिरकरकान्ताङ्कणभुवौ
विलोक्याभ्यां राजन् ! कलय नयनानन्दमधुना ॥ २७ ॥

राजा — युज्यतेऽस्मत्स्वामिनोरेव तादृग्वेलायामेतद्रामणीयकम् ।

शिल्पी — इयमधिरुह्यताम् । (इति करेण निर्दिशन्)

स्फाटिकीयमधिरोहणी स्वतो
निर्मला कलुषितेन्द्रनीलतः ।
तावकीनपदपांसुसङ्गते-
र्गौतमीव समयं प्रतीक्षते ॥ २८ ॥

राजा — (स्वगतम्) यदयं पात्रनत्वेनापि श्रीरामभद्रेणाभेदं मयि व्यङ्ग्यार्थेन व्यपदेशयन् सोपानारोहणे मनः प्ररोचयति । (प्रकाशम्) तर्ह्यारुह्य विलोकयामः । (इति तदारोहणं नाटयति । सर्वेऽपि राजानमनुसरन्ति ।)

शिल्पी — जयतु देवः ।

महीधरसमुन्नतिप्रथितगोपुरोदञ्चिते
मनोहरमहोमये महति दर्पणाभे तले ।
सजङ्गमसरोजतां दिशतु देव! ते लोचनं
यदत्र रमते रमा हरिकटाक्षलक्षीकृता ॥ २९ ॥

(राजा विलोक्य हरिनामधेयश्रवणजनितभक्त्यतिरेकपारवश्यं वहन् मुहूर्तं ध्यायति ।)

इतरे — (राजानं पश्यन्तो जनान्तिकम्) अहो देवस्य भगवति भक्तिरतिप्रह्लादा ।

गात्राणि यत् पुलकितानि निकाममस्य
नेत्रे च निह्नुततरे प्रदमाश्रुपूरैः ।
वक्त्रं प्रफुल्लकमलोदरलोभनीयं
चित्रार्पितं वपुरहो हरिभक्तिरेषा ॥ ३० ॥

अन्यप्दयनुस्मरणीयमिहाश्चर्यमास्ति । यद् देवे श्रवणमात्रेण हरिमन्त्रस्य सद्यः षट्कर्मसिद्धिकारिता । तथाहि —

उच्चाटितं दुरितमुन्माथितं मदादि
प्रद्विष्टमिन्द्रियसुखं हृदि कृष्ट आत्मा ।
आनन्दतः स्तिमितमान्तरमाशु वश्यं
देवस्य जातमखिलं हरिमन्त्रसिद्ध्या ॥ ३१ ॥

अहो फलवती जातास्मज्जनिरपि, यदीदृशभक्तिविशिष्टेन देवेन साचिव्यपदे निवेशिताः स्मः। (इति सहर्षस्तिमितलोचनास्तिष्ठन्ति।)

(राजा क्रमेण ध्याननिवृत्तो नेत्रे समुन्मील्य सर्वान् पश्यति।)

शिल्पी —

एतस्याप्युपरितलं महार्हरत्नै-
र्व्यालीढं विततमरीचिवीचिजालैः।
आगच्छन् मृदुलमरुत्किशोररम्यं
हर्म्यश्रीधरमरमर्चयेत देवः॥ ३२॥

राजा — (सकुतूहलम्) तर्हि द्वितीयमपि गोपुरोपरितलं विलोकयामः। (इति तदारोहणं कृत्वा विलोक्य)

इदं तलमतीव मे दिशति नेत्रयोरुत्सवं
परार्धमणिशोभितं विविधरत्नमालाकुलम्।
विशिष्य महतीं श्रियं धुरि दधाति तेनाधुना
धिनोति मम मानसं मुररिपोरुरस्तौल्यतः॥ ३३॥

(इत्यपाङ्गवलनेनामात्यानानन्दयति।)

अमात्याः — उचितमुपलक्षितं देवेन। तथाहि—

दिव्यहारमणिकान्तिपयोधे-
रुद्यता लसति कापि रमात्र।
कौस्तुभोपमितरत्नमिहास्ते
भक्तिमाकलयितुं क्षममेतत्॥ ३४॥

राजा — (पुनश्च श्रवणाद् द्विगुणितानन्दसन्दानितान्तःकरणः क्षणं ध्यात्वोन्मील्य) शिल्पिमणे! इतोऽपि नेत्रोत्सवमुपरितलारोहणेनाप्याकलय। (इति तृतीयतलारोहणं नाटयति।)

शिल्पी — (साञ्जलिबन्धं करेण निर्दिशन्)

वोढा जगच्चित्रकृतस्वमूर्तिः
स गूढपात्प्रौढमनोज्ञतल्पे ।
बाढं भवद्भक्तिदिदृक्षयेव
निगूढभावो हरिरत्र शेते ॥ ३५ ॥

(राजा सविनयसम्भ्रमं कृताञ्जलिपुटः चित्रगतं भगवन्तं विलोक्य प्रहृष्यन् ध्यानगतस्तिष्ठति ।)

इतरे — (ध्यानाधिरूढं देवं दृष्ट्वा जनान्तिकम्)

चित्तधृतं चित्रगतं चिन्मयमीशं विलोक्य देवोऽयम् ।
भक्तिनियन्त्रितचित्तो भेदमपश्यन्न वाचिकं वक्ति ॥ ३६ ॥

शिल्पी — (राजानं विलोक्य स्वगतम्)

भक्त्युद्रेकस्तब्धीभूतं कीर्तिस्तोमोच्छ्रायस्वच्छम् ।
देवं दान्तं चित्रोदञ्चद्गात्रं कञ्चित् सिद्धं मन्ये ॥ ३७ ॥

राजा —(क्षणं निमील्य भक्तिरसमनुभूयोन्मीलनावलोकनचन्द्रिकया सर्वान् शिशिरीकुर्वन्)

विद्युन्मालावीताम्भोदभ्राजिष्णुं तं विष्णुं जिष्णुम् ।
वीक्ष्यामोदाम्भोधौ मग्नो व्यस्मार्षं वै बाह्यार्थम् ॥३८॥

अमात्याः — अहो देवस्य भक्तिमहिमा ।

शिल्पी — (उपसृत्य सविनयम्)

दुकूलनवचन्द्रिकाप्रचुरशोभया दन्तुरे
सुमौक्तिकमणीगणप्रबलतारकाभासुरे ।
इतोऽपि बहुसुन्दरे रुचिरगोपुराभ्यन्तरे
विलोचनचकोरकौ कलयतां स्वलीलां विभो! ॥ ३९ ॥

राजा — (सकुतूहलम्) युष्मत्करकौशलसन्दर्शने बद्धश्रद्धा वयं तथा कुर्मः । (इति तदुपरितलारोहणं च नाटयति । इतरेऽप्यनुसरन्ति ।)

शिल्पी —

अत्र विष्णुपदभक्तिपावनं
देवमेति शिशुरेष पावनः ।
सेवितुं किल कृतोपदोऽधुना
पद्मतीर्थकमलोत्थसौरभैः ॥ ४० ॥

राजा — (स्पर्शमभिनयन् विलोक्य)

चञ्चन्मारुतपोतकाकुलमहामुक्तासरोदञ्चित-
क्षौमोल्लोचकमध्यभासुरमहानीलप्रभामञ्जरी ।
वल्गद्वीचिसमूहसान्द्रकलशाम्भोधिस्फुरत्पन्नग-
प्रौढोपर्यधिशायिशार्ङ्गधनुषः सौन्दर्यमालम्बते ॥ ४१ ॥

तदेतदालोकनेनापि भगवति हरौ भक्तिरुज्जृम्भते । इति सप्रश्रयमञ्जलिपुटं कृत्वा (उन्मी ? निमी)ल्य क्षणं ध्यायति ।)

अमात्याः — (जनान्तिकम्) अहो देवस्य मानसं सर्वदा भगवत्पदकमलामोदमेदुरम् । यतः,

यत्र यत्र हि सादृश्यं देवः पश्यति शार्ङ्गिणः ।
तत्र तत्र भजत्येष तद्भक्तिविवशात्मताम् ॥ ४२ ॥

राजा — (ततश्चोन्मील्यावलोक्य सर्वान्)

अस्मिन् क एष समुदेति चिराय भावो
नाना(श्रि ? श्र)यः परमहर्षविशेषरूपः ।
इत्याकलय्य हृदये सुनिवेशितश्चेद्
युष्माकमप्युपचिता हरिभक्तिरेषा ॥ ४३ ॥

अमात्याः —यद्येवं देवेन वयमप्यनुगृहीताः ।

(राजा शिल्पिनमालोकयति ।)

शिल्पी — (सप्रश्रयम्)

देवेन चन्द्रशालेयं गोपुरस्य विलोक्यताम् ।
यदालोकप्रसङ्गेन दृश्यन्ते सकला दिशः ॥ ४४ ॥

राजा — (सकुतूहलातिरेकम्) तर्हि चन्द्रशालामधिरोहामः ।

(इति सर्वैः सह चन्द्रशालाधिरोहणं नाटयति ।)

शिल्पी —

प्रथममिह विभो! मनोज्ञघण्टा-
मणिमिममक्षिपुटाञ्चितं कुरुष्व ।
यदुदितघननादभावनायां
सकलकलापरिविन्दुता विभाति ॥ ४५ ॥

राजा — (साश्चर्यं पद्यरसमनुभूय स्वगतम्) अयं न मानुषः शिल्पी भवितुमर्हति ।

यत्त्वस्य वैदुष्यविशेषभङ्गी-
मिश्रा गिरः शिल्पकलाप्रसङ्गात् ।
आविर्भवन्त्यो हृदयं ममैता
धिन्वन्ति भक्तिं द्रढयन्ति विष्णौ ॥ ४६ ॥

(सम्यगनुचिन्त्य) अस्त्येत्र किलैतन्मूलम् । भगवदाज्ञया शिल्पि-सहस्रं प्रविश्य कृतकृत्येन विश्वकर्मणा विश्वप्रियाधानविधि-दीक्षितेन तूर्णमेकीभूय शालामिव विशालामेतस्य शेमुषीं प्र-विश्य अस्मान् प्रति निजविद्यावैदुष्यप्रकटनरूपमेव याज-

मानमनुतिष्ठता भवितव्यम् । अन्यथा कथमिदं मानुषे सम्भाव्यते । अतस्तमेव देवशिल्पिनमिदानीमेतद्रूपं मन्ये । (इत्युपरिभागं विलोक्य प्रकाशम्) अये शिल्पिमणे! अस्मिन् गोपुराग्रकन्दरे वितानदुकूलवलयेषु विविधविरिञ्चप्रपञ्चजालकालेख्यव्याजेन भावत्ककरकल्पितं शिल्पकौशलं सन्दर्शनीयतायाः परममास्पदं भवति ।

शिल्पी — इदानीं मामकः शिल्पविद्यापरिश्रमः फलपौष्कल्यमश्नुते, यदयं देवस्य नयनपथमारूढः ।

राजा — विचिकित्सारहितं तावकं वचनम् ।

शिल्पी — (सविनयं करसम्पुटीकल्पितेन कनकवलयकान्तिकमनीयेन कमलमुकुलेन प्राचीं निर्दिशन्) एषा बालमार्ताण्डसुधाशनाधिपालङ्कृता दिक्सुन्दरी देवस्य समुत्फुल्लप्रणयसुरभिकटाक्षमालार्पणमभिलषन्ती वर्तते ।

(राजा साभिलाषकुतुकं पश्यति ।)

शिल्पी —

सद्यो निर्वृत्तमन्थो जलधिरिह पयोमेदुरो मन्दरेण
प्रोद्वल्गद्वीचिमालो विलसति पुरतः पद्मतीर्थाभिधानः ।
कूलोपान्तैककूटीभवदमितसुधाभीशुफेनालिमेनां
देवो दृक्सम्पुटाभ्यां कलितरुचि पिबेत् प्रीतिविस्तारिताभ्याम् ॥ ४७ ॥

राजा — अये साधुवादिन्! शिल्पिन्! त्वदीयं वचनं सूनृतप्रायम् ।

इदं व्यक्तीभू(यं ?तं) सरासि सरसं यत् तव गिरा
सरस्वानित्युक्तं यदपि पयसा निर्भरमिति ।
यदेतस्मिन् मध्ये मथनकथनं गोपुरमणेः
पुनर्नामास्त्वत्र स्थितिमुपजुषो मन्दर इति ॥ ४८ ॥

शिल्पी — देवस्योक्त्या मदीयोक्तिः सुविहितसीमन्तचूडामणिः ।

अमात्यः — निर्विचिकित्समत्र नान्वेषणीयम् ।

एतत्सरोदुग्धनिधौ बुधानां
श्रान्ताशयानां घटते मनोरथः ।
आकल्पकश्रीसकलार्थजात-
सन्तानकान्तामणिलाभसम्मितः ॥ ४९ ॥

शिल्पी — अत्र कटाक्षविक्षेपः क्रियताम्,

आराममध्यगतमेतदनन्तशक्तेः
श्रीवल्लभस्य भवनं भुवनाभिरामम् ।
तद्भक्तमुख्यतमदेवनिवासयोग्य-
मालोकितं भवितुमर्हति मत्प्रणीतम् ॥ ५० ॥

राजा — (विलोक्य साह्लादम्)

किं बहुना कथनीयं त्वत्करकौशल्यकल्पितं सदनम् ।
साधुतया ह्यतिशेते सकलमिदं नाकलोकसौभाग्यम् ॥५१॥

(इति समीपस्थं कञ्चन लालाटिकं पश्यति ।)

लालाटिकः—अये शिल्पाचार्यमणे ! अगाधमपि देवस्य मानसमधुना तत्तद्वर्णनानु(का ? कता)जनितापरिमितानन्द-

घनरसभरसमुल्ललिततया विलोचनवीचीभिरवरोहणीपरीवाह-
सरणिं शिशिरयति । तदितः कियानिह वर्णनीयताविषयो
वर्तते ।

शिल्पी — (सविनयम्) इयानेव (इत्यभिधाय राजानं विलोक्य)

विलोकयतु सादरं वरुणपालनीयां दिशं
यदत्र वरुणालयो यमितवीचिहस्ताञ्जलिः ।
प्रतीरमुपयाति च प्रणमति स्खलत्यन्ततो
भवानिव विराजते भगवदङ्घ्रिभक्त्याकुलः ॥ ५२ ॥

अपिच,

स्वकीयजठरेशयं हरिमिहाहितल्पेशयं
विलोकितुमिवादरादपिच देवगम्भीरताम् ।
सदाशयसमुल्लसद्विपुलवीचिमालोपदः
ससम्भ्रममुपैत्यलं जलधिरेष वेलातलम् ॥ ५३ ॥

किञ्च,

प्रत्यग्ज्योतिषि शेषशायिनि हरौ प्रत्यक्पयोराशिजा
पद्मेवाञ्चितकौतुका पुनरियं तल्लिप्सयोर्म्यावलिः ।
संस्पृश्याद्भुतशङ्खतीर्थमधिकं प्राप्तानुकूलं शिवा-
मभ्यर्च्याम्बुकणप्रसूननिकरैः स्तौति स्वकीयारवैः ॥ ५४ ॥

राजा — (सस्मितमात्मगतम्) अहो चातुर्यमेतस्य । यदह-
मात्मगुणप्रशंसासहोऽपि अनेन सागरवर्णनप्रसङ्गोपायेन भग-
वद्भक्ताग्रगण्य इति निरतिशयगाम्भीर्यनिलय इति पुण्य-
तीर्थनिमज्जनभगवदभ्यर्चनसंस्कृतिसञ्जातसकलसमीहितार्थ

इति च प्रशंसितः । (प्रकाशम्)

या विश्वावनहेतवे समुदिता या योगिहृन्मोहिनी
यामायं स्वपदाब्जसक्तमनसां संवित्सुखाधायिनी ।
सैवेयं सदयाशया सहजतां सन्दर्शयन्ती हरे-
र्माया काचन शोभते जलनिधेः कूलं ह्यलङ्कुर्वती ॥५५॥

शिल्पी — तत्सन्निधाविदमपि दृश्यतेऽतिमनोहरं सरः ।

तत्पादाम्बुरुहावनेजनजलप्राप्त्यातिशुद्धाश(या ? ये)
प्रोद्वल्गल्लहरीविलोलकमलामोदोल्लसद्दिक्तटे ।
प्रेष्ठे पापविनाशनामनि महातीर्थे नृणां मज्जतां
सद्यः पापविनाशिता भवति यत् तत् केन वा वर्ण्यते ॥

अपिच,

आवाराकरतीरमाहरिपदं पद्या मनोज्ञोभय-
प्रान्तोदञ्चितकेरपूगकदलीपुन्नागनीरन्ध्रिता ।
तीर्थाध्वन्यवरेण्यसन्ततगतिप्रेष्ठा सुतीर्थाश्रिता
तीर्थाङ्घ्रिप्रणिपातदत्तमनसा देवेन दृश्याधुना ॥ ५७ ॥

राजा —(सविस्मयं विलोक्य)

दृष्टा खलु सुखमेषा सुकृतिजनस्याङ्घ्रिसङ्गता पदवी ।
निगमयति पुण्यभाजां सरणीरीतिं हि नाकलोकस्य ॥

शिल्पी —

देव ! प्रत्यग्ररत्नप्रकरविरचितस्वर्णकुम्भावलीनां
सौधाग्राकल्पितानां शिखरविदलितस्वर्गगङ्गापथानाम् ।
मध्यस्थोदग्रकुम्भप्रवरमधिगतस्तस्य तेजोनुषङ्गा-
दत्युद्दामात्मतेजा दिनपतिरधुना तस्य साम्यं बिभर्ति
[॥ ५९ ॥

(राजा सम्यग्विलोकयति ।)

(तावदाकाशे)

अम्बरमणिबिम्बमिलन्नम्बुजनाभालयश्रियः कुरुते ।
विपुलस्तनयुगशोभां हाटककुम्भोऽयमग्रभागस्थः ॥ ६० ॥

राजा — (आकर्ण्य) भगवदालयालोकनकुतूहलिनां दिव्यशृङ्गारिणां वचनमिदम् ।

अमात्याः — देव! घण्टामणिमधिकृत्य शिल्पिमणिना यदुक्तं तदिदानीं प्रत्यक्षमनुभूयताम् ।

ध्वनिमावर्तयन्नुच्चैर्घटिकामणिरद्भुतः ।
माध्याह्निकक्रियावेलां सतां शंसति साम्प्रतम् ॥ ६१ ॥

राजा — (घण्टामणिध्वनेरावृत्तिगणनां कुर्वन्)

ब्रवीति यावतीर्भानुर्नभोमध्यं गतोऽधुना ।
घटिकास्तावतीरेव ब्रवीति घटिकामणिः ॥ ६२ ॥

तदनुभूतमेवेदानीं शिल्पिशास्त्रप्रामाण्यम् । तदिदानीं समुचिताचारानुष्ठानेन मया अस्मत्स्वामिनः श्रीपद्मनाभस्य नयनभूतोऽयं भजनीयो भगवान् दिनकरः । यूयमपि यथोक्तनिजकार्यजागरूका भवत । भगवन्मन्दिराभ्यन्तरगतं शिल्पिकरकौशलं सकलमपि सम्यक् सन्दर्शनेन श्वः सम्भावयिष्यते । तदितो वयं साधयामः ।

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

इति चतुर्थोऽङ्कः ॥

अथ पञ्चमोऽङ्कः ।

(ततः प्रविशति सपुत्रकः शिल्पी ।)

शिल्पी —(सहर्षातिशयम्) अहो चिरपरिनिष्ठितमप्यस्माकं शिल्प(विद्या)निष्णातृत्वं सफलमद्य सञ्जातम् । यतः,

राजासौ हरिभजनप्रवृद्धभाग्यः
सम्भार(ग्रह)णविधिप्रवीणभृत्यः ।
स्वामात्यैः सह सकलं विलोक्य मह्यं
सम्प्रीतो बहुमतिमद्भुतामदिक्षत ॥ १ ॥

पुत्रकः —तात ! अनर्घो मणिरभिज्ञे खलु मूल्यमर्हति ।

शिल्पी — अये पुत्रक ! भगवदालये ईदृशं शिल्पसौन्दर्यनिर्वर्तनं नास्मत्करकौशलेन । किन्तु मन्ये सकलभुवनमण्डलमण्डनमणेर्महाराजबालमार्ताण्डकुलशेखरस्य भाग्योदयेन ।

पुत्रकः — तथ्यमेवेदं तातस्य वचनम् ।

एतस्मिन् धरणीतले बहुविधैः सौधोपसौधैः समं
तातेनैव सुनिर्मिता मणिगणैरत्यद्भुतैरालयाः ।
तान् सर्वान् हसतीव हन्त भगवच्छ्रीपद्मनाभालयः
स्वच्छस्फाटिकसौधपङ्क्तिविलसज्ज्योत्स्नाप्रकाशैर्यतः ॥ २ ॥

शिल्पी —(सानन्दम्) (अये पुत्रक !) बालकेनापि त्वया सम्यगुपपादितम् । (इति नन्दनमभिनन्दति ।)

(नेपथ्ये)

साध्यन्तां (विधि)चोदिताः समुदितैः सम्भारजातैः क्रिया
वार्यन्ताम + + + + + + + + + + + + ज्ञादराः ।

गृह्यन्तां हविराज्यलाजविलसत्पुष्पोपहारादयः
पठ्यन्तां श्रुतिसूक्तयो निलयनादायाति देवोऽर्भकात् ॥

अपिच,

प्रोद्यद्दुन्दुभिमद्दलादिजनितैः सम्भ्रामिताशागजै-
र्व्याप्ते व्योम्नि रवैः सुरैरपि मुदा वैमानिकैर्नन्दनात् ।
आनीताद्भुतपुष्पवर्षिभिरयं संस्तूयमानोऽर्भकाद्
गेहादत्र नवीनक्लृप्तसदनं प्राप्नोति पद्मासखः ॥ ४ ॥

तदितः प्रकृतपूजोपकरणसामग्रीसमृद्धैकशिलामण्टप-मध्युषितनवरत्नखचितभद्रासनोपरि निवेश्यतामेष भगवान-नन्तकल्याणगुणाभिरामः श्रीपद्मनाभः । भो राजपुरुष! समु-दा(यकार्य)कारिन्! इतः परमपि प्रवर्तितव्यं तीक्ष्णदण्डेन भवता खलु निर्वर्तयि(तुमे) ते वयमपि यौगिककार्यनिष्ठास्तव सहकारिण एव भवामः । तान्त्रिकप्रवरः सोमयाजी विधिव-दाराधितमहाभिषेकयोग्यशातकुम्भकुम्भावलीकोऽभिषेक्तुं म-हाराजागमनं प्रतीक्षते । तत् साधयतु भवांस्तदानयनाय ।

शिल्पी — (श्रुतिमभिनीय) अयि पुत्रक! अचिरादेव भ-विता महाभिषेकः । यदेषामालयाधिकारिणामेवमाघोषः श्रू-यते । (इति पुरोऽवलोक्य) अये इत एवाभिवर्तते समुदायकार्य-कारी कनकदण्डधारी । तदिहावयोरनुचितमस्थानेऽवस्था-नम् । तदितोऽपसरावः । (इति निष्क्रान्तौ ।)

विष्कम्भः ॥

(ततः प्रविशति यथानिर्दिष्टः सामुदायिकः ।)

सामुदायिकः — (सहर्षम्)

मम खलु सफलं जातं जन्मातीव द्विजन्मनस्तदहो ।
यदिह समेतं सकलं हरेकैङ्कर्यं विशिष्टपुण्येन ॥ ५ ॥

तथाहि,

उल्लोचैर्बहुभिर्विचित्ररुचिभिः संशोभितं चोपरि
प्रासादान्तरमद्भुतैः सरसिजस्रङ्मण्डलैर्मण्डितम् ।
धूपैर्धूपितमुल्बणैरपि महादीपैश्च सन्दीपितं
रम्भाभिः सफलोत्कराभिरभितः स्तम्भालयोऽलङ्कृताः ॥

अपिच,

मुक्तावैडूर्यनीलैर्मरतकविलसत्पुष्यरागप्रवालै-
र्वज्रैश्चत्पुष्यरागप्रसृमररुचिगोमेदकैः सन्दिताभिः ।
मालाभिश्चातिरम्ये विमलमणिशिलामण्डपे बिम्बिताभिः
क्लृप्ता रत्नाकरश्रीरिह वसति विभुः पद्मनाभो रमेशः ॥७॥

किञ्च,

सर्वोपप्लवशान्तिहेतुकमहाहोमक्रियाः साधिता
नैवेद्यादिषु साधुतासमुचितं संशोधनं साधितम् ।
निर्माल्यादिनिराकृतौ नियमितो दासीजनो निर्मला-
स्तत्तद्द्वारि च रक्षका नियमितास्तत्तद्विविक्षापराः ॥ ८ ॥

अपिच,

मार्दङ्गिकाश्च ये वै वैणविका वैणिकाश्च मौरजिकाः ।
ये च नरास्तालकरास्ते सर्वे कारिताः सज्जाः ॥ ९ ॥

किञ्च,

श्वेतच्छत्रमुभे च चामरवरे चारू मणीपादुके
हेमोदञ्चिततालवृन्तयुगली रत्नाढ्यभृङ्गारुका ।

वीटीपेटकलाचिके द्युमणिसच्छायौ सदा धावका-
वेतत् सर्वमिहात्तमस्ति समये दासैर्ममाज्ञावशैः ॥ १० ॥

तदितः सन्निहितं महाभिषेकसमयं महाराजस्य विज्ञापयामि । (इति परिक्रम्यावलोक्य) अये राजभवनाङ्कणरिङ्खणपरो हेमकङ्कणः किमेष सम्भ्रमेणायाति । एतन्मुखेन राज्ञोऽवसरमवगमिष्यामि ।

(प्रविश्य)

हेमकङ्कणः— (पुरोऽवलोक्य) अये महाभिषेकः सन्निहित इति मन्ये । यदयं सामुदायिकः,

दण्डं दधत् कनकमण्डितमग्रतोऽसौ
चण्डोऽतितीव्रमित एव हि हिण्डमानः ।
अण्डोद्भवाधिप इवोर्जितपक्षपातः
संलक्ष्यते हरिनियुक्त इवात्मकृत्ये ॥ ११ ॥

(इत्युपसरति ।)

सामुदायिकः—भो भो हेमकङ्कण! सत्वरमाधावसि, महाभिषेकसमयप्रतीक्षिणा महाराजेन किमादिष्टोऽसि ।

हेमकङ्कणः—अथकिम् ।

सामुदायिकः— किमनुष्ठितमखिलमप्यावश्यकं महाराजेन ।

हेमकङ्कणः— कथं सम्भाव्यते क्षिप्रकारिणि महोत्सवे दीर्घसूत्रता ।

सामुदायिकः— हेमकङ्कण! किं किमाचरितं महाराजेन ।

हेमकङ्कणः —

नानादिग्भ्य उपागता नृपतयः सम्मानिता दर्शना-
ज्ञानारत्नसुवर्णराशिषु च तैर्दत्तेषु वीक्षा कृता ।
नानाकार्यविधायिनोऽनुरहसं संमन्त्र्य संप्रेषिता
यच्चान्यच्च यदस्ति कृत्यमखिलं तत्तत् कृतं स्वामिना ॥

धारागृहाभ्यन्तरमेत्य राजा
स्नात्वा यथावत् परिधाय वासः ।
धृत्वोर्ध्वपुण्ड्रं च गृणन् मुरारे-
र्नामावलिं काङ्क्षति चास्य सेवाम् ॥ १३ ॥

सामुदायिकः — तर्हि त्वरितं गच्छावो महाराजाय महोत्सवं विज्ञापयितुम् । (इति तेन सह महाराजमन्दिरान्तःप्रवेशं नाटयति ।)

(ततः प्रविशति यथानिर्दिष्टो मणिगणालङ्कृतदर्पणाक्षमालागोपीचन्दन-भस्त्रकाकनकालुकाहस्वपटवाहिकतिपयपरिजनोपास्यमानो राजा ।)

राजा — (जपसमाप्तिमभिनयन् अक्षमालां परिजनहस्ते दत्त्वोत्थाय ससम्भ्रमवितर्कम्) किमरे न नेदीयान् महाभिषेकसमयः ।

(उपसृत्य सहेमकङ्कणः सामुदायिकः)

सामुदायिकः — विजयतां महाराजः । अयमवसरो महाभिषेकदर्शनाय । तान्त्रिकप्रवरः सोमयाजी यथावदनुष्ठितमहाभिषेकपूर्वाङ्गभूताखिलक्रियाकलापो भगवन्तमभिषेक्तुं महाराजागमनं प्रतीक्षते ।

राजा — तर्हि तद्दर्शनेन जनुषः साफल्यं सम्पादयामः ।

(इति तेन सह भगवदालयप्रवेशं नाटयति ।)

सामुदायिकः— इत इतो महाराजः ।

राजा — (गच्छन्नवलोक्य)

आलयो मलयप्रख्यो भद्रश्रीनिलयः सदा ।
मुष्णाति मानसं मेऽसौ नवनीतमुषो हरेः ॥ १४ ॥

(श्रीकृष्णमवलोक्याभिवन्द्य च भगवदालयान्तःप्रवेशं नाटयति । तत्र समवेता योगपुरुषादयः सर्वेऽपि पद्माकराः शरदि गगनसमुदितं बालमार्ताण्डमिव भूलोकबालमार्ताण्डमेनमवलोक्य संफुल्लमुखाम्बुजाः प्रहृष्यन्ति ।)

राजा — (तत्र सज्जं सकलमपि विलोक्य स्वगतम्) अहो भक्तपराधीनता भगवतः श्रीपद्मनाभस्य, यदयमशेषामर्त्यपरिवृढहाटकमकुटतटकोटिघटितमणिपटलचटुलरुचिनिचयनीराजितनिजपदनीरजोऽपि निजचरणनलिनयुगलमेव शरणं मन्वानस्य मर्त्यतोकस्य मम भक्त्यविरोधेनाभ्यर्थितसकलमनोरथपरिपूरणजागरूकतया दिग्विजययात्रासमयानुवर्तनप्रवृत्तमद्भिरहासहाखिलपौरजननिवर्तनोपायमाकलयन् सर्वदिग्विजयामितार्थजातार्जनप्रकृतिजनानुरञ्जनपुण्यतीर्थस्थलविशेषसन्दर्शनतत्तत्स्थलनिवासिसद्ब्राह्मणसन्तर्पणस्फीतयौवनरामणीयकसंस्पृहणीयपरिरम्भणविजयरमणीपरिरम्भणसंशोभमानप्रवृद्धकुतूहलभुवनैकसंप्रेक्षणीयनिजनगरप्रवेशाडम्बरप्रमोदभरितप्रत्युद्गताशेषपौरजनानुमोदनप्रबलवात्सल्यविवशितमातृबन्धुजनानन्दनचिरजीर्णश्रीपद्मनाभालयाभिनवीकरणमहाभिषेकनिर्वहणाद्यनुरूपां शक्तिमुपबृंहयति । (प्रकाशम्) अये सामुदायिक! कथमितोऽप्याचार्येणाभिषेको विलम्ब्यते ।

सामुदायिकः—इत एवागच्छति तत्प्रेषितस्तदन्तेवासी वक्रनासः ।

वक्रनासः — (उपसृत्य) विजयतां महाराजः ।

राजा — आचार्याः किमाचरन्ति ।

वक्रनासः —

आराध्य पूर्णकलशान् विरचय्य होमा-
नाकल्प्य बिम्बमपि शुद्धमपां प्रसेकैः ।
आवाह्य देवमनघैरभिमन्त्र्य मन्त्रैः
प्राणप्रतिष्ठितममुं विदधाति धीरः ॥ १५ ॥

परन्तु,

सहजेऽस्मिन् साम्राज्ये
सम्प्रति भावत्कभावनाथत्वे ।
अभिषेकः कर्तव्यः
पुंसि परस्मिन् पुमर्थलाभाय ॥ १६ ॥

राजा— (सामोदं स्वगतम्) अस्य नाम्न्येव केवलं वक्रता, नैव वाचि। (प्रकाशम्) त्वदुक्तमिदमनुष्ठीयते। (इति सामुदायिकं प्रति सश्रद्धम्)

कोटीरं सुमहार्हरत्ननिकरप्रत्युप्तमत्यद्भुतं
श्वेतच्छत्रमतुच्छमौक्तिकमणिस्वच्छं सिते चामरे ।
छातारातिकुलां कृपाणलतिकां वीरेन्दिरावेणिका-
सध्रीचीं मणिखेटमण्डनवतीं चाग्रे हरेः स्थापय॥ १७॥

सामुदायिकः— यदाज्ञापयति महाराजः। (इति तथा करोति ।)

राजा — कासते गवां सहस्राणि, क वा मणिसुवर्णराशयः, क च वा महार्हाणि भूषणाम्बराणि ।

(**सामुदायिकः** —)

नीता गावो गोपुरप्रान्तदेशं
मध्ये तस्य प्रापिता हेमपुञ्जाः ।
अत्रानीता रत्नकूटा महार्घा
दिव्यैर्वस्त्रैर्भूषणैरद्भुतैश्च ॥ १८ ॥

राजा — तर्हि पूर्वमेव परीक्ष्य सम्प्रदानतया सुनिश्चितान् सकलश्रुतिस्मृत्याचारमणिगणनिक्षेपसम्पुटीभूतान् ब्राह्मणान् क्षिप्रमिहानय ।

हेमकङ्कणः — तथा । (इति निष्क्रम्य ब्राह्मणैः सह प्रविश्य महाराजान्तिकं प्रापयति ।)

राजा — (साञ्जलिपुटम्) भवद्भिरध्यास्यतां क्रमेण मणिमयमिदं हेमकूर्मासनम् ।

(ब्राह्मणाः क्रमेणोपविशन्ति । राजा पुष्पचन्दनादिभिस्तानभ्यर्च्य प्रत्येकमेकैकेन हेमराशिना सदक्षिणाः सालङ्कारा दश दश गा विमलतुलसीगन्धोदकधारापुरस्सरं प्रददाति ।)

ब्राह्मणाः — (प्रीतगृह्योत्थाय) महाराजमनोरथः सर्वदा परिपूर्णो भूयात् । (इत्यनुगृह्य निष्क्रान्ताः ।)

राजा — हेमकङ्कण! भूरिगवीप्रदानविधये दक्षिणार्थान् हेमराशीनुपानय ।

हेमकङ्कणः — यदाज्ञापयति । (इति हेमराशीन् मेरुकूटोपमान् सन्निधापयति ।)

राजा — विमलतुलसीगन्धोदकधारापुरस्सरं नानाविध-वेदविद्भ्यो ब्राह्मणेभ्य एभिर्हेमराशिभिः सदक्षिणाः सालङ्कारा इतरा गाः प्रतिपादयामि । (इति भूमौ निधाय, हेमकङ्कणं प्रति) दत्तमिदं सहेमराशिकं गवां सहस्रं पूर्वमेव परीक्षितेभ्यो ब्राह्मणेभ्यः पुरोहितं सहायीकृत्य सम्प्रदापय । अन्तरानीतमन्यत् सर्वं प्रदत्तं हेमराशिजातमाबालवृद्धं जनानां भूरिदानार्थं त्वद्वशे तिष्ठतु । अन्यदिदं मणिभूषणादिकमभिषेकानन्तरागतेन मयैवोपयोक्ष्यते ।

हेमकङ्कणः — यदाज्ञापयति देवः । (इति हेमराशीनादाय सपुरोहितो निष्क्रान्तः ।)

राजा — भो बाभ्रव्य ! अभिनवकालिदासादीनन्तः प्रवेश्योपवेशय ।

बाभ्रव्यः — यदाज्ञापयति । (इति निष्क्रान्तः ।)

राजा — (ससम्भ्रममुत्थाय प्रदक्षिणक्रमेणोपलक्षितं भगवन्तं नृसिंहं प्रणम्य प्रविश्यैकशिलामण्डपोपान्तं सप्रणामाकूतं भगवन्तं विलोक्य ध्यायन्नात्मगतम्)

विस्रम्भोत्पुलकावलीभिरधिकं व्याप्तान्तरङ्गाङ्को
व्यक्ताव्यक्तमनन्तभोगशयने व्यक्तं शयानं विभुम् ।
व्यावृण्वन् मनसा मुहुर्मुहुरहं त्वामद्य भावात्मकं
व्याख्यातात्मसुखानुभूतिरभवं विष्णो ! तवानुग्रहात् ॥

(प्रकाशम्)

अन्तर्यामी त्वमिह जगतां वेत्सि सर्वं च विष्णो !
वेद्यं किं वा तव धुरि मया विद्यते वासुदेव ! ।
वात्सल्यान्मां कलय करुणाभाजनं भक्तबन्धो !
साम्राज्येऽस्मिन् मम वह धुरं सर्वदा पद्मनाभ ! ॥ २० ॥

(इति निजमनोरथगतं परमसिद्धान्तं संप्राप्य सहर्षोत्साहम्) सामुदायिक! सर्वविद्भिरस्मदाचार्यैर्महाभिषेको विधीयताम्।

सामुदायिकः—विदधाति किलायं महाभिषेकम्।

सम्बद्धस्वशिखैः स्वहस्तविलसत्कूर्चोर्ध्वकुम्भैः कटी-
नद्धप्रोज्ज्वलनिष्प्रवाणिवसनैराचार्यमोदप्रदैः।
पर्यायोद्धृतदत्तपूर्णकलशैर्मध्यस्थकुम्भोद्धृता-
वुद्युक्तैः परिकर्मकारिभिरसौ संलक्ष्यते तान्त्रिकः॥ २१॥

अपिच,

शमादिगुणसम्पन्नस्तपोविद्यासमन्वितः।
वसिष्ठ इव तेजस्वी विभात्याचार्यतान्त्रिकः॥ २२॥

(ततः प्रविशति तान्त्रिकप्रवरः सोमयाजी।)

तान्त्रिकः—(क्रियाचमत्कृतिमभिनयन्) भो भोः परिकर्मकारिणः! सावधानचित्तैर्भवद्भिरभिमन्त्रितमहाभिषेकपूर्णकुम्भः समानीयताम्। आह्रियन्तां महाभिषेकपूजोपकरणानि शान्तिकारिभिः, आताड्यतां महाघण्टा सर्वसन्नहनाय च।

सामुदायिकः—यदादिशत्याचार्यः। (इति तथा करोति।)

देध्मीयन्तां शशाङ्कप्रतिभटरुचयः शङ्खसङ्घाः समन्ता-
दाताड्यन्तां समूहाः सुमधुरनिनदा हेमघण्टामणीनाम्।
आपीड्यन्तां मृदङ्गाः सुपटहपटलं मण्डलं डिण्डिमाना-
माहन्यन्तां गभीरध्वानिमुखरदिशां दुन्दुभीनां च वृन्दम्॥

(इति सामुदायिकवचनात् तेऽपि तथा कुर्वन्ति।)

तान्त्रिकः—(सश्रद्धोत्साहम्) प्रह्लादवात्सल्यविजयजयकारिणोर्भगवतोर्नृसिंहनन्दनन्दनयोरभिनवीकृतालयसुप्रति-

ष्ठितयोः, विभीषणराज्याभिषेककारिणो जानकीसनाथस्य सौमित्रिसहितस्य साञ्जनेयस्य वन्दारुसन्दोहमन्दारस्य श्रीरामभद्रस्य (च) अप्रमत्तैर्मदनुजैरभिषेकः क्रियताम् । मदन्तेवासिभिर्विष्वक्सेनक्षेत्रपालहरिहरपुत्रादीनां च यथाक्रममभिषेकः क्रियताम् । वयमप्यनन्तशायिनि पद्मनाभे महाभिषेकं प्रयुञ्ज्महे ।

सामुदायिकः — कथमाचार्यनियोगात् प्रमाद्यन्ति ।

तान्त्रिकः— (परिकर्मकारिभिरुपानीतं महाभिषेकपूर्णकुम्भं समादाय भगवन्तमवलोक्य)

सकलजगत्सम्राजं श्रीमन्त हन्त पद्मनाभं त्वाम् ।
अभिषिञ्चाम्यद्भिरहं वञ्चिमहीपालसकलसाम्राज्ये ॥ २४ ॥

(इति तत्कालयुगपदुज्जृम्भमाणघनाघनस्तनितरवाडम्बरपाटच्चरतापटिष्ठपटहपटलभासुरभेरीमद्दलमण्डलकाहलीमुरवमुरजधवलशङ्खावलीनिबिडडिण्डिमडमरुकढक्काद्यनेकवाद्यविशेषाघोषाकर्णनसमुन्मिषितप्रहर्षदिविषत्परिषदभिवर्षितनन्दनतरुवृन्दाहृतपुष्पवर्षानुगतदिव्यमधुकरनिकरझङ्कारस्वरमिलितवेदमन्त्रघोषपुरस्सरं श्रीमन्तं महान्तमनन्तशायिनमभिमतदायिनं जलदाभं पद्मनाभमभिषिञ्चति । तदानीं सर्वेऽपि समुल्लसितभक्तिरसासकृदाम्रेडितजयशब्दाः प्रणमन्ति ।)

केचित् सम्बद्धमुग्धाञ्जलिमुकुलभृतः केचनानम्रकायाः
केचिन्मौनं दधानाः प्रसृतकरतलाः केचिदुन्नम्रवक्त्राः ।
अन्ये स्तोतुं प्रवृत्ताः समुदितसुमहाभक्तिसंरुद्धकण्ठा-
स्तस्मिन् काले समेतास्त्वहमहमिकया पद्मनाभं भजन्ते ॥

(ततः प्रविश्य)

वन्दिनः — (साटोपं समन्तादवलोक्य)

अपसरत समन्तात् सन्निधिर्नोपरोध्य-
स्त्वरितमुभयपार्श्वे हे जनाः! स्थायिनः स्थ।
सममिह सकलानामागतानां जनानां
भवतु भगवतः श्रीपद्मनाभस्य सेवा ॥ २६ ॥

(इत्युद्यद्वेत्रलतया जनसंमर्दमुभयतो निवार्य सोच्चस्वनं सवेत्रं बाहुमुद्यम्य जनकोलाहलमुपशमय्य)

महाभिषेको निर्वृत्तो महतेऽभ्युदयाय वः।
महानुभाव! राजेन्द्र! स्वामिनं पश्य साम्प्रतम् ॥ २७ ॥

राजा — (भगवन्तं समालोक्य)

प्रभाभिर्नीलाभिर्विजितजलदाडम्बरतनुः
प्रपन्नानां देव! प्रशमयति तापं किल भवान्।
प्रपद्ये तस्मात् त्वां शरणमधुना निर्मलमनाः
प्रसीद त्वं विष्णो! धुरमविधुरं धत्स्व धरणेः ॥ २८ ॥

त्वं कर्ता कारयिता
कर्म च कार्यं च करणमिदमखिलम्।
वस्तुत एवं विदिते
ममतापाशो न मां निबध्नाति ॥ २९ ॥

तदपि समस्तं भवतो
(न) म(या ? मा)धीनं विशिष्य किं ब्रूमः।
महनीयोऽसि महात्मन्!
ममताविष्टैर्हि सर्वथास्माभिः ॥ ३० ॥

इदं कोटीरं ते महितमणिकोटिप्रकटितं
त्विदं श्वेतच्छत्रं प्रचुररुचिमुक्तामणिमयम्।

उभे चेमे दिव्ये विमलरुचिनी चामरवरे
प्रदत्तान्येतानि प्रणतहितसन्धायक ! विभो ! ॥ ३१ ॥

(इति साम्राज्यचिह्नानि समर्प्य भक्तिमहिम्ना स्मरणमात्रेण तत्कालसन्निहितानि नवीनमौक्तिकमयैर्मल्लिकाकुसुमैः संमिलितानि गिरिवरनन्दिनीकरकमलोपलाल्यमानदिव्यशुकवधूटीगरुदालीकोमलमरतकमणिशिलापरिकल्पिततुलसीपत्रनिचयैः संमिश्रितान्यत्यद्भुततत्तन्मणिनिकरनिर्मितनानाविधपुष्पसमूहैः सहितानि शतगुणितानि कोटिसुवर्णकमलजालानि भगवदभ्यर्चनाहेतोः समर्पयति ।)

(तान्त्रिकस्तान्यादाय किरीटं धारयित्वा साम्राज्यचिह्नेन छत्रेण चामराभ्यां च यथायोगमुपचारं कृत्वा महाराजेनोपहृतैस्तत्तन्मणिसुवर्णकुसुमनिकरैर्भगवन्तमापादचूडं सम्यगलङ्कृत्य नाम्नां सहस्रेणाभ्यर्च्य सूदीभूतसुरेन्द्रनिर्मितं नानाविधव्यञ्जनपुञ्जमनोरञ्जनं बहुविधभक्ष्यसमीक्षणीयं दिव्यकदलीपनसाम्रफलभरमिलितं तत्तत्परिमलप्रसरणप्रमोदितसकलभुवनं मणिगणमहनीयतपनीयभाजनप्रतिष्ठाभासुरं सरसं नवघृतधारासंप्लुतकनकाभसूपभरसंमिलितं दिव्यमन्नं सुखोष्णं च पायसं निवेदयति ।)

(तावदाकाशे)

पयस्यमीदृशं वत्स ! बालमार्ताण्ड ! भक्तिमन् ! ।
प्रत्यहं भोक्तुमिच्छामि तदुपायोऽनुचिन्त्यताम् ॥ ३२ ॥

राजा— (आकर्ण्य स्मृतिमभिनीय) भोः सामुदायिक ! स्मृतिमात्रसन्निहितानि सवत्सानि कामधेनूनां सहस्राणि ! "भगवतः प्रतिदिनं पयस्यार्थमासां दुग्धं दत्त्वा तत्प्रमाणेन तण्डुलाश्च प्रतिग्राह्याः" इति भगवद्दासवर्गेभ्यः प्रतिपादय ।

सामुदायिकः— यदाज्ञापयति देवः । (इति तथा करोति ।)

राजा—

यद्यादिष्टं महाराज ! पद्मनाभ ! महाप्रभो ! ।
निर्वर्तयं कृपादृष्ट्या तत् सर्वं च मया सदा ॥ ३३ ॥

(तान्त्रिकः पायसं निवेद्य परिपक्वजम्बूफलश्यामलक्रमुकफलमिलितानि नागवल्लीदलभरजालानि च निवेद्य पूजान्ते देदीप्यमानतत्तन्मणिज्वालाजालैर्निरन्तरनीराजनोपचारमनुभवतोऽपि भगवतः श्रीपद्मनाभस्य सद्यः प्रोज्ज्वलितैः कर्पूरखण्डैर्महादीपाराधनं च करोति । महाराजोऽपि पूजावसानकर्पूरदीपाराधनसन्दर्शनवन्दनादिकमप्यभिनयन् रूपिणीं भगवत्प्रसादधोरणीमिव मल्लिकादिसमस्तकुसुममयीं महतीं शेषां परिगृह्य तया सम्यक्परिवलयितनिजमस्तकप्रान्ततया भूयोऽपि देदीप्यमानश्रीः सन् समणिखेटामसिलतां च भगवत्सन्निधावर्पयति ।)

(तावदाकाशे)

भो वत्स! बालमार्ताण्ड! त्वया दत्तां महीधुराम् ।
अग्रहीषं प्रहर्षेण युवराजोऽसि साम्प्रतम् ॥ ३४ ॥

यौवराज्याभिषिक्तस्य तव मुद्रैव शाश्वती ।
भद्रा कृपाणवल्लीयं सखेटा गृह्यतां त्वया ॥ ३५ ॥

(सर्वे समाकर्ण्य विस्मयस्तिमितास्तिष्ठन्ति ।)

आकाशवाणीममृतायमाना-
माकर्ण्य सम्पूर्णमनोरथार्थः ।
आनीय दत्तां हरिणासिमुद्रां
नृपः करस्थामकरोत् प्रसादात् ॥ ३६ ॥

तान्त्रिकः — अहो भगवतः पद्मनाभस्य भक्तवात्सल्यं, यदधुना सकलमपि साम्राज्यभारमुररीकृतवता भगवता बालमार्ताण्डकुलशेखरोऽयं यौवराज्यमुद्राधारणमात्रे नियोजितः ।

राजा —

उद्दामे भुजगाधिराजतल्पिमे प्रोन्निद्रभास्वन्मणि-
स्तोमोल्लासिफणालिकान्तिपटलैराकल्पितोल्लोचके ।

भान्तं दान्ततपोधनातिविमलस्वान्ते वसन्तं रमा-
कान्तं सन्ततमाश्रये घननिभं श्रीपद्मनाभं प्रभुम्॥ ३७॥

(निजकरणान्यभिमुखीकृत्य)

नेत्र! श्रीरमणं विलोकय मनः! सञ्चिन्तय श्रीपतिं
श्रोत्राकर्णय पङ्कजाक्षचरितं मूर्धन्! मुकुन्दं नम ।
घ्राणाजिघ्र रमेश्वराङ्घ्रितुलसीपत्राणि सत्रेशितु-
र्जिह्वे! कीर्तय नाम तेन नितरां यूयं भजध्वं सुखम् ॥३८॥

(एवं स्तुवन् भगवन्तमापादचूडमसकृदवलोक्य समुन्मिषदमन्दानन्दभरितो महाराजस्तत्र सन्निहितं जानकीजानिं रामभद्रं प्रणम्य)

प्रणतिर्भवते राजे परिणतसीतातपःफलायाजौ ।
प्रतिहतरक्षोराजे राजीवाक्ष! क्षमाभाजे ॥ ३९ ॥

(इत्यन्यतो गत्वा अञ्जलिं बद्ध्वा)

विहितं नमनं भवते वेदान्तार्थावमर्शविमलहृदे ।
विष्वग्विजयं दिश मे विष्वक्सेन! प्रसन्नभावेन ॥ ४० ॥

(पुनश्च श्रीरामभद्रमुपेत्य)

यस्य च सीता दयिता यस्य च कोदण्डमाहवोद्दण्डम् ।
यस्य च दूतो वाताज्जातस्तस्मै नमोऽस्तु रामाय ॥ ४१ ॥

गौतमगृहमेधिन्या ग्राव्णो रूपेण खिद्यमानायाः ।
ग्लपिता यत्पदरजसा दो(षा)स्तस्मै नमोऽस्तु रामाय ॥

दशवदनादतिभीता मुनयो यं चैव शरणमुपयाताः ।
त्राता येन समेता गोप्त्रे तस्मै नमोऽस्तु रामाय ॥ ४३ ॥

(इत्यन्यतो गत्वा)

येन यशोदा ससुता येन च जातं व्रजेषु सुखजातम् ।
निहतः शकटो विकटो येन च तस्मै नमोऽस्तु कृष्णाय ॥

येन च जातो वातश्चक्राकारो व्यसुर्विमतः ।
यस्य च लीलालोला गोप्यस्तस्मै नमोऽस्तु कृष्णाय ॥

पूतनयाचेतनया दत्तं पीतं स्तनद्वयं ह्यनयम् ।
येन बलात् प्राणकुलं चास्यास्तस्मै नमोऽस्तु कृष्णाय ॥

अतिशिशुभावे देवे मतिरिह लग्ना ममास्तु मृदुभावे ।
कोमलया श्यामलया तन्व्या तन्वोपलक्षिते महिते ॥४७॥

कमलनयनं कालाम्भोदोत्करोल्लसिताङ्गकं
किमपि किमपि स्मेरे वक्त्रे दधानमनारतम् ।
करतलयुगेनाङ्घ्र्यङ्गुष्ठं प्रपन्नवरप्रदं
कनकशिबिकामध्ये शोभावहं शिशुमाश्रये ॥ ४८ ॥

(इत्यान्दोलिकाशायिनं यशोदास्तनन्धयं मुकुन्दमानम्य बहिर्निष्क्रम्य तत्र भगवन्तं नृसिंहं पुनरपि प्रणम्य विलोक्य)

नृहरे! तव वक्त्रबिम्बमेतन्नितरां भाति निरन्तरं रदाग्रैः ।
नखराहतदानवाधिपासृग्लहरीचूषणलम्पटोग्रजिह्वम् ॥

प्रह्लादस्य स्वपदशरणस्याशु भक्त्या प्रसन्नः
प्रोन्मथ्यैतत्कदननिरतं दुर्मदं दानवेन्द्रम् ।
श्रेष्ठां प्रादाः पुनरपि निजां भक्तिमद्वन्द्वहेतुं
तादृक्षस्त्वं निरवधिकृपापारसिन्धो! प्रसीद ॥ ५० ॥

शतकोटिशतोदात्ताशिताग्रनखरायुधम् ।
शतमन्युमुखैर्देवैः श्रितं नृहरिमाश्रये ॥ ५१ ॥

हिरण्यकशिपून्मत्तवारणोन्मर्दनैर्हगे(?) ।
हिरण्मयाय भवते नृसिंहाय नमो नमः ॥ ५२ ॥

(इति प्रह्लादवरदं भगवन्तं प्रणम्य भयविनयसम्भ्रमहर्षव्यञ्जकभावभेदपुरस्सरं परिजनैः परिवृतः प्रदक्षिणीकुर्वन् भगवन्तं पाराशर्यमभ्युपगम्य सन्नम्य साञ्जलिपुटम्)

विभक्ता व्याख्याता निखिलनिगमा व्यास! भगवन्!
त्वया दत्ताः शिष्येष्वमितगुणराशिष्वभिमतैः ।
ततस्तैरुत्कृष्टे जगति वितते वैदिकमते
कृतार्थस्त्वं ब्रह्माद्वयमिह हरिं ध्यायसि परम् ॥ ५३ ॥

दिक्तापापहवारिवाहनिवहभ्राजिष्णवे जिष्णवे
हृत्तापापहसंविदा कृतवते खेदापनोदं क्षणात् ।
सत्तापापहवृत्तये मुनिकुलोत्तंसाय तेजस्विने
तत्तादृक्षगुणाकराय महते व्यासाय तुभ्यं नमः ॥ ५४ ॥

नवघनमेचकमूर्ते! मुनिवर! वेदान्तसद्रसस्फूर्ते! ।
दिवि भुवि सन्नुतकीर्ते! वेदव्यास! प्रसीद विगतार्ते! ॥

(इति पाराशर्यं प्रणम्य श्रीपादान्तिकमुपेत्य)

श्रीमत्पादसरोरुहं भगवतः परे गिरां भास्वरं
पाराशर्यमुनिप्रवेकसततध्यातं भुवा सेवितम् ।
लक्ष्मीवासगृहप्रकाशमनिशं लक्ष्म्या मनोलक्षितं
वन्दारुव्रजवाञ्छितौघदिविषद्वृक्षप्रवालं भजे ॥ ५६ ॥

(इति प्रणम्य विश्रममण्डपमुपेत्य विश्रम्य भगवत्सन्निधिमुपेत्य साष्टाङ्गं प्रणम्योत्थाय साञ्जलिपुटम्)

भक्तिमेव स्थिरां देहि भवदङ्घ्रिसरोरुहे ।
स्वकीयानन्दलेशैकतुच्छितामरसम्पदम् ॥ ५७ ॥

(इति भगवन्तं प्रार्थ्य सन्निहितं वक्रनासं प्रति) इदानीमेव किलाचार्यै-रुपक्रम्यतेऽभिषेकानन्तरकरणीयं पूजाहोमतन्त्रविधानम्। तदे-तस्यावसाने दक्षिणास्वीकरणानुग्रहसमयो मया ज्ञातव्यः। तावन्महाप्रदक्षिणं कुर्वन् किञ्चित् करणीयमाचरिष्यामि।

वक्रनासः — मयि तदन्तेवासिता कर्तव्येषु सर्वदा जागर्ति।

राजा — (बहिर्निर्गमनं नाट्येन दर्शयन् भद्रदीपमण्डपाभ्यन्तरं प्रविश्योपविश्य) क्वासते कवयः कालिदासादयः।

(प्रविश्य)

बाभ्रव्यः — इतः सन्निहितस्थले कुमारश्रीरामवर्मणः सन्निधाने।

राजा — तत्र तैः का वा प्रसज्यते गोष्ठी।

बाभ्रव्यः —

गोष्ठ्यां तत्र न लक्ष्यते घटपटाभावोऽथवा घञ्घटा-
टिड्ढाणञ्ञपि वैन्द्रमाश्विनमिदं मिथ्येति शब्दावली।
साध्वीयं रसपुष्टिरद्भुतमहो सारल्यमस्मिन्निति
श्लाघा हर्षविवर्धिता परमहो स्वच्छन्दमुन्मूर्छति॥ ५८॥

राजा — (सहर्षं स्मितं कृत्वा) बाभ्रव्य! न केवलं किङ्करोऽसि, किन्तु विदूषकश्चासि। अस्मत्कुलचन्द्रमसं कुमारं कविशिखामणींश्चानय।

बाभ्रव्यः — यदाज्ञापयति देवः। (इति निष्क्रान्तः।)

राजा — (सन्निहितं पुरुषं प्रति) भो मणिकङ्कण ! क्षिप्रमिदानीं प्रविश विद्वत्सम्मानसभाम् । तत्र यथार्हनिर्णीतपट्टपत्रिकाप्रकारतया समग्रं सम्भृतं पीताम्बरमागिसुवर्णकङ्कणादिकं वस्तु दातृहस्तविधेयतया सज्जीकुरुष्व ।

मणिकङ्कणः — यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

(नेपथ्ये)

सुपर्णसंलक्षितशेखरत्वात्
सदा सुपर्वावलिसंश्रितत्वात् ।
सुरद्रुमो वा सुरभूधरो वे-
त्यास्ते ध्वजस्तम्भगतो विकल्पः ॥ ५९ ॥

राजा — (श्रवणमभिनीयात्मगतम्) वत्सस्य साहित्यमिदं मन्ये । यत् किल ममाप्येनमेव विकल्पवृक्षं युक्तिद्वयदोहलसमर्पणेन सद्यः प्रपुष्पयति । भवतु ज्ञास्यामः कवयः प्रत्युत्तरमेतस्य कथं प्रयोक्ष्यन्तीति ।

(पुनर्नेपथ्ये)

आकल्पमस्माकमयं विकल्पः
सुरद्रुमो नेति कथं वदामः ।
ब्रूमः कथं वा सुरभूधरोऽय-
मित्येव युक्त्योर्बलवत्तरत्वात् ॥ ६० ॥

राजा — (श्रुत्वा) हन्त महान्तः कवयोऽपि आकल्पमिति श्लोकेन वत्सस्य ध्वजस्तम्भगतं विकल्पम् (अ)प्रकम्प्यतया (अ?)विकल्पयन्ति । हन्त दिष्ट्यायं विजयते वत्सः ।

(पुनश्च नेपथ्ये)

कल्पवृक्षकनकाचलावुभा-
वेकरूपमधिगम्य पश्यताम् ।
इष्टसिद्धिकरणाय तिष्ठतो
नूनमेव भगवन्नियोगतः ॥ ६१ ॥

राजा— (श्रुत्वा सहर्षातिशयम्) हन्त विद्वत्कविभिरुत्प्रेक्षितं सम्यगुपपन्नम् । वत्सस्य विकल्पोऽपि लघूत्सार्यतया विकल्पतामपूर्वतां च प्राप्तः ।

(पुनश्च नेपथ्ये)

किमिदानीं प्रदास्यामि भवद्भ्यः परवानहम् ।
अस्ति मातुलदेवस्य सेवासम्पन्महीयसी ॥ ६२ ॥

राजा — (श्रुत्वा)

अहो मत्संश्रया भक्तिर्वत्सस्य विदितात्मनः ।
भगवद्भक्तिमास्माकीमनुरुन्धे निरन्तरा ॥ ६३ ॥

अहो वत्सस्य गुणगणा लोकरमणीयाः । तथाहि—

आचारैकनिधिः समस्तजगतामानन्दवारांनिधि-
र्दातॄणामपि चाग्रणीर्मम कुलाम्भोधेरयं चन्द्रमाः ।
एनं सन्ततमाविशन्ति विदुषां सम्पर्कजाः सद्गुणा
मद्वत्सं गिरिसम्भवा इव महापाथोधिमम्भोभराः ॥ ६४ ॥

तदस्य मनोगतं रथमौदार्यमयीं महतीं रथ्यां प्रापय्य वेगयुक्तया चक्रधाट्या क्रेङ्कारकारिणं करिष्यामि। (प्रकाशम्) वत्सानयनाय प्रेषितो बाभ्रव्यः कथं नायातः ।

(ततः प्रविशति विद्वत्कविकुलसमेतं कुमारमाहूय बाभ्रव्यः।)

बाभ्रव्यः— इत इतः कुमारः।

कुमारः— (स्वगतम्) इदानीमेव किल मातुलमहाराजानुचरो भूत्वा भगवन्महाभिषेकमहोत्सवमनुभूय प्रतिनिवृत्तेन मया विद्वत्कविसभां प्रविश्य सारस्वतगोष्ठी प्रस्ताविता। एतदन्तरे मातुलमहाराजशासनवाहिना बाभ्रव्येण विद्वत्कविसार्थेन सार्धमाहूतः प्रस्थितोऽस्मि। तन्मन्ये,

सन्निधानवशाच्छ्रुत्वा मम साहित्यपद्धतिम्।
सम्प्रहृष्टमना नूनं तत्फलं दर्शयिष्यति॥ ६५॥

(इति तैः परिक्रम्य महाराजान्तिकमुपसर्पति।)

राजा— (यथोचिताचारेण तानभिपूज्य) मणिमयासनानि भवद्भिरलङ्क्रियन्ताम्।

(सर्वे आसिकां नाटयन्ति।)

राजा— (अभिवाद्य कृतस्वस्तिकबन्धनं तिष्ठन्तं कुमारं कटाक्षयन्) मद्वत्सोऽयमभ्यस्तासु कलासु किञ्चिदपि जानाति?।

सर्वे— (सप्रसादम्)

कलावान् रामचन्द्रोऽयमकलङ्काद्भुतोदयः।
गुणज्योत्स्नावितानेन ह्लादयत्यखिलं जगत्॥ ६६॥

तत्तत्कलासु मर्माणि धीमता रामवर्मणा।
अनाक्रान्तानि लक्ष्यन्ते नास्माभिर्यत्नमास्थितैः॥ ६७॥

राजा— (स्वगतम्) एभिरुच्यमानं वास्तवमेव मन्ये। (प्रकाशम्) इदानीं युष्मद्वचनाद् वत्सेनास्मत्कुलं धन्यं मन्ये।

कवयः —

सर्वधातुलमेतस्य शीलं सद्गुणभूषितम् ।
पुष्णाति चन्द्रधवलं युष्मत्प्रियतमं यशः ॥ ६८ ॥

राजा — वत्सः किमस्मत्कुलस्य कल्याणमाचरिष्यति ।

कवयः — यदि शरच्चन्द्रमा लोकमानन्दयेत् ।

राजा — (सपरितोषम्) तर्ह्यद्यप्रभृति वत्समुखादेव युष्मत्सम्मानं कर्तुमभिलषामि ।

कवयः — यद् रोचते महाप्रभवे ।

राजा — यद्ययं गुणसम्मतो विदुषाम् ।

कवयः — किं परोक्षवर्तिनी लोकानन्दकारिता चन्द्रस्य । वयं तु सर्वथा युष्मत्प्रसादमभिलषामः ।

राजा — (सहर्षातिशयम्) वत्स! विद्वत्कविसम्मानसभामध्यमण्डपिकां प्रविश्य तत्र समवेतानिमान् विद्वत्कवीन् मन्त्रियुक्तेन मणिकङ्कणेन सन्निधाप्य हस्तविधेयतया सज्जीकृतैः कनकपीताम्बरभूषणादिभिर्यथार्हं सम्मानय ।

कुमारः — आर्यस्यानुशासनं शिरसि धृतम् । (इति साञ्जलिपुटं प्रणम्य तैः सह निष्क्रान्तः ।)

राजा — (उत्थाय बहिर्निर्गमनं नाट्येन दर्शयन् प्रदक्षिणक्रमोपलक्षितं भगवन्तं हरिहरपुत्रमभ्युपगम्य प्रणम्य साञ्जलिपुटम्)

बालं मुकुन्दमदनान्तकयोः सलीलं
नीलं निरस्तनिखिलाश्रितदुःखजालम् ।
आलम्बनं त्रिजगतां सुजनानुकूलं
मूलं सुखस्य सततं विभुमाश्रयेऽलम् ॥ ६९ ॥

(इति प्रणमति ।)

(नेपथ्ये)

हेमराशिमिममद्भुतरत्नै-
र्मिश्रितं कनकभूषणयुक्तम् ।
स्वीकुरुष्व कवियूथपते! त्वं
कालिदास! कवितामृतवार्धे! ॥ ७० ॥

राजा — (आकर्ण्य स्वगतम्) कथमुपक्रान्तं वत्सेन कविकुलसम्मानविधानं, यदयं श्रूयते वत्सोक्तः श्लोकरूपः सम्मानमन्त्रः ।

(पुनर्नेपथ्ये)

कल्पतरुः कामगवी कामितमेव प्रसौति महितार्थम् ।
तव करकल्पकवल्ली त्वद्भुतमप्रार्थितार्थमपि दत्ते ॥ ७१ ॥

राजा — (श्रुत्वा) कथं सम्मानितः कालिदासः कल्पतरुरित्यादिना वत्सस्य प्रदानातिशयं वर्णयति । सुचिरप्रार्थितमिदं दैवादद्य लब्धम् ।

वत्सः कलाभिः सम्पूर्णः कदायं कलयेत् सुधीः ।
लीलावितीर्णसम्मानैः प्रहर्षविवशान् कवीन् ॥ ७२ ॥

इति सुचिरादुत्पन्नो मामको मनोरथोऽद्य सम्पूर्णः । भवतु श्रीकृष्णसन्दर्शनवन्दनादिकमप्याचरिष्यामि । (इति परिक्रम्य भगवन्तमभ्युपेत्य साष्टाङ्गं प्रणम्य साञ्जलिपुटं प्रकाशम्)

करधृतनवनीतं नन्दगोपोपनीतं
निगमवचनगीतं नीरदाभं विनीतम् ।
निरवधिगुणजातं नारदाद्यैरुपेतं
नवरसनटमेतं बालमालोकयेऽहम् ॥ ७३ ॥

मल्लीमालासुरभिलमिदं त्वद्वपुर्नीरदाभं
नेत्रस्यासेचनकमखिलस्याद्भुतं शैशवेन ।
चिल्लीलीलाविलसितमुखाम्भोजभृङ्गाभनेत्रं
नित्यं वाञ्छाफलदमिह मे जायतां नन्दसूनो ! ॥ ७४ ॥

(इति नन्दनन्दनं भगवन्तं सम्प्रार्थ्य परिक्रम्य क्वचिदुपविश्य भगवन्नामावलिमन्त्रमावर्तयति ।)

(नेपथ्ये कलकलारवः क्रियते ।)

राजा —(कर्णं दत्त्वा) किमेष जनाघोषः श्रूयते । न किं सन्निहिता भोजनवेला ।

बाभ्रव्यः —इतः किलायमागच्छति महाकङ्कणधारी महासूपाधिकारी ।

सूपाधिकारी —(उपसृत्य) जयतु देवः ।

सर्वं सम्पन्नमन्नं समधिकरुचिकृत् सूपपूर्णैः कटाहैः
सन्निष्ठानैर्गरिष्ठैरपि भरितमभूद् दाधिकाद्यैरनेकैः ।
आपक्वैः पर्पटौघैः फलभरनिचयैः पुञ्जिताभिः सिताभिः
सार्धं नव्याज्यकुम्भैर्मधुरिमभरितैः पायसौघैश्च पूर्णम् ॥

विविक्षूणां तत्तद्विभवमुपभोक्तुं समुदितं
दिदृक्षूणां तत्तद्दिशि दिशि भवं भोजनविधिम् ।
जनानां बाहुल्यात् सकलककुभामन्तरजुषां
समन्तादाघोषः समजनि सुभोज्याकुलधियाम् ॥ ७६ ॥

राजा —(सानुमोदम्) तर्हि क्षिप्रमेषां निर्वर्तय भोजनविधिम् ।

सूपाधिकारी — शिरसि कृतं देवस्य शासनम् । (इति निष्क्रान्तः ।)

(राजा भगवन्नामावलिमावर्तयंस्तिष्ठति ।)

(नेपथ्ये)

पङ्क्तीभूता भोक्तुकामा द्विजेन्द्रा
न्यस्तं चैषामग्रतः पत्रजातम् ।
मुक्ताशुभ्रं सूपयुक्तं सुखोष्णं
न्यस्तं चान्नं प्राज्यनव्याज्यसिक्तम् ॥ ७७ ॥

राजा — (श्रुत्वा स्वगतम्) द्रुतमुपक्रान्तमन्नपरिवेषणम् ।

(पुनर्नेपथ्ये)

कैलासभूधरसितोन्नतमन्नराशिं
दर्व्या विभज्य बहवः परिवेषयन्ति ।
विप्रावली तु घृतसूपसमग्रमन्न-
मामृष्टपर्पटशतेन नियोज्य भुङ्क्ते ॥ ७८ ॥

अपिच,

भुक्त्वा पत्रगतेऽपि भक्ष्यनिचये कृत्वारवं भैरवं
हृत्वा पात्रमुपागतस्य करतः पूपोत्करैः पूरितम् ।
दुर्वृत्तत्वमुपावहन्ति कतिचित् तान् वारयन्ते ततः
सान्त्वैरेव महानसाधिपतयस्तूर्णं समभ्यागताः ॥ ७९ ॥

राजा — (आकर्ण्य सहर्षम्) अनेन व्यापारेणापि सम्पूजनीया ब्राह्मणाः । भुक्तिजनितं तृप्त्यतिशयं ब्राह्मणाः प्रद्योतयन्ति ।

परिजनाः — (जनान्तिकम्) अहो! देवस्यान्नदाने श्रद्धातिशयः, यदेषां दुर्वृत्ततापि सुवृत्तता संवृत्ता ।

(पुनर्नेपथ्ये)

भरद्वाजाश्रमे पूर्वं भरतातिथ्यवर्णनम् ।
प्रत्यक्षमिह सञ्जातमस्माकं मृष्टमश्नताम् ॥ ८० ॥

भरद्वाजे वञ्चिराजे भक्तदाने गुणोत्तरे ।
विशेषस्त्वनयोरेष यदागन्तुगृहस्थते ॥ ८१ ॥

भरताय भरद्वाजः कदाचिद् भोजनं ददौ ।
वञ्चिराज इवायं कः कलौ नित्यान्नदो भवेत् ॥ ८२ ॥

राजा — (श्रुत्वा) सर्वमिदं ब्राह्मणानां प्रशंसावचनं भगवति पद्मनाभे पर्यवस्यति ।

परिजनाः — अहो भगवति पद्मनाभे देवस्य भावनानैरन्तर्यम् ।

(पुनर्नेपथ्ये)

अन्नं मुक्ताफलाभं नवकनकरुचिः सूपभारो घृतौघैः
प्रेष्ठो निष्ठानसङ्घो विविधरुचिनिधिः पर्पटाः प्राज्यभेदाः ।
रम्भा स्वाद्यैकसारा नवनवरुचयो गौड(प ? भ)क्ष्या दधीनि
छेद्यान्यत्राद्य भुक्तिं भजति हि भजतां पुण्यमुच्चावचत्वम् ॥

सर्वे सम्भूय मामेव जुषध्वं रुचिकाङ्क्षिणः ।
एकैकमत्र वस्त्वेवं वक्तीव गुणवत्तया ॥ ८४ ॥

तुल्यसंयोजितरसो यथावद्वस्तुभर्जितः ।
अहो निष्ठानसङ्घोऽयं भोक्तॄणामुदरान्तरे ॥ ८५ ॥

अन्विष्यान्विष्य यत्नेन प्रवीक्ष्याप्यल्पमेव वा ।
अवकाशमलब्ध्वैव पात्रेष्वेव प्रतिष्ठितः ॥ ८६ ॥

लिलिक्षा च बुभुक्षा च पिपासा च प्रवर्तते ।
असावेषावियं (?) चैता नीयन्ते चरितार्थताम् ॥ ८७ ॥

राजा — इदमतीव मे परितोषकरं, यदिमे ब्राह्मणाः पुनः पुनरभ्यवहरन्ति ।

(पुनर्नेपथ्ये)

वागर्हा प्रथमैकैव संलब्धा शब्दकारिणा ।
धात्रा तु तद्द्वयं प्राप्तं वागनर्हमभूच्च तत् ॥ ८८ ॥

वञ्चिराजान्नदाने तु भोक्तृभिः सकलैरपि ।
बहवः प्रथमा लब्धाः स्वादनीयरसाकराः ॥ ८९ ॥

तदसौ वर्ण्यते केन सुमहान् भोजनोत्सवः ।
पक्कपर्पटसौरभ्यवशीकृतजगत्त्रयः ॥ ९० ॥

पर्पटध्वंसनारावैः फलचूषणकूजितैः ।
श्लाघाशब्दैश्च विविधैस्तादृग्भक्ष्यभरारवैः ॥ ९१ ॥

वञ्चिराजान्नदानेऽस्मिन् भुक्तिविद्याप्रवर्तकैः ।
निरन्तरमुपन्यासः क्रियतेऽस्माभिरप्यहो ॥ ९२ ॥

राजा — (स्मितं कृत्वा) एवमालप्यते शुष्कवैदिकैः ।

(पुनर्नेपथ्ये)

चूडाकलितपुष्पौघाश्चन्दनालिप्तमूर्तयः ।
ललाटपट्टसंवृत्तनवकुङ्कुमचित्रकाः ॥ ९३ ॥

भुक्त्यन्तलब्धताम्बूलभरपूर्णकरा वयम् ।
आयुराशास्महे पूर्णं वञ्चिराजशिरोमणेः ॥ ९४ ॥

राजा — (साञ्जलिपुटम्) ब्राह्मणानुग्रहात् परं किमस्ति परमं श्रेयः । (सप्रहर्षं समीपस्थं पुरुषं विलोक्य) अयि रणत्कङ्कण! भुक्त-

वतामेषां क्षिप्रमेव भूरिप्रतिग्रहविधिर्निर्वर्तनीयः। प्राकारद्वारचतुष्टयेऽपि निर्वोढारो नियोक्तव्याः। तत् के पुनरिह वर्तन्ते।

रणत्कङ्कणः—देवस्य कटाक्षमहिम्ना कस्य वा न भवेन्निर्वोढृता।

राजा—तर्हि मद्वचनात् पूर्वद्वारे सानुचरेण राजतदण्डधारिणा राजगोपालेन सह स्वामिभक्तं प्रसन्नमुखं, सपरिवारेण रौप्यदण्डधारिणा रुक्मिणीवल्लभेन साकं दक्षिणद्वारे दाक्षिण्यशीलं, सानुगेन कलधौतदण्डधारिणा कालकण्ठेन सहितं पश्चिमद्वारे पूर्णपुण्यं, सभृत्यवर्गेण तादृशदण्डधारिणा सत्यप्रियेण सत्रा उत्तरद्वारे सद्गुणोत्तरं नियुज्याबालवृद्धं पुरुषाणामाम्रफलप्रमाणैश्च स्त्रीणामामलकप्रमाणैः सुवर्णखण्डैरुन्नताधिकारिणा भवतैवाप्रमत्तेन भूरिप्रतिग्रहविधिर्निर्वर्तनीयः।

रणत्कङ्कणः—शिरसि धृतं देवस्य शासनम्।

राजा—गवां विप्रसात्करणे नियुक्तो हेमकङ्कणः कथमिदानीं नायातः।

(प्रविश्य)

हेमकङ्कणः—जयतु देवः।

राजा—अये हेमकङ्कण! अपि निर्वर्तितं गवां विप्रसात्करणम्।

हेमकङ्कणः—कथमाकलयेद् देवस्य शासनं क्रियाविलम्बम्।

राजा—(सपरितोषम्) तर्हि भूरिदानाय निक्षिप्तान् हेमराशीन् रणत्कङ्कणवशे कुरुष्व। तदर्थमिदानीं गम्यताम्।

हेमकङ्कणः—यदाज्ञापयति देवः । (इति रणत्कङ्कणमाहूय तेन सह निष्क्रान्तः।)

राजा—(विचिन्त्य सन्निहितमवलोक्य) अये गणकाध्यक्ष! भूरिग्रहणाय सम्मिलितान् जनान् कतीति परिसङ्ख्याय क्षिप्रमागच्छ ।

गणकाध्यक्षः—यदाज्ञापयति । (इति निष्क्रान्तः ।)

राजा—(सन्निहितानवलोक्य) पटीयानयं शीघ्रमेव जनसङ्ख्यापरिच्छेदं कृत्वागमिष्यति ।

(प्रविश्य)

गणकाध्यक्षः—देव! स्त्रीबालवृद्धानुसम्मिलितोऽयं ब्राह्मणजनौघः सङ्ख्यया परार्धोपान्तमाश्रयति ।

राजा—(सहर्षम्) हन्त दिग्विजये बह्वर्थं संघटितवता भगवता श्रीपद्मनाभेन तदुपयोगपर्याप्तानि पात्राण्यपि संघटितानि ।

परिजनाः—हन्त देवोऽयमौदार्यवैभवेन सुदुष्करमपि स्वीषत्करं मन्यते ।

राजा—हन्त किमुच्यते भगवत्कटाक्षस्य किं वा न स्वीषत्करमिति वक्तव्यं ।

परिजनाः—तथा न शङ्कनीयं देवेन । कथमनभिमतं भवेदन्यैः पुत्रगुणप्रशंसनं जनकस्य ।

राजा—एवञ्चेन्नाहमपराध्नोमि, तादृशं किल भगवतो वात्सल्यम् ।

परिजनाः — (जनान्तिकम्) देवस्य भगवति श्रीपद्मनाभे भक्तिसान्तत्यमस्मदाद्युक्त्या नान्यथा भवति । कथमापाद्यते रत्नदीपशिखा वात्यया निर्वापणम् ।

(नेपथ्ये)

यौगपद्यविनिष्क्रान्तजनौघं नगरान्तरम् ।
निश्शेषशान्तकल्लोलस्तिमिताम्बुधिसन्निभम् ॥ ९५ ॥

(सर्वे श्रवणमभिनयन्ति ।)

राजा — रथ्यापुरुषवचनमिदं भूरिप्रतिग्रहोपरमं सूचयति ।

(नेपथ्ये)

पूर्णं कुमार्याभरणाभिपूर्त्यै
पर्याप्तमुद्वाहकृते सुतानाम् ।
श्रीशाभिषेकाङ्गतया प्रवृत्त-
भूरिप्रदानात्तमिदं सुवर्णम् ॥ ९६ ॥

सर्वे — (आकर्ण्य) इदं च वचनं सूचितमर्थं स्पष्टीकरोति ।

(पुनश्च नेपथ्ये)

वर्ण्येत केनेदमहो विचित्रं
वञ्चीश्वरस्यास्य सुवर्णदानम् ।
येनाखिलं भूतलमेतदासीत्
सम्भूषिताशेषजनौघपूर्णम् ॥ ९७ ॥

राजा — (आकर्ण्य) इदमपि सुवर्णदानवर्णनं भगवति पद्मनाभे पर्यवस्यति ।

परिजनाः — (जनान्तिकम्) अहो देवस्य भगवति गाढानुसन्धानमिदं स्वाश्रितानपि मोहातिसन्धानान्मोचयति ।

(नेपथ्ये)

कल्पशाखी कामधेनुश्चिन्तामणिरिति श्रुतम् ।
तेषां समष्टिरूपोऽयं वञ्चीन्द्रकुलशेखरः ॥ ९८ ॥

राजा — इदं च भूरिसुवर्णग्राहिणां वचनं मय्यत्यन्तातिशयोक्तिरलङ्कारः । भगवति पद्मनाभे तु स्वभावोक्तिरलङ्कारः । (विचिन्त्य) कथमितोऽपि निवृत्तो भूरिदानाद् रणत्कङ्कणः ।

रणत्कङ्कणः — (प्रविश्य) जयतु देवः ।

राजा — अपि निर्वर्तितो भूरिप्रतिग्रहः ।

रणत्कङ्कणः — यथावदाचरितं देवस्य शासनम् ।

राजा — कथं विश्रम्यते सवत्सालङ्कृतिबहुगवीविप्रसात्करणात् परिश्रान्तेन हेमकङ्कणेन ।

(प्रविश्य)

हेमकङ्कणः — (उपसृत्य) देवस्य शासनानुष्ठाने सज्जोऽस्मि ।

राजा — (सप्रसादम्) अये हेमकङ्कण ! गुरुदक्षिणासमनन्तरमेव भगवदारामाद् राजधानीं प्रविष्टेन मया नानादिगन्तेभ्यः सम्मिलितं सकलमपि राजन्यकुलं सम्भावनीयम् । अतस्त्वरितमेव तत्र गत्वा पीताम्बरभूषणादिकं वस्तु यथार्हनिर्णीतालिखितपत्रिकाप्रकारेण सज्जीकुरुष्व ।

हेमकङ्कणः — यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

राजा — कथमिदानीं नायातो गुरुदक्षिणावसरावेदकस्तदन्तेवासी ।

(प्रविश्य)

वक्रनासः — (उपसृत्य) विजयस्व (इति वर्धयन्) आचार्यैराचरितमखिलं च पूजाहोमतन्त्रविधानम् । इदानीं मयि तदन्तेवासिताजागरूकत्वं प्रकाशितम् । इतो देवः प्रमाणम् ।

राजा — कथं निद्राति कार्तान्तिकः ।

कार्तान्तिकः — (उपसृत्य) नैव निद्रामि । सुलग्नागमे ध्यानमारुह्य जागर्मि । सन्निधत्ते समयः ।

राजा — (क्षणं विलम्ब्य पार्श्वमवलोक्य) किमम्बायाः प्रियसेवी सन्निहितः ।

(प्रविश्य)

मेधावी — जयतु देवः ।

राजा — (सन्निकर्षं सादरमाहूयोपांशुतया) किमम्बानुशासितवती ।

मेधावी — (करतलं वदनोपान्ते नियोज्य सप्रश्रयम्) देव ! तत्रभवती भवज्जननी एवमनुशास्ति — सपुत्रिकाहं निर्वर्तितमहाभिषेकमहोत्सवं वत्समारात्रिकाचरणादिसमयाचारानुष्ठानेनानुग्रहीतुमुत्सुकास्मीति ।

राजा — मेधाविन् ! मातुरनुग्रहसम्पादनमेव पुत्राणां सकलपुरुषार्थसमष्टिरिति मन्ये । तदिदं निवेद्यतामस्मज्जननी ।

मेधावी — मातुः समीपं गच्छामि । (इति निष्क्रान्तः ।)

राजा — (पुरस्कृत्य वक्रनासं भगवतः पुरोमण्डपाभ्यन्तरप्रवेशं नाटयन्) किमिदानीं वत्सो विद्वत्कविकुलं सम्मानयति ।

(प्रविश्य कुमारः सप्रश्रयमुपसर्पति ।)

राजा — अपि कृतं वत्स! विद्वत्कुलसम्मानम् ।

कुमारः — अनुष्ठितमार्यस्य शासनम् ।

राजा — (कुमारेण सार्धं सकलमपि तत्र सज्जं वस्तुजातं विलोक्य स्वगतम्) पूर्वमेव मया नियुक्तैर्यथार्हतत्तद्वस्तुसम्भरणचमत्करणचातुर्यशालिभिः पुरुषैः सम्यगुपक्षिप्तसकलसामग्रीसमष्टिसंशोभमानं दिव्यतुलसीसम्मिलत्सुरभिलदिव्यनव्यामोदमेदुरविविधपुष्पसंहतिघुमुघुमितदिगन्तरालं चन्द्रिकाधवलपटीरपङ्कपरिपूरितानेकमणिभाजनविशेषभ्राजमानम् अतिसुगन्धतैलधारापूरितसम्यगुद्दीपितज्वालादेदीप्यमानमहनीयहेमदीपस्तम्भावलिसम्भावनीयं यथार्हनिवेशितमणिघटितशातकुम्भकूर्मासनौघरमणीयम् अतिविमलसलिलभरपरिपूरितरुचिरनवकनकमाणिकनिकरसुकरजनहृदयानुरञ्जनं ज्वलदङ्गारसदृशप्रभामांसलितमणिगणशृङ्गारितानेकभृङ्गा(रुका ? र)विन्यासकमनीयं पुञ्जीकृतभूषणपीताम्बरोच्चावचभेदसन्दर्शनीयं तत्र तत्र राशीकृतसुवर्णतेजःप्रकाश्यमानविप्रकृष्टानेकसद्वस्तुजालं सन्निधापितानर्घमणिचक्रवालकान्तिस्तोमचाकचक्यप्रकल्पितस्वकीयनयनसहस्रशतोन्मेषं कनकघटितघण्टाराजिविराजितोपान्तं पर्याप्ततमपरिभासुरसपर्याभाजनजालविशेषसम्पूजनीयं दिव्यागरुधूपसम्प्रसरणसन्तर्पितसमस्तजनौघनासापुटाभ्यन्तरं परिपक्वजम्बूफलप्रकरपरिस्पर्धिक्रमुकपुञ्जसम्मिलन्मृदुलमञ्जुल-

ताम्बूलदलभाराधिकसमुच्छ्रायितलक्ष्मीकं सन्निधापितमणिगणखचितकेयूराङ्गदकटकमुकुटहारनूपुरकटिसूत्राङ्गुलीयकग्रैवेयादिसर्वाभरणसमग्रसम्भूषितं भगवतः पुरोमण्डपाभ्यन्तरालमिदं सन्ततोद्यदच्छस्फटिकमाणिक्यशिलासमाचितकुट्टिमप्रभाचाकचक्यप्रसरणसम्मिलिततया युगपदुन्मीलदमलकमलकल्हारकुवलयाद्यनेककुसुमनिकुरुम्बनीरन्ध्रितनिजाम्बुपूरं कौबेरं सर इव निखिलभुवनमनोहरं भवति । (प्रकाशम्) (सश्रद्धौत्सुक्यं सामुदायिकं विलोक्य) अयि भगवत्कैङ्कर्यपरऋत्विगादिसहितास्मत्कुलाचार्या भगवन्महाभिषेककर्तारो दक्षिणां स्वीकर्तुमानेतव्याः ।

सामुदायिकः— तथा । (इति निष्क्रम्याचार्यादिभिः सह प्रविश्योपसर्पति ।)

राजा — (तानालोक्योत्थाय सप्रश्रयमञ्जलिं बद्ध्वा) मणिघटितानीमानि हेमकूर्मासनानि अध्यासतां भगवन्तः ।

(आचार्यादयः सर्वे यथार्हमुपविशन्ति । राजा गन्धपुष्पधूपदीपादिभिस्तानभ्यर्च्य तेभ्यः सुवर्णमणिराशिपीताम्बरौघकनककङ्कणाद्यनेकभूषणादिरूपां दक्षिणां प्रदाय नमस्कृत्योत्थाय साञ्जलिपुटस्तिष्ठति । आचार्या दक्षिणां प्रतिगृह्य कुमारसहितं महाराजममोघैराशीर्वचनैर्विभूषयन्ति ।)

राजा — (कुमारसहितस्तानाचार्यान् प्रार्थयति ।)—

महाभिषेकनियमैः परिश्रान्तिमुपागताः ।
प्रसीदन्तु ममाचार्याः प्रपन्नानुग्रहप्रदाः ॥ ९९ ॥
अनुगृह्णन्तु मां प्रीता भवन्तो वेदराशयः ।
यथा श्रीपद्मनाभाङ्घ्रिभक्तिरेषानपायिनी ॥ १०० ॥

यथा श्रीबालरामोऽयं वत्सः कुवलयं सदा ।
यशश्चन्द्रिकया पूर्णश्चन्द्रमा इव नन्दयेत् ॥ १०१ ॥

आचार्याः —

श्रीपद्मनाभदासाग्र्य ! बालमार्ताण्डभूपते ! ।
बालरामसमेतं त्वां पात्रयामो महाशिषाम् ॥ १०२ ॥
तदिह प्राङ्मुखो भूत्वा सह श्रीरामवर्मणा ।
रत्नास्तरणसंवीते सुखमास्स्व महीतले ॥ १०३ ॥

राजा — आचार्या यदनुशासति । (इति रत्नास्तरणसंवीते मणितले श्रीरामवर्मणा सहोपविशति ।)

आचार्याः — (राजानं शिरसि कराभ्यां संस्पृश्य)

भगवद्भक्तिरेषा ते निरपाया निरङ्कुशा ।
इतोऽपि वर्धतां नित्यममितानन्ददायिनी ॥ १०४ ॥
शौर्यौदार्यादिसौभाग्यगुणचन्द्रिकया जगत् ।
आनन्दयन् गुणाराम! रामचन्द्र! सुखी भव ॥ १०५॥

(इति कुमारमपि शिरसि संस्पृश्य समाहितमनसोऽनुगृह्णन्ति । वत्ससहितः प्रह्वीभवन् महाराजो महतीमाशिषं शिरसा स्वीकरोति ।)

आचार्याः —

भारं वहति लक्ष्मीशो भारतीवल्लभोपमान् ।
ब्राह्मणान् पालयन् भक्त्या महाराज! सुखी भव ॥

सर्वे — अहो लोकानुकूला महतामाशीः ।

राजा — (साञ्जलिपुटम्) बाढमनुगृहीतोऽस्मि ।

भवदाशीःसुधासेकशीतला मम धीलता ।
सद्य एवामितानन्दफलसन्दोहमश्नुते ॥ १०७ ॥

तथापीदमेकं हृदये परिवर्तते, यद् भवन्तो मद्वाचके राजशब्दे महच्छब्दमुपोच्चारयन्ति । किं नाहमभिषिक्तोऽस्मि यौवराज्ये कृपावर्षिणा भगवता पद्मनाभेन ।

आचार्याः — भगवत्कटाक्षावर्जितैरमृतैरिदानीमेव किलाभिषिच्यते यौवराज्ये । अ अः ! किलायमन्तरिक्षसन्निकर्षे दिव्यदुन्दुभिघोषः, अद्भुतपरिमलभरभासुरा महती पुष्पवृष्टिः, अपूर्वनूपुराडम्बरा दिव्यवधूटीनटनारभटी च जगदानन्दमुद्वेलयति ।

राजा — (सप्रमोदमवहितः साञ्जलिपुटम्)

भगवत्पद्मनाभेन साम्राज्यभरवाहिना ।
यौवराज्येऽभिषिक्तोऽस्मि ह्यधुनैव कृपामृतैः ॥ १०८ ॥

तदितः प्रभृति मयि मद्भागिनेये वत्से श्रीरामवर्मणि मद्वंशमौक्तिकीभविष्यत्सु तेषु तेषु च यथासमयं सर्वैरपि युवराजशब्दः प्रयुज्यताम् । महाराजशब्दस्तु भगवत्यनन्तशायिनि पद्मनाभे ।

आज्ञामुद्राप्यनुज्ञा च निग्रहानुग्रहावपि ।
एतदन्यच्च यत्किञ्चित् तस्य कर्ता श्रियःपतिः ॥ १०९ ॥

तदशेषेष्वपि कृत्येषु प्रयोगार्हतया भगवदभिधानं पद्मनाभपदं प्रमाणीक्रियताम् । मदीयाभिधानं तु व्यवहारमात्रे, यदहं न कस्यापि कर्तास्मि ।

आचार्याः—तत्त्वज्ञानानुरूपोऽयं देवस्य कल्पनानिष्कर्षः । लोकश्चायमनेन महता श्रेयसा संयोज्यते, यदस्य श्रीपद्मनाभपदोच्चारणं विना न क्वापि कार्यप्रवृत्तिः ।

राजा—सर्वमिदं महदनुग्रहवशात् । (विचिन्त्य आचार्यादीन् प्रति साञ्जलिबन्धम्)

यौवराज्याङ्कितां प्राप्ता सखेटासिलता मम ।
किञ्चान्यदहमिच्छामि भक्तलक्षणमच्युतात् ॥ ११० ॥

(इति प्रार्थयति ।)

(तावदाकाशे)

मनसा वहसे यत् त्वं मदङ्घ्रिकमलद्वयम् ।
भक्तचिह्नतया वत्स! तदेव शिरसा वह ॥ १११ ॥

(सर्वे साश्चर्यमाकर्ण्य भगवत्कल्पितं वचः ।
तूर्णं निर्वर्णयन्ति स्म वञ्चिभूपशिरस्पदम् ॥ ११२ ॥)

नृपकुलपतिरेष स्वार्जितैर्भक्तियोगै-
र्निजशिरसि निधत्ते पद्मनाभाङ्घ्रिपद्मम् ।
तदिममिह समेताः साद्भुतं प्रेक्षमाणा
वयमपि सुकृतानामेकपात्रं भवामः ॥ ११३ ॥

(इत्याश्चर्यपारवश्यं प्रविष्टाः पश्यन्ति ।)

रथाङ्गशङ्खध्वजपुण्डरीक-
श्वेतातपत्रोभयचामराङ्कम् ।
श्रीशाङ्घ्रिपद्मं शिरसा दधानो
वञ्चीश्वरः स्वां विवृणोति भक्तिम् ॥ ११४ ॥

आबालवृद्धमिलिताखिललोकनेत्र-
व्राताब्जसङ्घविकचीकरणे पटीयान् ।
श्रीपद्मनाभपदपद्ममपि स्वमूर्ध्नि
प्रोत्फुल्लयन्नवनिभानुरसौ विभाति ॥ ११५ ॥

(एवञ्च केचिद् विस्मयस्तिमितनेत्राः पश्यन्ति ।)

राजा—(अमितपरमानन्दसागरसम्प्लावितमनाः सन् कुमारं विलोक्य) वत्स श्रीरामवर्मन्! किमितः करणीयम्।

कुमारः—(सविनयम्) किमन्यद् देव! राजसम्मानात्।

राजा— तत् करिष्यते राजधानीप्रवेशानन्तरम्। (विचिन्त्य स्वगतम्) वत्सस्य वचने देवशब्दराजशब्दयोः सन्निकर्षस्तन्नामधेयं कविं स्मारयति। य एव वत्सेन निजप्रेमनिक्षेपसम्पुटीकृतः।

स्वतो मम कविप्रीतिर्वत्सप्रीतिस्तदुत्तरा।
उभयं च समाश्रित्य स भूयोऽर्हति मान्यताम्॥ ११६॥

वाचि तत्त्वार्थसंयोगात् कालिदासो नवो ह्यसौ।
बहवः कवयः सन्ति भुवने कवयन्ति ये॥ ११७॥

जयप्रस्थानवेलायामस्मै व्याक्षेपहारिणे।
अग्रहारद्वयं दत्तं वृत्त्यलङ्कारहेतवे॥ ११८॥

भगवद्गुणमाधुर्यं नाटकाख्यं नवं मधु।
अस्यास्यपङ्कजोद्भूतं विद्वद्भृङ्गमदावहम्॥ ११९॥

तदर्थमस्मिन् सदसि भूयः सम्मानमर्हति।
अन्यथा चन्द्रधवलमुत्पद्येत कथं यशः॥ १२०॥

(प्रकाशम्) वत्स! श्रीरामवर्मन्!

निजवाक्यपदद्वन्द्वसंमेलनसुबोधितः।
कविरानीयतां तूर्णमस्मिन्नाचार्यसंसदि॥ १२१॥

कुमारः—(सहर्षं सन्निकर्षस्थलात् स्वयमेव कविं प्रवेशयति।)

सर्वे—(कविं पश्यन्तो जनान्तिकम्)

दिविरञ्जिसमुत्पन्नशब्दद्वितयमेलनम् ।
पुरन्दरस्य प्रथमं पश्चादस्याभिधाभवत् ॥ १२२ ॥
पितामहसमानोऽस्य पिता महिमगौरवात् ।
पितामहसनामा च शेषाद्रिरिति संज्ञया ॥ १२३ ॥
तादृशस्यानुरूपोऽयमात्मजः प्रशमं परम् ।
विद्याविनयसम्पत्त्या सम्पादयति सर्वदा ॥ १२४ ॥
परमेष्ठी प्रसिद्धः स पटिष्ठः सर्गकर्मणि ।
निरपाययशःकायसृष्ट्यैवैष विशिष्यते ॥ १२५ ॥
तदिदानीं वयं चापि मणिप्रवरसम्पदाम् ।
निक्षेपधरणीमेनं करिष्यामो यशस्कृते ॥ १२६ ॥

(इति कविमादरजुषा चक्षुषा बहुमानय(ति ? न्ति) ।

कविः— (जनवितीर्णेन सभान्तरालवर्त्मना राजानमुपसृत्य सविनय-प्रागल्भ्यम्)

भगवत्पद्मनाभस्य कृपा सरिदिवार्णवम् ।
अपारमहिमानं त्वामभिगच्छतु सर्वदा ॥ १२७ ॥

राजा — किमितोऽप्यन्यदस्माकमाशास्यम् । सरसकवे ! मणिघटितमध्यास्यतामिदं हाटकपीठम् ।

कविः— यदनुशास्ति महाप्रभुः । (इति मणिपीठे उपविशति ।

आचार्याः—

पुरा हर्षमयी सम्पद् वितीर्णा कर्णमार्गतः ।
गोकर्णमार्गतश्चाद्य द्विगुणा सैव दीयते ॥ १२८ ॥

कविः— (प्रश्रयं प्रदर्श्य)

त्रिद्वत्खगकुलायानां भवत्कल्पकशाखिनाम् ।
अमात्सर्यमिदं त्वेकमम्लानकुसुमोत्करः ॥ १२९ ॥

आचार्याः —

भवत्कवनमाधुर्यं विबुधामोदवृद्धिदम् ।
केवलश्रान्तिफलकं कुरुतेऽम्भोधिमन्थनम् ॥ १३० ॥

कविः —

निसर्गो ह्ययमार्याणां गुणमात्रप्रशंसनम् ।
स्वभावो नहि भृङ्गाणां मकरन्दरसग्रहः ॥ १३१ ॥

राजा — (स्वगतम्) इदानीमस्य सम्मानमाचार्याणां चानन्दकरं, यदेते कविताप्रीतिममितां कुर्वते। (प्रकाशमाचार्यान् प्रति)

सद्वस्तुघटितं चारु नाटकं कृतवानयम् ।
तदस्मिन्नेव सदसि महत् सम्मानमर्हति ॥ १३२ ॥

आचार्याः—

कवितानन्दवैवश्यं वहद्भिर्वञ्चिभूपते! ।
पूर्वमस्माभिरेवेदं प्रयोज्यं पद्यमुत्तमम् ॥ १३३ ॥

तथापि,

त्रिपाटिता न कर्तव्या परिपाटी क्रमाश्रिता ।
इति प्रहृष्टैरस्माभिस्तूष्णीम्भावः समाश्रितः ॥ १३४ ॥

इदानीं तु

लब्धावकाशैरस्माभिः पद्यमाम्रेडितं कृतम् ।
विचिकित्सात्मकं शल्यमुत्सारयति दूरतः॥ १३५ ॥

राजा — (सहर्षातिशयम्)

अनुज्ञाकल्पलतिकामाचार्याणामपूर्विकाम् ।
सद्यः सफलयाम्येनामुद्यदुत्साहसम्पदा ॥ १३६ ॥

(इति कुमारमाहूय कर्णे रहस्यं कथयति ।)

कुमारः— यदाज्ञापयति मातुलदेवः । (इति पुरुषमुखात् स्वयमेव मणिघटितमहनीयतपनीयसम्पुटीचतुष्टयं महाराजसन्निधाववतारयति ।)

(सर्वे सकुतूहलं पश्यन्ति ।)

कविः— (विलोक्य स्वगतम्)

अल्पं वा बहु वा लभ्यं लभ्यते स्वयमेव तत् ।
प्रवर्तितव्या यत्नेन प्रार्थना जानता हरौ ॥ १३७ ॥

तथापि लोकाचारमनुरुन्धतो मम,

इष्टसा ज्ञानचण्डांशुसम्पूर्णोदयदर्शनात् ।
प्रार्थनं मणिहेमादिसम्पदां प्रभुशेखरात् ॥ १३८ ॥

(प्रकाशम्)

वञ्चिवंशमहाश्लाघ्यमुक्तामणिरहो भवान् ।
उत्कम्पित इवाभाति सम्प्रति प्रीतियोगतः ॥ १३९ ॥

राजा— (स्मितं कुर्वन्) सरसकवे! श्रूयतां—

विचित्रपदविन्यासैर्मनःसरसि मामके ।
भावत्ककविताहंसी खेलनं कुरुतेऽद्भुतम् ॥ १४० ॥

तदालोकनकुतूहलजनितमिदमस्मच्चाञ्चल्यम् ।

आचार्याः— रसानुभवो भावविशेषजनकः ।

भगवत्पादकमलशोभिते तव मानसे ।
कविताहंसिका किं वा न करोति कुतूहलम् ॥ १४१ ॥

कविः — भो वञ्चिकुलचिन्तामणे !

अभङ्गुररमापाङ्गतरङ्गिततनोस्तव ।
अभङ्गमिदमेवालं प्रेम मत्प्रेमवृद्धये ॥ १४२ ॥

राजा — (स्वगतम्) अहो निजकृतिव्यञ्जितभगवद्भक्ति-सक्तिना कविना प्रेमैवालमिति वचसा लौकिकेषु धनेष्वना-सक्तिः संसूचिता । अथवा,

रजस्तमोविनिर्मुक्ताः सात्त्विका भगवत्प्रियाः ।
स्वाराज्यमपि मन्यन्ते चेटिकारामवाटिकाम् ॥ १४३ ॥

लक्ष्मीशचरणाम्भोजभक्तिरूपधनं विना ।
रत्नादिकं सुवर्णं वा न धनं बन्धनं हि तत् ॥ १४४ ॥

लौकिकीमहमाश्रित्य प्रवृत्तिं धनसङ्ग्रहम् ।
बहुकार्षं हरेरेव नियोगेन दिशां जये ॥ १४५ ॥

सङ्गृहीतं धनं सम्यक् सत्पात्रे विनियोजितम् ।
साफल्यं लभते नूनं स्वतो भूमिर्वसुन्धरा ॥ १४६ ॥

भगवद्भक्तिसङ्ग्राह्यनिजकर्तृकसत्कृतिम् ।
सम्मानकलनादेनं प्रापयाम्युचितं धनम् ॥ १४७ ॥

धनीभूतं च यत् किञ्चित् तत् सर्वं पृथिवीमयम् ।
स्वर्णाद्यं नाम लभते चाकचक्यप्रभेदतः ॥ १४८ ॥

(विचिन्त्य साश्चर्यम्)

चाकचक्यसमुत्पन्नं स्वर्णं रत्नमिति भ्रमः ।
सर्वान् प्रबाधते लोकानहो विद्वत्तमानपि ॥ १४९ ॥

अस्तं गते बोधसूर्ये मायारात्रिमुपाश्रिताः ।
सुवर्णमणिखद्योता द्योतन्ते द्युतिशालिनः ॥ १५० ॥

कदाचिदुदिते तस्मिन् मायाध्वान्ते विनाशिते ।
दिवातारासमाकारा न भ्राजन्ते कचिच्च ते ॥ १५१ ॥

तदहमिदानीं सम्यगुदितभगवत्प्रसादचन्द्रिकाप्रसरणातिशयझटितिनिश्शेषीकृतलोभरूपगाढान्धकारतया सम्यगवलोकितपरमार्थतत्त्वः निराघाटमेव वस्तुवद् भासमानानीमानि धनानि निगूढभक्तिरसानुभावमेदुरमानसेऽस्मिन् सरसकवौ समर्पयामि । (विचिन्त्य)

गुणग्रामैकनिलयाः संहृष्यन्तु हरेः प्रियाः ।
मात्सर्यनिहतानन्यान् वयं नैवाद्रियामहे ॥ १५२ ॥

(प्रकाशम्) सरसकवे !

यदुक्तं भवता युक्तं प्रेमैवालमभङ्गुरम् ।
यत् त्वत्कवनमूल्यार्थमपर्याप्तं जगत्त्रयम् ॥ १५३
केनचित् क्रियते किञ्चित् सम्माननमिदं तव ।
एतद्दोहलमाश्रित्य कीर्त्तिवल्ली प्रवर्धताम् ॥ १५४ ॥

सरसकवे !

सम्माननमयी लक्ष्मीर्मत्कराम्बुजसुस्थिता ।
त्वत्कराम्बुजसुस्थेयं तावकीना सरस्वती ॥ १५५ ॥
उभे प्रियतमे स्यातामन्योन्यग्रहसंश्रयात् ।
यदद्य भगवान् विष्णुरावयोः सम्प्रसीदति ॥ १५६ ॥

सम्मानलक्ष्मीर्भवतः कराब्ज-
मारुह्य सङ्क्रीडितुमुत्सुकास्ते ।
तस्मादिदानीं मम हस्तपद्मं
वाणी समारोहतु तावकीना ॥ १५७ ॥

कविः— (सहर्षम्)

सुचिरमिह भवन्तं नायकं प्रार्थयन्ती
मम पुनरियमेषा साहिती कन्यकेव ।
क्षितिपतिकुलमौले! बालमार्ताण्ड! पाणि-
ग्रहणमहमिदानीं प्राप्य धन्यैव तेऽस्तु ॥ १५८ ॥

(इति स्वकीयाङ्कविधृतां तपनीयमणिगणालङ्कृतां विचित्रकौशेयधारिणीं धन्यामिव कन्यां निजकृतिसम्पुटीं हस्ते धारयन्)

भवन्तं नायकं प्राप्य प्रसूतैर्बहुभिः सुतैः ।
आक्रम्येयं जगत् सर्वं सुप्रसिद्धिमवाप्नुयात् ॥ १५९ ॥

(इति मणिघटितमहनीयहेमाङ्गुलीयनिकरकान्तिपूरकमनीयतरे बालदिवाकरकिरणाभिमर्शनसमुत्फुल्लारुणसरोरुहातिमनोहरे वञ्चिराजन्यकुलशेखरकरे निजकृतिग्रन्थसम्पुटीं समर्पयति । राजा गृहीत्वा मूर्ध्नि भगवच्चरणारविन्दोपरि तां समभ्यर्च्य नयनयोरासज्य च कुमारहस्ते पुस्तकं समर्पयति ।)

कुमारः— यदाज्ञापयत्यार्यः । (इति गृहीत्वा तथा करोति ।)

राजा— (सपरितोषं किञ्चिद् विवृत्य सम्पुटीचतुष्टयम्)

एका भूषणभूषितेयमितरा माणिक्यहारोज्ज्वला
कौशेयाम्बरधारिणीयमपरा चामीकराढ्या परा ।
एषा पेटचतुष्टयी मणिमयी सम्मानिता ते मया
धीमन्! मामकपद्मनाभचरिताख्यातुः प्रबन्धात्मना ॥

(चतुष्टयं सम्मानयति ।)

कविः— (गृहीत्वा सामोदम्)

अहो मणिसुवर्णौघवर्षिणि त्वयि साम्प्रतम् ।

कादित्वं सन्त्यजेन्नूनं नाम्नि कल्पमहीरुहः ॥ १६१ ॥

आचार्यादयः— वञ्चिवंशमणे ! वयमप्यस्मिन् कवौ परितोषं सफलयितुमभिलषामः ।

राजा — किं न ....षणं महतः पुष्पवृक्षस्य मकरन्दरसग्राहिणां मधुव्रतानां मदपारवश्यम् ।

आचार्यादयः — विशकलितेयमस्मद्विचिकित्सा ।

(इति सम्मानयन्ति ।)

नृपवरगुरुरेषोऽप्यात्मनीनैः स्वशिष्यैः
समममितसमुद्यत्प्रेमभिः प्रीतिपूर्णैः ।
मणिमयवलयाद्यैर्भूषणैरम्बरौघै-
र्महयति कविमेनं भूमिपालैकमान्यम् ॥ १६२ ॥

(इतीतरेऽपि यथार्हं वस्तुभिः सम्भावयन्ति ।)

कविः— (सश्लाघम्)

वारिधेरेव गृह्णन्ति वारिदाः सलिलं बहु ।
न सङ्गृह्णन्ति तद् भूयः सद्यो मुञ्चन्ति भूमिषु ॥१६३॥

वञ्चिराजेन्द्रसंलब्धवित्तानां भवतां सदा ।
एषैव चोपमा युक्ता परार्थैकप्रवर्तिनाम् ॥ १६४ ॥

आचार्यादयः —

कुलीनतावयोविद्यातपःशमगुणादयः ।
पृथक्त्वेनैव सम्पूज्याः किमु यत्र समष्टयः ॥ १६५ ॥

राजा — घनसारमिदमाचार्याणां वचनम् ।

आचार्यादयः — वञ्चिवंशमणे ! भवता निश्शेषगृहीतसारमप्यस्मद्वचनं भूयः सम्पूर्णसारं भवति, किमितोऽप्याश्चर्यम् ।

राजा— (विचिन्त्य कुमारं प्रति) वत्स! श्रीरामवर्मन्! सरसकवेर्गृहप्रवेशाय न किं सन्नद्धो मदावलः।

कुमारः — किञ्चिदग्रतः कटाक्षः क्रियताम्।

+ + + + + + + + + प्रोल्लसद्घण्टिकाली-
वलयितनिजकण्ठस्थूलहारोज्ज्वलश्रीः।
गिरिरिव गजराजः प्रेक्ष्यमाणो जनौघैः
कबलयति समग्रानिक्षुकाण्डान् फलौघैः॥ १६६॥

किञ्च,

सत्फलाहारसम्पूर्णभूयःपुष्टो मदावलः।
निजस्कन्धाधिरोहाय कविराजं प्रतीक्षते॥ १६७॥

राजा—(विलोक्य सहर्षोत्साहम्) हन्त हन्त सारस्वताधिरोहसमुचितालङ्कारसन्नद्धो गजराजः।

उपरिघटितचन्द्रस्वच्छमुक्तासराली-
धवलितहरिदन्तस्यन्दनोच्छ्रायितश्रीः।
कनककलितवेषस्तुङ्गश्रृङ्गो गजेन्द्रः
पुनरपि बहुलक्ष्मीमागतां शंसतीव॥ १६८॥

(कविं कटाक्षयन् सहर्षोत्साहम्)

घुष्यत्सु दुन्दुभिगणेषु सुराहतेषु
पुष्पौघवर्षिषु च तेषु नटीगणेषु।
नृत्यत्सु हेममणिभूषणभूषिताङ्गो
दन्तावलेन्द्रमधिरुह्य गृहं व्रज स्वम्॥ १६९॥

कविः — गृहीतोऽयं बालमार्ताण्डप्रसादो भूयोऽप्यायुरारोग्यसम्पत्तिमुच्छ्राययतु । (इत्युत्थाय परिक्रम्य निष्क्रान्तः ।)

राजा — वत्स! श्रीरामवर्मन्! सम्मानितमिदं धनजातं कविगृहं प्रापय ।

कुमारः —

यथा ससै + + + ना लक्ष्मीरपि गृहं व्रजेत् ।
क + + + तथैवाहमार्यशासनभूषितः ॥ १७० ॥

राजा — (आचार्यान् साष्टाङ्गं प्रणम्योत्थाय साञ्जलिपुटं प्रह्वीभवन्) भो भो भगवन्तः! भगवदारा(म ? माद्) राजधानीं प्रवेष्टुमाचार्यानामन्त्रये। आचार्यैरपि यथायथं स्वस्वावासगमनं यथोचिताचारपुरस्सरं क्रियताम् ।

(इति सर्वे समुत्तिष्ठन्ति ।)

आचार्याः — किञ्चिदाशाऽस्ति सापेक्षम् ।
बालमार्ताण्डराजेन्द्रकुलशेखर! साम्प्रतम् ।
भूयः प्रियतमं किं ते करोतु भगवान् हरिः ॥ १७१ ॥

राजा —

आदेशेन रमापतेर्भगवतो दिङ्मण्डलं निर्जितं
स्वर्णैरेव नवीकृतं मुररिपोः श्रीमन्दिरं सुन्दरम् ।
सान्निध्यं दधता सदेह हरिणा साम्राज्यभारो धृतः
किञ्चानेन निजाङ्घ्रिपङ्कजयुगे भृङ्गीकृतं मे मनः ॥

यत्किञ्चिदिह सम्भूतमागस्तादिदमप्यहो ।
क्षान्तमाचार्यपादैश्च कृतश्चानुग्रहो महान् ॥ १७२ ॥

तदितोऽपि प्रियतमं किमस्ति भुवने मया सम्प्रार्थनीयम् ।
तथापि लोकैकहितकाम्यया सार्थकमिदं भवतु—

(भारतीयं वचनम्)

सम्पूर्णा धरणिः सुवृष्टिभिरियं सम्पन्नसस्या भवे-
देतस्याः पतिरप्यतीव कुरुतात् स्वामेव धर्मस्थितिम् ।
गावो भूमिसुराः परस्परकृतां पुष्टिं भजन्तां सदा
मोदन्तां मृदुसूक्तयश्च कवयः क्षोणीन्द्रसंलालिताः
[॥ १७४ ॥

(इत्युत्थाय परिक्रम्य निष्क्रान्ताः सर्वे ।)
पञ्चमोऽङ्कः ॥

सम्पूर्णमिदं बालमार्ताण्डविजयं नाम नाटकम् ॥

शुभं भूयात् ।

श्लोकानुक्रमणिका।

LIST OF SANSKRIT PUBLICATIONS FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी **Bhaktimanjari** (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः **Syanandurapuravarnana-prabandha** (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampuran.	2	0	0

Trivandrum Sanskrit Series.

No. 1—दैवम् **Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*).	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ **Abhinavakaustubhamala and Daksinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*).	0	2	0
No. 3—नलाभ्युदयः **Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*).	0	4	0
No. 4—शिवलीलार्णवः **Sivalilarnava** (Kāvya) by Nīlakaṇṭha Dīkṣita (*out of stock*).	2	0	0
No. 5—व्यक्तिविवेकः **Vyaktiviveka** (Alaṅkāra) by Mahima-Bhaṭṭa with commentary (*out of stock*).	2	12	0
No. 6—दुर्घटवृत्तिः **Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*),	2	0	0
No. 7—ब्रह्मतत्त्वप्रकाशिका **Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*).	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् **Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*).	1	0	0

	RS.	AS.	P.
No. 9—विरूपाक्षपञ्चाशिका **Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*).	0	8	0
No. 10—मातङ्गलीला **Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).	0	8	0
No. 11—तपतीसंवरणम् **Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	4	0
No. 12—परमार्थसारम् **Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).	0	8	0
No. 13—सुभद्राधनञ्जयम् **Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	0	0
No. 14—नीतिसारः **Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).	3	8	0
No. 15—स्वप्नवासवदत्तम् **Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् **Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 17—पञ्चरात्रम् **Pancharatra** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0
No. 18—नारायणीयम् **Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*out of stock*).	4	0	0
No. 19—मानमेयोदयः **Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).	1	4	0
No. 20—अविमारकम् **Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 21—बालचरितम् **Balacarita** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0

	Rs.	As.	P
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारो-रुभङ्गानि **Madhyamavyayoga-Dutavakya-Dutaghatotkaca-Karnabhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhantacandrika** (Nyāya) by Gaṅgādharasūri (*out of stock*).	0	12	0
No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—वैखानसधर्मप्रश्नः **Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita Part II, 3rd, 4th and 5th Sargas) (*out of stock*).	2	8	0

	RS.	AS.	P.
No. 33—वाररुचसंग्रहः **Vararucasangraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*).	0	8	0
No. 34—मणिदर्पणः **Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin.	1	4	0
No. 35—मणिसारः **Manisara** (Nyāya) by Gopīnātha.	1	8	0
No. 36—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāsikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् **Asaucastaka** (Smṛti) by Vararuci with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Ṭīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa).	2	0	0
No. 39—चारुदत्तम् **Carudatta** (Nāṭaka) by Bhāsa (*out of stock*).	0	12	0
No. 40—अलङ्कारसूत्रम् **Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhuka and its commentary by Samudrabandha (*second edition*).	2	8	0
No. 41—अध्यात्मपटलम् **Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Saṅkara-Bhagavat-Pāda (*out of stock*).	0	4	0
No. 42—प्रतिमानाटकम् **Pratimanataka** by Bhāsa (*out of stock*).	1	8	0
No. 43—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghaṭana of Kṣīrasvāmin and Ṭīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas).	2	8	0
No. 44—तन्त्रशुद्धम् **Tantrasuddha** by Bhaṭṭāraka Vedottama.	0	4	0

		RS.	AS.	P.
No. 45—प्रपञ्चहृदयम् **Prapancahrdaya.**		1	0	0
No. 46—परिभाषावृत्तिः **Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭha Dīkṣita.		0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् **Sidhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.)		1	12	0
No. 48—सिद्धान्तसिद्धाञ्जनम् **Do.** Do. (Part II).		2	0	0
No. 49—गोलदीपिका **Goladipika** (Jyotiṣa) by Parameśvara.		0	4	0
No. 50 –रसार्णवसुधाकरः **Rasarnavasudhakara** (Alaṅkâra) by Singa Bhūpāla.		3	0	0
No. 51—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas).		2	0	0
No. 52—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa).		1	8	0
No. 53—शाब्दनिर्णयः **Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra.		0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः **Sphotasiddhinyayavichara** (Vyâkaraṇa).		0	4	0
No. 55—मत्तविलासप्रहसनम् **Mattavilasaprahasana** (Nâṭaka) by Mahendravikramavarman.		0	8	0
No. 56—मनुष्यालयचन्द्रिका **Manusyalayacandrika** (Śilpa) (*out of stock*).		0	8	0
No. 57—रघुवीरचरितम् **Raghuviracarita** (Kâvya).		1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatî (Part III).		2	0	0

	RS.	AS.	P.
No. 59—नागानन्दम् **Nangananda** (Nâṭaka) by Harṣadeva with the commentary Vimarŝinī of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुतिः **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda.	0	8	0
No 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (vedânta) by Rṛṣnânanda Sarasvatī (Part IV).	1	4	0
No. 62—सर्वमतसंग्रहः **Sarvamatasangraha.**	0	8	0
No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhāravî with the commentary Sabdârthadīpika of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः **Meghasandesa** by Kâlidāsa wîth the commentary Pradīpa of Dakṣiṇâvartanātha.	0	12	0
No· 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी **Maharthamanjari** (Darŝana) with the commentary Parimala of Maheŝvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चयः **Tantraasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarŝinī of Śankara (Part I, 1–6 Paṭalās) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाशः **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikā of Śrī Kumāra.	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati**(Tantra)by Iŝânaŝiva-gurudevamiŝra Part I, Sâmānya-pâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्प **Aryamanjusrimula-kalpa** (Part I).	2	8	0
No. 71—तन्त्रसमुच्चयः **Tantrasamuccaya**(Tantra) by Nârâyaṇa with the commentary Vimarŝinī of Śaṅkara(Part II, 7—12 Paṭalās) (*out of stock*).	3	8	0

	RS.	AS.	P.
No. 72—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Īśānaśiva-gurudevamiśra (Part II, Mantrapāda).	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः **Isvarapratipatti-prakasa** (Vedānta) by Madhusūdana-sarasvatī.	0	4	0
No. 74—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya. (Part I — Âcâra and Vyavahâra Adhyâyās).	3	4	0
No. 75—शिल्परत्नम् **Silparatna** (Śilpa) by Śrī-kumâra (Part I).	2	12	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimula-kalpa** (Part II).	3	0	0
No. 77—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Iśānaśiva-gurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās).	3	0	0
No. 78—आश्वलायनगृह्यसूत्रम् **Asvalayanagrhya-sutra** with the commentary Anāvilā of Haradattācārya.	2	6	0
No. 79—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I—1 & 2 Adhikaraṇās).	3	12	0
No. 80—अर्थशास्त्रम् **Do.** Do. (Part II—3—7 Adhikaraṇās).	4	0	0
No. 81—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrīḍa of Viśva-rūpācārya (Part II. Prâyaścit-tâdhyâya).	2	0	0
No. 82—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopā-dhyāya T. Gaṇapati Śāstri (Part III, 8—15 Adhikaraṇās).	3	4	0
No. 83—ईशानशिवगुरुदेवपद्धतिः **Isanasivaguru-devapaddhati** (Tantra) by Īśāna śivagurudevamiśra (Part IV, Kriyā pāda 31-64 Paṭalās and Yogapāda).	3	8	0

	RS.	AS.	P.
No. 84—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part III).	2	0	0
No. 85—विष्णुसंहिता **Visnusamhita** (Tantra)	2	8	0
No. 86—भरतचरितम् **Bharatacarita** (Kâvya). by Kṛṣṇakavi.	1	8	0
No. 87—सङ्गीतसमयसारः **Sangitasamayasara** (Saṅgīta) of Saṅgītâkara Pârśvadeva.	1	2	0
No. 88—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhityacûdâmaṇi of Bhaṭṭagopâla (Part I, 1–5 Ullâsās).	3	0	0
No. 89—स्फोटसिद्धिः **Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra.	0	8	0
No. 90—मीमांसाश्लोकवार्त्तिकम् **Mimamsaslokavartika** with the commentary Kāśikā of Sucaritamiśra (Part I).	2	8	0
No. 91—होराशास्त्रम् **Horasastra** of Varāhamihirācārya with the Vivaraṇa of Rudra.	3	0	0
No. 92—रसोपनिषत् **Rasopanisat.**	2	0	0
No. 93—वेदान्तपरिभाषा **Vedantaparibhasa** (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita.	1	8	0
No. 94—बृहद्देशी **Brihaddesi** (Saṅgīta) of Matangamuni.	1	8	0
No. 95—रणदीपिका **Ranadipika** (Jyotiṣa) of Kumāragaṇaka.	0	4	0
No. 96—ऋक्संहिता **Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka).	1	8	0

	RS.	AS.	P.
No. 97—नारदीयमनुसंहिता **Naradiyamanusamhita** (Smṛti) with Bhāṣya of Bhavasvāmin.	2	0	0
No. 98—शिल्परत्नम् **Silparatna** (Śilpa) by Śrī-kumāra.	2	8	0
No. 99—मीमांसाश्लोकवार्त्तिकम् **Mimamsasloka-vartika** (Mīmāmsā) with the commentary Kāśikā of Sucaritamiśra (Part II).	2	0	0
No. 100—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrīvidyācakravartin and Sāhitya-cūḍāmaṇi of Bhaṭṭagopāla. (Part II, 6—10 Ullāsās).	5	0	0
No. 101—आर्यभटीयम् **Aryabhaṭīya** (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda).	2	8	0
No. 102—दत्तिलम् **Dattila** (Saṅgīta) of Dattila-muni.	0	4	0
No. 103—हंससन्देशः **Hamsasandesa** (Vedānta) with commentary.	0	8	0
No. 104—साम्बपञ्चाशिका **Sambapancasika** (Stuti) with commentary.	1	0	0
No 105—निधिप्रदीपः **Nidhipradipa** of Siddha-śrikaṇṭhaśambhu.	0	4	0
No. 106—प्रक्रियासर्वस्वम् **Prakriyasarvasva.** (Vyākaraṇa) of Śrī Nārāyaṇa Bhaṭṭa with commentary (Part I.)	1	0	0
No. 107—काव्यरत्नम् **Kavyaratna** (Kāvya) of Arhaddāsa	0	12	0
No. 108—बालमार्ताण्डविजयम् **Balamartanda-vijaya.** (Nāṭaka) of Devarājakavi.	1	8	0

Apply to:—

The Curator

for the publication of Oriental Manuscripts,

Trivandrum.